This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.

+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at http://books.google.com/

The Library

of the

University of Wisconsin

A
11, 144

164 fas
4/-

BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PAṆḌITS OF THE BENARES SANSKṚIT COLLEGE.
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH M. A.
AND
G. THIBAUT PH. DR.

No. 48.

महर्षिशौनकप्रणीतम् ऋक्प्रातिशाख्यम् ।
उव्वटकृतभाष्ययुतम ॥

श्रीकाशिकप्रधानपाठशालयाधीतविद्येन श्रीमच्छिवरामशुक्ला
धीमता लब्धवैदुष्यप्रतिष्ठेन वेदविद्यालयस्य प्रधाना-
ध्यापकेन च पाठकोपाह्वश्रीयुगलकिशोरशर्म्म-
णा संशोध्य प्रकाशितम् ॥

ŚAUNAKA'S PRÁTIŚÁKHYA OF THE RIGVEDA,
WITH THE COMMENTARY OF UVAṬṬA.

EDITED AND ANNOTATED BY PAṆḌIT YUGALAKIŚORA VYÁSA,
LATE SCHOLAR OF THE BENARES SANSKRIT COLLEGE.

Fasciculus I.

BENARES:
PRINTED AND PUBLISHED BY
MESSRS. BRAJ B. DAS & CO.
AT THE BENARES PRINTING PRESS.
1894.

Registered According to Act XXV of 1867.

A
11,144 723009

ऋग्वेदप्रातिशाख्यम् ।

उव्वटकृतभाष्ययुतम् ॥

श्रीगणेशाय नमः ।

श्रीशौनकाय नमः ॥

ओम् ॥ सूत्रभाष्यकृतः सर्वान्प्रणम्य शिरसा शुचिः । शौनकं च विशेषेण येनेदं पार्षदं कृतम् । १ । तथा वृत्तिकृतः सर्वांस्तान्सूत्रवचसत्तमा ॥ तेषां प्रसादादेतेषां सम्मतया वृत्तिमारभे । २ । क्लेशदोषनिवृत्त्यर्थं विस्तारार्थं क्वचित्क्वचित् । बह्वुदाहरणार्थं च योज्यते च मया पुनः । ३ । तस्याः समापने शक्तिं तएव प्रदिशन्तु मे । लब्ध्वा काममहं तेभ्यः प्रमेयं पारमीप्सितम् । ४ । चम्पायां न्यवसत्पूर्वं वत्सानां कुलमृद्धिमत् । यस्मिन्द्विजवरा जाता बह्वृचाः पारगोत्तमाः । ५ । देवमित्र इति ख्यातस्तस्मिञ्जातो महामतिः । स वै पारिषदे श्रेष्ठः सुतस्तस्य महात्मनः । ६ । नाम्ना तु विष्णुमित्रः स कुमार इति शब्द्यते । तेनेयं योजिता वृत्तिः संक्षिप्ता पार्षदे स्फुटा । ७ । परिगृह्णन्तु विप्रेन्द्राः सुप्रसन्ना इमां मम । अज्ञानादपयुक्तं स्यात्तदनूहत्य गृह्यताम् । ८ । शास्त्रकर्तारसंबन्धविषयं च प्रयोजनम् । ज्ञात्वा ग्राह्यं भवेच्छास्त्रमिति शिष्टानुशासन-

च्यते, लक्षणपूर्वकं स्वर्थपरिज्ञानं, तथाचोक्तं (१)"स्वरो वम् । ८ । तस्मादादौ तावच्छास्त्रावतार उच्यते । शौनको गृहपतिर्वै नैमिषीयैस्तु दीक्षितैः । दीक्षासु चोदितः प्राह सत्रे तु द्वादशाहिके इतिशास्त्रावतारं स्मरन्ति । अथ सम्बन्ध उच्यते इह हि द्विजानां वेदाभ्यासः सकलपुरुषार्थसिद्धेः कारणमिति वैदिकसिद्धान्तः, स च पुरुषार्थश्चतुर्विधः । धर्मार्थकाममोक्षाइति तदप्युक्तमृग्विधाने यथा पवमाननाभानेदिष्टसूक्तपुरुषसूक्तादिषु, वेदाभ्यासो हि पञ्चधा विहितः । अध्ययनं विचारोऽभ्यसनं जपोऽध्यापनमिति, तथाच स्मर्यते वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधेति, तदपि वक्ष्यति एकः श्रोता दक्षिणतो निषीदेदित्यादिना अध्ययनं अभ्यासार्थे द्रुतां वृत्तिं । इत्यभ्यसनं, प्रयोगार्थे तु मध्यमामिति जपादि, अध्यापनं पारायणं वर्तयेद्ब्रह्मचारीत्येमादिना तस्मादधीतवेदस्य हि सति सामर्थ्ये संपूर्णफलेच्छया विचारस्यावसरः प्राप्तः । स च विचारो द्विविधः । अर्थतो लक्षणतश्चेति तथाचोक्तं स्थाणुरयं भारहारः किलाभूदित्यादिना । तथा च लक्षणं योऽनवेत्यृक्षु न कर्मफलभाग्भवेत् । लक्षणज्ञो हि मन्त्राणां सकलं भद्रमश्नुते इति, तस्मात्तावत्पूर्वं लक्षणमु-

---

(१) इदं प्रथमप्रश्नीयशिक्षायामस्ति अत्र तत्प्रयोगार्थं एव श्रेति पाठान्तरम्बोध्यम् ॥

र्थोऽक्षरं मात्रा, दैवं योगार्षमेव च। मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे इति" सर्वशास्त्रादौ नमस्कारं करोत्याचार्यः यथा स्वयंभुवे ब्रह्मणे विश्वयोनये यथा च सर्वात्मानं विश्वसृजं स्वयंभुवं यथा च पितृदेवर्षिसाध्येभ्य इति, अतः अत्रापि शौनकाचार्यो भगवान् शास्त्रादौ नमस्कारं चकार अविघ्नार्थं च। परावरे इति च॥

परावरे ब्रह्मणि यं सदाहुर्वेदात्मानं वेदनिधिं मुनीन्द्राः।
तं पद्मगर्भपरमन्वादिदेवं प्रणम्यर्चां लक्षणमाह शौनकः॥ १॥

परं च अवरं च परावरं ब्रह्म, परं च अवरं च परावरं ब्रह्म, परं नाम मनसाध्यानगम्यं सदसदात्मकं वेदान्तेषु यदुच्यते यदेतद्धृदयं मनश्चेत्यादि, तथा च। महापुरुष इति यमवोचामेत्यादि, ततो ज्योतिरजतं प्राह यद्योगात्समुपाश्नुत इति, "स ब्रह्मामृतमत्ययोनि सदसतोः ध्रुवं [illegible] विश्वे सन्ति ज्योतिरुत्तममिति च"। अवरं तु पुनः अक्षरम्। यदुपांशुध्वनिनादो यदृषि मन्द्रमध्यमोत्तमस्थानेषु जपादिकर्मसु यत्प्रयुज्यते शब्दा-

ज्ञानमिक्तिमीलइत्यादि। तदुक्तम् "द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति"। शब्दब्रह्मज्ञानपूर्वकं परब्रह्मज्ञानम्। तन्निष्पत्तये ब्रह्मणि यं वेदब्रह्माख्यं सदा सर्वदा धाजुर्वेदंति कुशादिभिः स्तुवन्ति विचारयन्ति। मीमांसन्ते एतत्सर्वं बहुवच्छन्दसा महदुक्ते मीमांसन्त इत्यर्थः। कश्यादृमुनीन्द्राः मुनिप्रधाना ऋषयो मन्त्रद्रष्टारः। कैर्नामभिरित्युच्यते, वेदात्मा वेदनिधिः पद्मगर्भः परमं चादिदेवइत्येवमादिभिः। वेदानां आत्मा वेदात्मा वेदाइति विद्यते ज्ञायते लभ्यते वा एभिर्धर्मादिपुरुषार्थाइति वेदाः। मन्त्रब्राह्मणयोर्वेदनामधेयं, तत्र ह्यव्यभिचारेण तत्स्वरवर्णमात्रापूर्वकः पाठः सर्वकालं सर्वदेशेषु। प्रतिचरणमविभक्तोनैकैको मन्त्रराशिर्वेदइत्युच्यते, आत्मा "अत सातत्यगमने" सततं सर्वदा सर्वदेशे सर्वकाले च भोक्तृत्वेन कर्तृत्वेन च अतति गच्छतीत्यात्मा तं वेदात्मानं, वेदनिधिं वेदानां निधिः वेदनिधिः वेदानां स्थानमित्यर्थः, जनयति पोषयति च। तथाच व्यासः। सृष्ट्यादौ ब्रह्मणो वेदा मुखेभ्यश्च विनिर्गताः। तत्रैव च स्वयं यान्ति प्रलये समुपस्थिते-इति, तं वेदनिधिं पद्मगर्भं पद्मगर्भः पद्मगर्भः पद्मगर्भोद्भूतत्वात्। तथाच "विष्णोर्जले शयानस्य नाभेः पद्मं समुत्थितम्। तस्मिन्ब्रह्मा समुत्पन्नस्तेन इदं चराचर-

मिति" तं पद्मगर्भं, परमं स एव देवानां प्रथमं यमे देवा यममाहुरित्यर्थः । तं परमं तु शब्दो विशेषणार्थः । आदिदेवमिति स एव हि आदौ उत्पन्नः । पश्चादन्ये देवा इति देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा, तमेवं गुणविशिष्टं ब्रह्माख्यं प्रथमं प्रणामान् कृत्वा प्रकर्षेण नमनं प्रणमनम् नमस्कारं कृत्वेत्यर्थः, ततः किं कृतवानित्युच्यते ऋचां लक्षणमाह शौनकइति परिमिताक्षरपादार्धर्चविहिता मन्त्राः । तथाचोक्तं । यः कश्चित्पदवाक्यान्यो युक्ताक्षरसंपदा, स्वरयुक्तोऽवसानेन तामृचं प्रतिजानतइति, लक्षणम् च स्वरवर्णाक्षरमात्राइति आह ब्रवीति वदति उच्चारयतीत्यर्थः । शौनकआचार्यो भगवान् शुनकस्यापत्यं शौनकः । नामग्रहणम् स्मरणार्थम् । "यावदस्मिंल्लोके पुरुषः पुण्येन कर्मणा श्रूयते तावदयं स्वर्गे लोके वसतीतिश्रुति." तथाचोक्तं, दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणाम् । यावत्स शब्दो भवति तावत्पुरुषउच्यते इतियथा महिदासऐतरेयआहेति यथा च मनुराह प्रजापतिः । ऋचां लक्षणमाहेतीयमाचार्यस्य प्रतिज्ञा, यत ऊर्ध्वं यदुच्यते तत्सर्वमृचां लक्षणम् वेदितव्यं संहिता पदप्रकृतिरित्येवमादि तत्सर्वं ऋचां लक्षणम्, वेदितव्यं यथा आग्न्याधेयप्रभृतीन्याह वैतानिकानि यथाच गृह्याणि वक्ष्यामइति प्रतिज्ञा करोति तथा सर्वत्र वेदि-

तव्यं, एवं शास्त्रादौ नमस्कारं प्रतिज्ञां च कृत्वा शास्त्रप्रयोजनमाह । माण्डूकेयः संहितामित्यादि तथाच "सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् । यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यतामिति" माण्डूकेयआचार्यो भगवान् संहितायां द्यावापृथिव्योः संहितां वायुमाह ब्रवीति, "अथातः संहितायाउपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेयइति" तथाऽऽकाशं वास्यमाण्डव्यएव तथा तयोरेव द्यावापृथिव्योराकाशं च संहितामस्योपासनस्य माण्डव्यो नामाचार्यइच्छति चशब्दाद्वायुं च समानतामनिले चाम्बरे च मत्वाऽऽगस्त्यो विपरिहारं तदेवाह समानतां समाने तुल्ये एते संहिते अनिले चाम्बरे च एवं मत्वाआगस्त्यः अगस्त्यपुत्रः विपरिहारं दत्तवान् तदेव नान्यदिति-विविधः परिहारो विपरिहारः । अविपरिहारं मत्वा अपरित्यक्तो वायुराकाशे तस्मै अध्यात्मकृप्तौ शूरवीरसुतश्च वाङ्मनसयोर्विवदन्त्या,ऽउत्पूर्वे अध्यात्मकृप्तौ शूरवीरः अध्यात्मविषये कृप्तिः कल्पना प्राणः संहिता शूरवीरोनामाचार्यस्तस्य सुतश्च विवदन्ति विवादं कुरुतः । वाङ्मनसयोरानुपूर्व्ये क्रमे । कथं अध्यात्मं वाक्पूर्वरूपं मनउत्तररूपं प्राणः संहितेत्येकः अपरस्तद्विपरीतमाह । मनः पूर्वरूपं वागुत्तररूपमिति एवमथातः संहितायाउपनिषदित्यस्यार्थः सूचितः । तस्य प्रयोजनं वि-

त वक्ष्यति, पूर्वमक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण सा संहितेति, तत्र पृथिव्यां दृष्टिर्दृष्टेः फलं तत्फलप्राप्तिः स्यादिति, वक्ष्यति च स य एवमेतां संहितां यो वेदेति, अथेदानीं संहितापदक्रमस्वरूपमाह "सन्धेर्विवर्तनं निर्भुजं वदन्ति शुद्धाक्षरोच्चारणं च प्रतृण्णम् उभयमन्तरेणोभयं व्याप्तमन्ये परे च नानाकोभयाख्याः । निर्भुजसंहिताध्ययनमुच्यते, सन्धेर्विवर्त्तनं द्वयोः पदयोरक्षरयोर्वा सन्धिर्मध्यमवकाशोऽन्तरमित्यनर्थान्तरं तस्य सन्धेर्विवर्तनं । अविच्छेदाध्ययनं तन्निर्भुजं वदन्ति आचार्याः पाठकाः । द्विविधा-संहिता, अक्षरसंहिता, पदसंहिता च, यथाक्षरग्रहणमुपलक्षणं वर्णयन्ति सन्धिविहृत्वा तु निर्भुजं वदन्तीति केचित्पठन्ति अर्थस्तु स एव शुद्धाक्षरोच्चारणं च शुद्धे द्वे अक्षरे पदे वा सन्धिमकुर्वता उच्चारणं अभिव्याहरणं तत्प्रतृण्णं, प्रतृण्णं पदाध्ययनमुच्यते उभयं व्याप्तं संहिता च पदं च केनेत्याह, उभयमन्तरेण क्रमाध्ययनेन उभयव्याप्तं स्थितं वेदितव्यं यद्धि सन्धिं विवर्तयति तन्निर्भुजस्य रूपं, अथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्य रूपमग्र उ एवोभयमन्तरेणोभय व्याप्तं भवतीति उभयमन्तरेणोभयं व्याप्तमग्रेइति केचित्पठन्ति स एवार्थः । अग्रे प्रथममेव क्रमात् अनेन व्याप्तं भवतीति वेदितव्यं, तथा परे कामा अत्र नानाकोभया-

स्याः । पराः कामा ये उक्ताः अन्नकामः नाककामः स्वर्गकाम इत्यर्थः । उभयकाम अन्नकामः स्वर्गकामश्च तथा चोक्तं, अन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेणेति, एतत्सर्वं विज्ञेयमिति वाक्यशेषः । प्राणः षकारे बलं शकारे यत्र, तच्च विज्ञेयं प्राणस्य षकारः सञ्ज्ञाः' । षकारः प्राण आत्मेतिश्रुतेः" । सबलां सप्राणां संहितां वेदायुष्यमिति विद्यात् । बलं शकारः । शकारेण बलवती संहिता, वायोर्हि प्राणस्य बलवत्वं कार्यं, स्पृष्टकरणं षकारः प्राण आत्मा, तथा चोक्तं, ये ऊष्माणः सप्राण इति, तथा षकाराख्येन बलेन बलवती षकारश्च स्पर्शः स्पृष्टं करणं कर्त्तव्यमित्यर्थः । तथा चोक्तं "त्यस्यै वा एतस्यै संहितां वेदायुष्यमिति विद्यादिति' तथा च" ते यद्वयमनुसंहितमृचो धीमहे, यच्च मांडूकेयीयमध्यायं प्रब्रूम इति" मांडूकेयीयमिति कथमित्युच्यते, अथ वै वयं ब्रूमो निजवक्ताः स्म इति तस्मात्, ह्रस्वो मांडूकेयः पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपेऽन्तरेण येन सन्धिं विवर्तयति, येन स्वरात्स्वरं विजानाति येन मात्रामात्रां विभजते सा संहितेति, स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन न सर्वमायुरेतीति प्रशंसा वाक्प्राणयोश्च होमः परस्परं, तच्च विज्ञेयं, वाचि

प्राणो हूयते प्राणे च वाग्घूयते । तथाचोक्तं "तद्यत्रैतदधीते वा भाषते वा वाचि तदा प्राणो भवति वाक्तदा प्राणं रेढि, अथ यत्र तूष्णीं वा भवति स्वपिति वा प्राणे तदा वाग्भवति प्राणस्तदा वाचं रेढि । तथाच किमर्था वयमध्येष्यामहे, किमर्था वयं यक्ष्यामहे, वाचि हि प्राणं जुहुमः प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययइति, एवं च संहितोपनिषद्धि योऽर्थः स एवाचार्येण प्रदर्शितइति विज्ञापनार्थं, तस्य किल तत्प्रयोजनं वेदे योऽर्थोऽभिहितः स एव शास्त्रे प्रतिपन्नइतिज्ञापनार्थं च, यथा अथाप्यृचउदाहरन्ति यथा चाग्न्याधेयप्रभृतीन्याह वैतानिकानीति यथा" शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोरिति" कथमितिचेत् यदुच्यते वैदिककर्मानुष्ठानात्पुरुषनिःश्रेयसार्थफलावाप्तिरेव वैदिकः सिद्धान्तः । तत्र विध्यर्थवादाः श्रूयन्ते निन्दाप्रशंसापृटाख्याताऽसाराभीक्ष्णसंप्रश्नसंशयाइति तदुक्तं "विधिर्निंदा प्रशंसा च पृटमाख्यातमित्यपि । असाराभीक्ष्णसंप्रश्ना ब्राह्मणे संशयश्च यइति" यस्मात्केवलैर्वेदवाक्यैर्न शक्यतेऽनुष्ठातुं छिन्नत्वाद्वेदवाक्यानां गूढार्थत्वाच्च, अतः कविभिराचार्यैर्वेदार्थकुशलैर्वेदार्थेभ्यो निष्कृष्य कर्मार्थं सुबोधानि इमानि विद्यास्थानानि प्रवर्तितानि, शिक्षा कल्पो व्याकरणं निरुक्तञ् छन्दो ज्योतिषं धर्मशास्त्रम् पुराणं न्यायविस्तरो मीमांसादीनि,

कानि पुनः प्रयोजनानि विद्यास्थानानामनुप्रक्रांते अत आह, शिक्षा स्वरवर्णोच्चारणोपदेशकं शास्त्रम्, कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्, व्याकरणं च शब्दार्थव्युत्पत्तिकरं शास्त्रम्, निरुक्तम् पदविभागमन्त्रार्थदेवतानिरूपणार्थं शास्त्रम्, छन्दो गायत्र्यादीनां छन्दसां ज्ञानशास्त्रम्, ज्योतिषं कालपरिज्ञापनार्थं शास्त्रम्, धर्मशास्त्रमाचाराद्युपदेशकं शास्त्रम्, पुराणं स्थित्युत्पत्तिप्रलयादिसूचकं शास्त्रम्, न्यायविस्तारः प्रमाणैरर्थपरीक्षणं करोति शास्त्रम्, मीमांसा वेदवाक्यार्थविचारणाय शास्त्रम्, इत्येवमादीनि प्रयोजनानि विद्यास्थानानां अतआचार्यो भगवान्शौनको वेदार्थवित् सुहृद्भूत्वा ब्राह्मणेभ्योऽर्थवादानुत्सृज्य विधिं समाहृत्य पुरुषहितार्थमृगवेदस्य शिक्षाशास्त्रम् कृतवान् इतिप्रदर्शनार्थं वर्णयन्ति अन्यथा वेदार्थो नशक्षयेत्स्यात्, तथाचोक्तम् "न प्रत्यक्षमनृषेरस्ति मन्त्रइति" यथाच" योगेन दाक्षिण्येन दमेन बुध्या बाहुश्रुत्येन तपसा नियुज्यत" इति प्रसङ्गाद्बहु लपितमिदानीं प्रकृतमुच्यते, गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च। लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः, स्वरितोदात्तनीचत्वं श्वासो नादस्तथोभये। वर्णानां गुरुत्वं चाधिक्यं हि यथा गुरूणि दीर्घाणीत्येवमादि, तथा साम्यं समत्वमित्यर्थः। ह्रस्वत्वं दीर्घत्वं लोपश्च, आगमश्च विकारश्च, वर्णानां

लोपो यथा चित्कंभनेन स्कभीयानिति, आगमः । अस्कतोषमिति, विकारः । सुषुमायातमिति, प्रकृतिः । प्रकृत्येतिकरणादौ प्रगृह्याइति यथा प्रो अस्मै, इन्द्राग्नी अपादियमिति, विक्रमः क्रान्तः प्राज्ञतोपधइति, याः फलिनीः । अगस्त्यः खनमानः क्रमश्च वेदितव्यः । यथा स्वरानुस्वारोपहितः इति,द्वित्ववर्णानां यथा आप्रद्रवपरावतः । स्वरितत्वं उदात्तत्वं नीचत्वं अनुदात्तत्वमित्यर्थः । यथा उदात्तश्चानुदात्तश्चेत्यादि, श्वासत्वं,नादत्वं,तथोभयत्वं,श्वासनादत्वं,श्वासो घोषाणामित्येवमादि, एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता, एतत्सर्वं यदनुक्रांतं माण्डूकेयः संहितामित्येवमादि, तत्सर्वं विज्ञेयं विविधं वेदितव्यमित्यर्थः, केनेत्यतआह छन्दोभाषां योऽधीते नेत्यर्थः । नान्यन द्विविधा हि भाषा लौकिकी वैदिकी च, या वैदिकी सा छन्दोभाषेत्युच्यते, "यथाचोक्तं लोकवेदयोरिति"। विज्ञेयमितिसर्वत्रानुषज्यते पुरस्तादुपरिष्टाच्च । छन्दोज्ञानमाकारं । भूतज्ञानं छन्दसा व्याप्तिं स्वर्गामृतप्राप्तं । छन्दसां ज्ञानंछन्दोज्ञानं यथा गायत्र्यादि । तथा छन्दसामाकारं श्वेतादि । भूतज्ञानं छन्दसां यथा सर्वाणि भूतानि मनोगतिश्चेत्यादि । तथा छन्दसां व्याप्तिं । यथा गुर्वक्षराणां गुरुवृत्तिसर्वमित्यादिस्वर्गप्राप्तिं चामृतप्राप्तिं च स्वर्गामृतत्वप्राप्तिः यथा "स्वर्गं जयत्येभिरथामृतत्वमि-

त्यादि" । तच्च विज्ञेयं यस्मात् तस्मात् । अस्य ज्ञानार्थं इदमुत्तरञ्च वक्ष्यते, शास्त्रम् अखिलं शैशरीये । अस्य कस्य मांडूकेयः संहितामित्येवमादेरनुक्रांतस्य शास्त्रार्थं ज्ञानप्रयोजनार्थेत्यर्थः । इदं शास्त्रम् पार्षदाख्यं अखिलं संपूर्णं कृत्स्नं उत्तरग्रन्थे वक्ष्यामइत्यर्थः । शैशरीये पारायणपाठे इतिवाक्यशेषः । शैशरीयायां संहितायामित्यर्थः । शैशरीया संहिता तद्दृष्टत्वात् । तथा पुराणे उक्तं । मुद्गलो गोखलो वात्स्यः शारीरः शिशिर"स्तथा । पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाइति । तथा च । ऋग्वेदे शैशरीयां संहितामिति, यथा ऋग्वेदे पारणाम्नाये शाकल्ये शैशरीयकमिति च, पदक्रमविभागज्ञो वर्णक्रमविचक्षणः । स्वरमात्राविशेषज्ञो गच्छेदाचार्यसंपदं । पदानां क्रमः पदक्रमः । अनुपरिपाट्या संहिता, पदसंहिता वर्णसंहिता च, वर्णानां क्रमोवर्णक्रमः । वर्णसंहिता विचक्षणइत्यर्थः । अथवाऽन्यथा योजना । पदानां क्रमस्य च पदाध्ययनस्य च विभागो विविधो भागो विभागः । एवं यो जानाति स च पदक्रमविभागज्ञः वर्णक्रमविचक्षणइति संहिताध्ययनविचक्षणइत्यर्थः । एवमध्ययनत्रितयं च प्रकृतं निर्भुजं प्रतृण्णं उभयमुत्तरं च तस्मादेवमुच्यते । स्वरमात्राविशेषज्ञः । स्वराश्च मात्राश्च स्वरमात्राः । स्वरा उदात्तादयः । मात्रा ह्रस्वादयः । एवं विशेषं योजा-

नाति संगच्छेद्व्रजेत्। संगच्छेदित्युच्यते। आचार्यसंपदम् आचार्यत्वं कुर्यादित्यर्थः। अन्यथा अधिकार्यैव न भवति। तथा चोक्तं याजनाध्यापनाभ्यामच्छन्दसा यातयाम च। "स्थाणुं वर्छति गर्त्तं वा पात्यते प्रमीयते वेत्यादि" तथा चोक्तम्। "बटवः पण्डिता मूर्खा अन्योन्याध्यापकाश्च ये। दोषं कुर्वंति ते मूढास्तस्माद्वृद्धं तु सेवयेदिति"। अथवा गच्छत्याचार्यसंसदमिति पाठः। गच्छति व्रजति प्राप्नोति आचार्याणां संसदं सभास्थानम् सुमंत्वादय आचार्या यत्र तिष्ठंति तत्रेत्यर्थः एवं वृद्धप्रशंसा। यथा ऋङ्मयो यजुर्मयः साममय इति। यथा च स य एवमेतां संहितां वेदेति। एवं शास्त्रप्रयोजनमुक्त्वा शास्त्रसंव्यवहारार्थं वर्णक्रमार्थं चाक्षरसमाम्नायमाह ॥

अकारऋकाराविउएओऐऔ ॥

अकारश्च ऋकारश्च अकारऋकारौ। अऋ इति अथ इकारश्च उकारश्च एकारश्च ऐकारश्च औकारश्चेति। इउएऔ इति एवमनेन क्रमेणाष्टौ वर्णा वेदितव्याः ॥

पदाद्यंतयोर्न लृकारः स्वरेषु ॥

पदस्य आदौ अन्त्ये च लृवर्णः स्वरेषु न गृह्यते। पदमध्ये भवतीति वेदितव्यं। उत्तरत्रापि विचारयिष्यामः ॥

आकारादीन्दीर्घरूपान्द्वितीयान्ह्रस्वेषु ॥

अकारादयो ह्रस्वा उक्ताः तेषु तेषु ह्रस्वेषु आकारादयो दीर्घरूपाः । तान्द्वितीयान्विजानीयात् । किमुक्तं भवति । अकारो ह्रस्वः तस्य आकारो दीर्घो द्वितीयः । तथा ऋकारो ह्रस्वस्तस्य ॠकारो दीर्घो द्वितीयः । तथा इकारो ह्रस्वः तस्य ईकारो दीर्घो द्वितीयः । तथा उकारो ह्रस्वः । तस्य ऊकारो दीर्घो द्वितीयः । अआऋॠइईउऊइत्येतत्सिद्धं भवति ॥

पञ्चस्वपि तानि सन्ति ॥ २ ॥

तानि कानि दीर्घाणीत्यर्थः । पञ्चस्वपि ह्रस्वेषु द्वितीया भवन्ति किं पुनश्चतुर्षु । अपि शब्दो लृकारस्य विकल्पार्थः । यदि दीर्घो वर्त्तते । वक्ष्यति ऋकारलृकाराविति । तथा ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णाविति ॥

कखौ गघौ ङः ॥

ककारस्य खकारस्य कखौ । तथा गकारस्य घकारस्य गघौ । ङकारश्च कखगघङः । एवं पञ्चभिर्वर्णैः प्रथमः पञ्चवर्गो वेदितव्यः ॥

चछौ जझौ ञः ॥

चकारश्च छकारश्च चछौ । जकारश्च झकारश्च जझौ । ञकारश्च चछजझञः, एवं पञ्चभिर्वर्णैर्द्वितीयः पञ्चवर्गः ॥

टठौ डढौ णः ॥

टकारश्च ठकारश्च टठौ । डकारश्च ढकारश्च डढौ णकारश्च टठडढणः एवं पञ्चभिर्वर्णैस्तृतीयः पञ्चवर्गः ॥

तथौ दधौ नः ॥

तकारश्च थकारश्च तथौ । दकारश्च धकारश्च दधौ नकारश्च तथदधनः एवं पञ्चभिर्वर्णैः चतुर्थः पञ्चवर्गः ॥

पफौ बभौ मः ॥

पकारश्च फकारश्च पफौ । बकारश्च भकारश्च बभौ मकारश्च पफबभमः एवं पञ्चभिर्वर्णैः पञ्चवर्गः ॥

यरलवाः ॥

यकारश्च रेफश्च लकारश्च वकारश्च यरलवा एते चत्वारो वेदितव्याः ॥

हशषसाः ॥

हकारश्च शकारश्च षकारश्च सकारश्च हशषसाः एते चत्वारः अनेन क्रमेण वेदितव्याः ॥

अः ᳵकः ᳶपः अम् ॥

अ इति विसर्जनीयः । ᳵक इति जिह्वामूलीयः, ᳶप इत्युपध्मानीयः, । अं इत्यनुस्वारः । एवमपरे चत्वारः अनेन क्रमेण वेदितव्याः ॥

इतिवर्णराशिक्रमश्च ॥ ३॥

इत्येवमुक्तक्रमेण प्रकारेण वर्णराशिर्वेदितव्यः । अकाराद्यनुनासिकान्तः । वर्णानां राशिः सङ्घातः समूहः वर्णकोशः वर्णसमाम्नायइत्यनर्थान्तरं । वर्णक्रमश्च अयमेव वेदितव्यः । उक्तप्रकारेण । वक्ष्यति । ऋकारादयो दशनामिनः स्वराइति । तथा परश्चैकारमोजयोः, ओकारं युग्मयोरिति । अन्त्याः सप्त तेषामघोषाइति । तथा प्रथमपञ्चमौ च द्वावूष्मणां इत्येवमादिष्वयं क्रमो वेदितव्यः ॥

इति श्रीदेवमित्रसुतविष्णुमित्रकृतेप्रातिशाख्ये वर्गद्वयवृत्तिः ॥

एवं वर्णसमाम्नायमुक्त्वा तत्र लघुनोपायेन सञ्ज्ञापरिभाषाभ्यां शास्त्रे संव्यवहारसिद्धिं मन्यमानः सञ्ज्ञासञ्ज्ञिसम्बन्धार्थमाह । अष्टौ समानाक्षरमित्यादि । इतिपरावरं ब्रह्मणीत्यारभ्य सकलदेशीयवैदिकैः पठ्यमानस्य वर्गद्वयस्य व्याख्या । अथ भाष्य-

म् । नमो भगवते मङ्गलेश्वरश्रीमद्दिव्यलक्ष्मीनृसिंहाय । श्रीवेदपुरुषाय नमः ॥

अष्टौ समानाक्षराण्यादितः ॥ १ ॥

किमर्थमिदमारभ्यते । शिक्षाछन्दोव्याकरणैः सामान्येनोक्तलक्षणः तदेवमिह शाखायामिति शास्त्रप्रयोजनं । प्रातिशाख्यप्रयोजनमनेन श्लोकेनोच्यते । शिक्षादिभिर्यत्सामान्येनोत्सर्गेणोक्तम् लक्षणम् । यथा तावच्छिक्षायां "स्युर्मूर्द्धन्या ऋटुरषाः" । सामान्येन सर्वशाखासु रेफो मूर्द्धन्य इत्युक्तः । तथाऽन्यस्यां शिक्षायां दन्तमूलीय उक्तः । एवं सर्वाः शिक्षा वर्णेषु स्थानकरणानुप्रदानादि सर्वासु शाखासु विदधाति । न तु नियमतः । कस्यां शाखायां रेफो मूर्द्धन्यः कस्यां दन्तमूलीय इति । अत एतद्व्यवस्थापकमारभ्यते । दन्तमूलीयस्तु तकारवर्गः । सकाररेफलकाराश्च रेफं वर्त्स्यमेके । एवमस्यां शाखायां दन्तमूलीयो वा वर्त्स्यो वा रेफ इत्येतदवधारितम् । तथा सर्वैश्छन्दोविचित्यादिभिः पिङ्गलयास्कसैतवप्रभृतिभिर्यत्सामान्येनोक्तम् लक्षणम् । तथा षट्सप्तत्यक्षरा जातिधृतिर्भवति । तथाच तत्रैवोक्तं । (१)"अत्तः" । "इत्यादिपूरणः" एवं सामान्यलक्षणे "सखिसचि प्रब्रूं न मारुतमिति" जातिच्छन्दसि प-

---

(१) पिङ्गलाचार्यकृतच्छन्दःसूत्रे स्तः ॥

टापधायां क्वचि सन्देहः किमियं षट्पदाक्षरा भक्तिः पादानामविकर्षणम् । आकारोकारादीनां विकर्षणमितिधृतिः । अस्मिन् सन्देहे इदम् विशेषलक्षणमारभ्यते । “सर्वेषां पादिपदस्य मध्यमो वर्णउच्यते” । इत्येवमस्यां शाखायां पादविकर्षणातिधृतिरियं तथा व्याकरणे यत्सामान्येन । यथा “ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति” । अस्यार्थः । ऋग्विषये तु नु घ मक्षु तङ् आख्यातानि निपातमायतइत्येवमादीनि तङ्शब्देनगृह्यन्ते कुत्र उरुष्याणामेतानि व्यञ्जने परे दीर्घमापद्यन्ते, तु यातून इन्द्र, घशा वायो अग्निं । मक्षूमक्षूरा शुहि इत्यादि तद्व्यवस्थापयितुमिदमारभ्यते । न सर्वैवैतानि पदानि अस्यां शाखायां दीर्घी भवन्ति, यथा, तु नस्तुप्रयः प्रजया, नु अभियोधानुमुन्वते, घ आधत्वावांतमनाम्नः । ननु मक्षुशब्दस्य सामान्यलक्षणेनैव दीर्घभावउक्तः । नचापवादोऽस्ति तत्र ह्येवं पठ्यते, “मक्षुवित्युकारः प्लवते सर्वथाऽप्यपवादभाक्” अतो मक्षुशब्दस्य ह्यम्यं प्रयोजनं नैषदोषः,, सामान्यलक्षणानुवादेनैव विशेषलक्षणम् विधातुं शक्यते नान्यथा सोऽयं मक्षुशब्दस्यानुवादो द्रष्टव्यः । एवमन्यत्रापि सामान्यविशेषलक्षणसाम्ये परिहारोद्रष्टव्यः । एवंविधाछन्दोव्याकरणैर्यत्सर्वासु शाखासु सामान्येन लक्षणमुच्यते तदेवास्यां शाखायामनेन व्यवस्थाप्यत इत्येतस्यैवोपनमत्स्यागस्य तथा “आथर्वणप्रातिशाख्ये” इद-

मेवप्रयोजनमुक्तं “एवमिहेति च विभाषासामान्येन” अस्य सूत्रस्यार्थः । सामान्येन लक्षणेन यद्विकल्पप्राप्तं तदेवं यथा शाखानां व्यवस्थितं भवतीति प्रातिशाख्यप्रयोजनमुक्तं । अथवा नैवैतदर्थं शिक्षाछन्दोव्याकरणैः सामान्येनोक्तलक्षणस्य विशेषव्यवस्थापकं किं तु स्वतन्त्रमेवैतदन्यशास्त्रनिरपेक्षं, तथाहि शिक्षाछन्दोव्याकरणैर्यन्न विहितं तदिह विधीयमानं दृश्यते यथा क्रमः । क्रमहेतुः । पारायणमित्येवमादिकं, अकृता चाशान्यशास्त्रमव्यपेक्षस्य नैव स्यादकृत्स्नत्वात्, कृत्स्नतां वेदाङ्गानां अनिंद्यतामार्षतां च स्वयमेव शौनको दर्शयिष्यति ‘कृत्स्नं च वेदाङ्गमनिंद्यमार्षमिति, अनयोः पक्षयोर्यतरः पक्षः । येनान् ततरोग्राह्यः । उक्तं शास्त्रप्रयोजनं, प्रथमपटले तु संज्ञाः परिभाषाश्चोच्यन्ते, तदर्थमिदमारभ्यते । अष्टौ समानाक्षराण्यादितः । अष्टाविति संख्या, समानाक्षराणीति संज्ञा, आदित इति पञ्चमी पञ्चम्यास्तसिलिति हि वैयाकरणाः पठन्ति, अथ कोऽर्थः । आदित आरभ्य वर्णसमाम्नायस्याष्टावक्षराणि समानाक्षरसंज्ञकानि भवन्ति, यथा अआऋॠइईउऊ समानाक्षरसंज्ञायाः प्रयोजनं,‘समानाक्षरे सस्थान इति’ अथवा आदित इति नैवायं पञ्चम्यर्थे तसिल् किन्तर्हि सप्तम्यर्थे तत्रापि हि लक्षणम् स्मर्यते तसिल्प्रकरणे “आद्यादिभ्य उपसंख्यानमिति” । तत्र चैतान्युदाहरणानि, आदितो स-

ध्यंतः इतत इति यतोऽयं सम्प्रत्यय एव पश्चिमप्रश्ने इव । वर्णसमाम्नायस्यादौ अष्टावक्षराणि समानाक्षरसंज्ञकानि भवन्ति ॥

ततश्चत्वारि संध्यक्षराण्युत्तराणि ॥

ततस्तेभ्यः समानाक्षरेभ्य उत्तराणि चत्वारि संध्यक्षरसंज्ञकानि भवन्ति, अकारस्य इकारेण उकारेण एकारेण ओकारेण च सह सन्धौ यान्यक्षराणि निष्पद्यन्ते तानि तथोच्यते यथा एओऐऔ संध्यक्षरसंज्ञायाः प्रयोजनं, 'संध्यानि संध्यक्षराण्याहुरेक' इति, तत इत्यनयेन पञ्चम्या संध्यक्षराणां समानाक्षरैः सहानन्तर्ये सिद्धे यदुत्तराणीति वदति तदन्तरा लृलॄ इत्यनयोः स्वरयोः प्रतिषेधार्थं तथाच यत्नं करिष्यति । ऋकारादयो दश नामिनः स्वरा इति ॥

एते स्वराः ॥

य एते समानाक्षरसंध्यक्षरसंज्ञका वर्णाः ते द्वादश स्वरसंज्ञा वेदितव्याः । उदात्तानुदात्तस्वरितप्रचया एष्वक्षरेषु स्थिताः, स्वर्यन्ते शब्द्यन्त इति स्वराः । यथा अआऋॠइईउऊएऐओऔ इति । स्वरसंज्ञायाः प्रयोजनं, 'स्वरानुस्वारोपहितो द्विरुच्यत इति, ननु कथं वर्णसमाम्नायमनुपदिश्यैवाष्टौ समानाक्षराण्यादित इति उपदिष्टस्य हि व्यपदेश एवमुपपद्यते आदित इति वक्त

नुपदिष्टस्य तथा चत्वारि संध्यक्षराण्युत्तराणीत्युत्तरव्यपदेशो नैव घटते नैष दोषः । उपदिष्टो वर्णसमाम्नायो लौकिको विद्यते, तत्र यावन्तो वर्णा यस्यां शाखायामुपयोक्ष्यन्ते तावतां संज्ञां कर्तुं तमेव वर्णसमाम्नायमुररीकृत्याहाष्टौ समानाक्षराण्यादितः । तथा तामेवानुपूर्वीमङ्गीकृत्य चत्वारि संध्यक्षराणीति उत्तरग्रन्थमाह, ननु यदि लौकिकोऽत्र वर्णसमाम्नायो गृह्यते एवं तर्हि तयाऽऽनुपूर्व्या भवितव्यं, तत्र च ऋकारात्परौ ॠकारऌकारौ समामनन्ति ऋॠऌ इति तथा ऐकारात्पूर्वमेकारं औकारात्पूर्वमोकारं एऐओऔ इति, सकारात्परं हकारं समामनन्ति शषसह इति । सत्यं, आचार्यप्रवृत्त्या क्रमोऽन्यथाऽनुमीयते तद्यथा ऋकाराद्यो दश नामिनः स्वरा इति, यद्यृकारात्परौ पठ्येते तदानीं दश नामिनः स्वराः संपद्यन्ते, तथा संध्यक्षराण्यर्धैकारि, उत्तरं युजोऽकारादीति, यदि एओऐऔ एवं पाठो भवति तदानीं युजोत्तरमर्धसुकारः समुपपद्यते, तथा यदि सकारात्पूर्वो हः पठ्यते तदानीं हु [illegible] पाठक्रम उपपद्यत इति, सोऽयमाचार्यप्रवृत्त्या पाठक्रमोऽनुमीयमानो लौकिकवर्णसमाम्नायस्य [illegible] पाठं समर्थयति, अतोऽयं लौकिको वर्णसमाम्नायो गृह्यते तथा तयाऽनुपूर्व्या तन्न दुष्करमिति, उभे अप्येते आनुपूर्व्यौ लौकिकस्य वर्णसमाम्नायस्य

स्य ह्रस्वे ॥

इपरो दीर्घवत् प्लुतः ॥

इकारपरः प्लुतो दीर्घवत्प्रत्येतव्यः सर्वसादृश्यार्थः । यथा इकारइतिना सह सन्धौ दीर्घमेकमीकारं निरनुनासिकमापद्यते, तथाऽयमपि प्लुत ईकारं निरनुनासिकमापद्यतइत्यर्थः, क्रमसंहितायां परिग्रहस्य पूर्वे वचने ह्रस्वभूतो भवति द्वितीयेऽनुनासिकत्वमापद्य, यथा विन्दतीतिविन्दती ॥ २ ॥

अनुस्वारो व्यञ्जनं वा स्वरो वा ॥

अंइत्यनुस्वारो वर्णसमाम्नाये पठ्यते । स कांश्चित्स्वरधर्मान् गृह्णाति । कांश्चिद्व्यञ्जनधर्मान् । तद्यथा ह्रस्वत्वं दीर्घत्वं प्लुतत्वमुदात्तत्वं स्वरितत्वमिति स्वरधर्माः । तथाऽर्द्धमात्राकालता स्वरयोगेनोदात्तानुदात्तस्वरितत्वं संयोगश्चेति व्यञ्जनधर्माः । तदोभयसंयोगादुभयस्वभावं स्वरव्यञ्जनयोरन्यद्वर्णान्तरं प्रकाशयति । अनुस्वारो व्यञ्जनं वा स्वरो वेति वचनं स्वरूपकथनेन प्रयोजनं । तेन स्वरग्रहणेन च न गृह्यते । अनुस्वारो व्यञ्जनग्रहणेन न गृह्यते । एके वर्णाम्नायलिङ्गावकार्यमित्यत्र वर्णग्रहणेनानुस्वारोऽपि गृह्यतइति । ननु सर्वः शेषो व्यञ्जनान्येवेति व्यञ्जनग्रहणेनानुस्वारग्रहणमस्तु । कोऽणुरिति चेत् । सूत्र-

मेतन्नारभ्यं स्यात्। व्यञ्जनग्रहणेन ग्रहणात्। "सव्यञ्जनः सानुस्वारः शुद्धो वेति"। अनुस्वारो व्यञ्जनं चाक्षराङ्गमिति। संयोगानुस्वारपराणि यानीत्येवमादिसूत्रेष्वनुस्वारग्रहणं न कर्त्तव्यं स्यात्। व्यञ्जनग्रहणेनैव सिद्धत्वात्। स्वरानुस्वारोपहितो द्विरुच्यते, संयोगादिरित्यत्रानुस्वारस्य व्यञ्जनत्वे सत्यपि वचनात्परस्य संयोगादेर्द्विरुक्तिर्भविष्यति ननु अनुस्वारस्यैवेत्येवमनुस्वारस्य व्यञ्जनत्वेन सर्वमभिप्रेतं सेत्स्यति। यतो व्यञ्जनग्रहणेनैवानुस्वारग्रहणं भवतु किमनेन योगेनानुस्वारो व्यञ्जनं वा स्वरो वेति। सत्यमेतत् यदि नामानुस्वारस्य स्वरूपं न कथितं स्यात्। तस्मात्स्वरव्यञ्जनातिरिक्तमन्यद्वर्णान्तरमेतदित्येतत्स्थापनपरमेवैतत्सूत्रमिति सिद्धान्तितम्॥

सर्वः शेषो व्यञ्जनान्येव॥

उपयुक्तेतरवचनः शेषशब्दः स्वरानुस्वारव्यतिरिक्तः सर्वः शेषो वर्णराशिर्व्यञ्जनसञ्ज्ञको वेदितव्यः॥ व्यञ्जयन्ति प्रकटान्कुर्वन्त्यर्थानिति व्यञ्जनानि सर्वशब्दो यमादीनां परिग्रहणार्थः। तेषां यद्यप्यत्र सञ्ज्ञाधिकारे ग्रहणं न कृतं तथापि स्थानाधिकारे ग्रहणं कृतमेव। नासिक्ययमानुस्वारानिति। ऌकारस्य मात्रिकस्य ॡकारस्य प्लुतस्य च सर्वशब्देन ग्रहणं न भ-

विष्यति । स्वरशब्देन ग्रहणात् । यतो स्वरः कल्पयस्मादृकारादिति लृकारस्य स्वरसञ्ज्ञा । तथा तिस्रः प्लुतउच्चारे स्वरूमिति तस्य स्वरसंज्ञा । यतश्च स्वरग्रहणेनैव ग्रहणादव्यञ्जनत्वं भवति । व्यञ्जनान्येवेत्यवधारणं । अनुस्वारस्योभयरूपतामुज्ज्वलयति । व्यञ्जनसञ्ज्ञाप्रयोजनं 'दीर्घं ह्रस्वो व्यञ्जनइति' ॥

तेषामाद्याः स्पर्शाः ॥

तेषां व्यञ्जनानामाद्या वर्णाः । स्पर्शसञ्ज्ञका विदितव्याः । स्पृष्टकरणाः स्पर्शाः । कादयो मान्ताः । स्पर्शसञ्ज्ञाप्रयोजनं, स्पर्शाः पूर्वे व्यञ्जनान्युत्तराणीति ॥

पञ्च ते पञ्चवर्गाः ॥

ते च स्पर्शाः पञ्चवर्गाः पञ्चभिः स्पर्शैर्वर्ग एषामिति पञ्चवर्गाः कियन्तस्ते वर्गा इति पञ्च । तथा कखगघङ चछजझञ । टठडढण । तथदधन । पफबभम । वर्गसञ्ज्ञाप्रयोजनं 'वर्गे वर्गे च प्रथमावघोषौ,इति ॥

चतस्रोऽन्तस्थास्ततः ॥

ततस्तेभ्यः स्पर्शेभ्योऽनन्तराश्चतस्रोऽन्तस्थासञ्ज्ञका वर्णा व्यतायो वेदितव्याः । स्पर्शोष्मणां मध्ये तिष्ठन्तीति अन्तस्थाः, व्यञ्जनान्येवैतानि स्त्रीलिङ्गानि निर्दिष्टानि यथा यरलवाः । अन्तस्थसञ्ज्ञाप्रयोजनं । अन्त-

ष्यासु रेफवर्ज्जं परास्विति ॥

उत्तरेऽष्टाऊष्माणः ॥

अन्तस्थाभ्य उत्तरेऽष्टौ ऊष्माणो वेदितव्याः । ऊष्मा वायुस्तत्प्रधाना वर्णा ऊष्माणः यथा हशषसः कः पः अं इति । ऊष्मसञ्ज्ञाप्रयोजनम् 'तमेवोष्मणामूष्मणीति' । यस्तु चतस्रोऽन्तस्था तत उत्तरे इत्येवं सूत्रमिच्छति तस्य चतस्रोऽन्तस्थास्तत इत्यनयोः पदयोः स्त्रीलिङ्गबहुवचनान्तत्वात् उत्तर इत्यस्य पदस्य पुंलिङ्गबहुवचनान्तत्वात्सम्बन्धो दुर्लभः । अतश्चतस्रोऽन्तस्थास्तत इत्यत्रैव सूत्रच्छेदः ॥

अन्त्याः सप्त तेषामघोषाः ॥

तेषामेवोष्मणामन्त्याः सप्तोष्माणोऽघोषसञ्ज्ञा वेदितव्याः । यथा शषसः कः पअं इति । अघोषसञ्ज्ञाप्रयोजनं 'अघोषे रेफरेफो चेति' ॥

वर्गे वर्गे च प्रथमावघोषौ ॥

वर्गे वर्गे प्रथमद्वितीयौ वर्णौ अघोषसञ्ज्ञौ वेदितव्यौ । यथा कखचछटठतथपफेति । पारिशेष्यादन्यानि घोषवत्सञ्ज्ञानि व्यञ्जनानि ॥

युग्मौ सोष्माणौ ॥

वर्ग इतिवर्त्तते । युग्मौ द्वितीयचतुर्थौ वर्णौ सोष्मा-

णौ वेदितव्यौ । अन्वर्थंचैतज्ज्ञेयं । ऊष्मा वायुस्तेन सहवर्त्तत इति सोष्माणः । यथा । खघछझठढथधफभेति । सोष्मसञ्ज्ञाप्रयोजनं 'सोष्मा तु पूर्व्वेण सहोच्यत' इति ॥

अनुनासिकोऽन्त्यः ॥

वर्गे वर्गे इतिवर्त्तते । प्रतिवर्गमन्त्यो वर्णः अनुनासिकसञ्ज्ञो वेदितव्यः । ङञणनमेति । अनुनासिकसञ्ज्ञाप्रयोजनं' परेषु स्पर्शेष्वनुनासिकेष्विति' इयमन्वर्थसञ्ज्ञा । नासिकां ह्यनु यो वर्णो निष्पद्यते स्वकीयस्थानमुपादाय स द्विस्थानोऽनुनासिक इत्युच्यते । तथाचोक्तं "मुखनासिकावचनोऽनुनासिक इति' ॥

तस्मादन्यमवसाने तृतीयं गार्ग्यस्पर्शम् ॥

ऊष्मान्तस्थासोष्मेत्यत्र प्रथमतृतीयपञ्चमान्स्पर्शान् पदान्तीयान्वक्ष्यति । तत्र प्रथमतृतीयविकल्पार्थमिदमारभ्यते । तस्मादनुनासिकादन्त्यात्स्पर्शादन्यं पदावसाने वर्त्तमानं स्पर्शं गार्ग्यआचार्यः स्वं तृतीयं मन्यते । तथा वाग् । षड् तद् । ककुब् । तस्मादन्यमितिकिं । तान् । तम् ॥

प्रथमं शाकटायनमः ॥

शाकटायनमाचार्यः प्रथमं मन्यते । यथा वाक् । षट् । तत् । ककुप् ॥

ओजा ह्रस्वाः सप्तमान्ताःस्वराणाम् ॥

ओजा विषमाः स्वराणां मध्ये ह्रस्वसञ्ज्ञा वेदितव्याः । सप्तमपर्यंताः यथा अऋइउइति । ह्रस्वसञ्ज्ञाप्रयोजनं 'ह्रस्वपूर्वस्तु सोभारमिति' ॥

अन्ये दीर्घाः ॥

ह्रस्वसञ्ज्ञकेभ्यो येऽन्ये स्वरा दीर्घसञ्ज्ञा वेदितव्याः । यथाआॠईऊएओऐऔइति । दीर्घसञ्ज्ञाप्रयोजनं'दीर्घंह्रस्वौ व्यञ्जनइति' ॥

उभये त्वक्षराणि ॥

येइह ह्रस्वदीर्घसञ्ज्ञाः स्वरा निर्दिष्टाः, यौ च वक्ष्यमाणकौ स्वरौ, धातौ स्वरः कल्पयताऌकारइति तिस्रः प्लुतउच्यते स्वरइति ऌकारई प्लुतौ एते उभये तु अक्षरसञ्ज्ञा वेदितव्याः । यथाअआऋॠइईउऊएओऐऔइति ऌई इति । ननु कस्मात्प्राकृता एव स्वरा दीर्घा ह्रस्वाश्च उभयग्रहणे न नान्तर्भाव्यते, येनामौ व्यवहितावपि ऌकारप्लुतौ उभयग्रहणेनान्तर्भाव्येते इति । शृणु । तन्त्रान्तरे"स्वरोऽक्षर"मिति स्वरमात्रस्याक्षरसञ्ज्ञा विधीयते । अयमपि "सव्यञ्जनः सानुस्वा-

रः शुद्धो वाऽपि स्वरोऽक्षरमिति” स्वरस्याक्षरसञ्ज्ञां विधास्यति । नचाक्षरसञ्ज्ञां विनोदात्तादयः स्वरास्तदाश्रयाः स्युस्तउच्यन्तेऽक्षराश्रयाइतिवचनात् । किं च गुरुलघुपूर्वाङ्गपराङ्गचिन्तामक्षरस्यैवेदानीं वक्ष्यति । तस्मादक्षरसञ्ज्ञाप्राप्त्यर्थं इह लृकारप्लुतौ तूभयशब्देनान्तर्भाव्येते, न तु प्राकृताएव ह्रस्वदीर्घाः स्वरा इति । अक्षरसञ्ज्ञाप्रयोजनं ‘यकाराद्यक्षरं परमिति’ ॥

गुरूणि दीर्घाणि ॥

यानि दीर्घाण्यक्षराणि तानि गुरुसञ्ज्ञकानि वेदितव्यानि । प्लुतस्याप्यत्र ग्रहणं द्रष्टव्यं । यो हि द्विमात्रं गुरु कल्पयति, कल्पयत्येवासौ त्रिमात्रमपीति । यथाआॠईऊएओऐऔइति । गुरुसञ्ज्ञाप्रयोजनं ‘गुर्वक्षराणां गुरुवृत्तीति’ ॥

तथेतरेषां संयोगानुस्वारपराणि यानि ॥

यथा दीर्घाणि गुरुसञ्ज्ञकानि तथेतरेषां ह्रस्वानामक्षराणां यानि संयोगपराणि यानि चानुस्वारपराणि तानि गुरुसञ्ज्ञकानि भवन्ति । सँय्योगपराणि प्रप्रवस्त्रिष्टुभमिति । अनुस्वारपराणि । वसुं रु-

तुं सहसो जातवेदसमिति, त्वं सोमासिसत्पतिः । पारिशेष्यादन्यानि लघुसञ्ज्ञकानि । 'संहितायां लघोर्वु इति' संव्यवहारदर्शनाच्च । ऋषभं मासमानामित्युदाहरणं । नन्वेवं विसर्गपरस्य लघोर्गुरुसञ्ज्ञा न स्यात् । माभूत् । पादमध्ये तु व्यञ्जनपरस्य विसर्गांतस्य संयोगपरत्वादेव गुरुसञ्ज्ञासिद्धेः । इतरत्र त्वस्मिन्ग्रन्थेऽनुपयुक्तत्वात् । यद्वा नः कारे च गुरावपीति ज्ञापकात् विसर्गपरस्यापि लघोर्गुरुसञ्ज्ञासिद्धेरिति ॥

अनुस्वारो व्यञ्जनं चाक्षराङ्गम् ॥

एवमष्टौ समानाक्षराणीत्यादिना वर्णसमाम्नायमनुक्रम्य सञ्ज्ञां च विधाय ततः 'सर्वः शेषो व्यञ्जनानीत्यादिना' व्यञ्जनगताः सञ्ज्ञाः कृत्वाऽनंतरं 'ओजा ह्रस्वाः सप्तमान्ताः स्वराणा'मित्यादिनाऽक्षरगताः सञ्ज्ञाः कृत्वाऽधुनाऽक्षरव्यञ्जनसंनिकर्षे किं कस्याङ्गमित्येतन्निरूपणायाह । अनुस्वारो व्यञ्जनं चाक्षराङ्गं स्वराङ्गमित्यर्थः । अत्र यानि स्वरमध्यगतानि व्यञ्जनानि न भवन्ति । तान्युदाहरणं प्र इत्यत्र पकाररेफावकारस्याङ्गं । वर्क इत्यत्र वकाररेफककारा अकारस्याङ्गं । चक्रं यदित्यत्र ककाररेफानुस्वारा अकारस्याङ्गं । अव्यञ्जनत्वादनुस्वारस्य ग्रहणं । अङ्गसञ्ज्ञाप्रयोजनं यानि यस्य स्वरस्याङ्गभूतानि व्यञ्जनानि तानि तेनैव

स्वरेण समानस्वराणि भवन्ति । तथाचोक्तं । "स्वरउच्चः स्वरो नीचः स्वरः स्वरितएव च । स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरमिति" ॥

स्वरान्तरे व्यञ्जनान्युत्तरस्य ॥

एवं तावद्यत्रैकः स्वरस्तत्र पूर्वाणि पराणि च व्यञ्जनानि तस्यैवांगंभवति । अथ पुनर्यानि स्वरयोर्मध्यगतानि तानि किं पूर्वस्योतोत्तरस्याङ्गमित्यस्मिन् सन्देहे तु इदमारभ्यते । स्वरयोरन्तरे यानि व्यञ्जनानि तान्युत्तरस्यैवाङ्गं भवन्ति । न पूर्वस्य । यथा अयं इति । अयं शब्दस्त्वन्तोदात्तत्वात् यकारउदात्तवत् श्रूयते । अयं देवाय जन्मन इत्यत्र तथैव एकारस्यानुदात्तत्वादक्कारोऽनुदात्तवच्छ्रूयते । यथा गायन्त्विति यकारस्य स्वरितत्वादाकारः स्वरितएव श्रूयते ॥

पूर्वस्यानुस्वारविसर्जनीयौ ॥

स्वरान्तरे वर्तमानौ पूर्वस्य स्वरस्याङ्गं भवतः । यथाऽनुस्वारस्योदाहरणं भवति, वसुं सूनुं सहसः । विसर्जनीयस्य । नृः पात्रम् । न्हः प्रणोचमित्येवमादि ॥

संयोगादिर्वा ॥

संयोगादिभूतो वर्णः स्वरान्तरे वर्त्तमानः पूर्वस्य वा स्वरस्याङ्गंभवति । परस्य वा । यथा हुत्वा रथमि-

ति द्वौ तकारौ वकारश्च संयोगः । तत्र क्रमजः प्रथमस्तकारः पूर्वस्याङ्गं तस्य चोदात्तत्वादुदात्तवच्छ्रूयते । द्वितीयः संयोगादिः पूर्वस्य चोदात्तस्य स्वरस्याङ्गमुत्तरस्य चानुदात्तस्वरस्याङ्गमुदात्तानुदात्तवच्छ्रूयत इत्यर्थः । वकारो द्वितीयस्वरस्याङ्गं तस्य चानुदात्तत्वादनुदात्तवच्छ्रूयते । तथा अग्निमीळे इति द्वौ गकारौ नकारश्च संयोगः तत्र प्रथमो गकारः क्रमजः पूर्वस्य स्वरस्याङ्गं तस्य चोदात्तवच्छ्रूयते । द्वितीयो गकारः संयोगादिः स यमीभूतः पूर्वस्य वा स्वरस्याङ्गं परस्य वा उदात्तसञ्ज्ञितस्य उदात्तानुदात्तवच्छ्रूयते । द्वितीयो गकारः संयोगादिः स यमीभूतः पूर्वस्य वा स्वरस्याङ्गं परस्य वा उदात्तसञ्ज्ञितस्य उदात्तानुदात्तवच्छ्रूयते । नकारो द्वितीयस्य स्वरस्याङ्गं तस्योदात्तत्वादुदात्तवच्छ्रूयते ॥

चपरक्रमेद्वे ॥

चकारो भिन्नक्रमः समुच्चयार्थीयः । परस्य च व्यञ्जनस्य यत्र क्रान्तिर्द्विरुक्तिस्तत्र द्वे व्यञ्जने वा पूर्वस्याङ्गं उत्तरस्य वा । यथा आतृर्त्नी इमे इति, रेफः द्वौ तकारौ नकारश्च संयोगः तत्र ‘स्वरभक्तिः पूर्वभागक्षरागं’ इति-स्वरभक्तिसहितो रेफः पूर्वस्य स्वरस्याङ्गं तस्य चोदात्तत्वादुदात्तवच्छ्रूयते । क्रमजस्तकारः संयोगादिः स यमीभूतः पूर्वस्य वा स्वरस्याङ्गमुत्तरस्य वा । नकार-

स्तु उत्तरस्य स्वरस्याङ्गं तस्य च स्वरितत्वात्स्वरितवच्छ्रूयते, यथा पार्ष्ण्यावेति, रेफः षकारौ द्वौ, षकारो यकारश्च संयोगस्तत्र रेफः स्वरभक्त्या सहितः पूर्वस्वरस्याङ्गं तस्योदात्तत्वादुदात्तवच्छ्रूयते। षकारो पूर्वस्य वा स्वरस्याङ्गं उत्तरस्य वा, संयोगादिर्षकारो यकारश्चोत्तरस्य स्वरस्याङ्गं तस्य स्वरितत्वात्स्वरितवच्छ्रूयते।

मात्रा ह्रस्वः ॥

ह्रस्वस्वरो मात्राकालो वेदितव्यः। यथा अऋइउऌइति ॥

तावदवग्रहान्तरम् ॥

अवग्रहो नानाग्रहैः समासवर्तिनोः पदयोः पृथक्करणं मात्राकालं भवतीत्यर्थः। पुरः। हितं। रत्नऽधातमम् ॥

द्वे दीर्घः ॥

द्विमात्राकालो दीर्घस्वरो वेदितव्यः। यथा आॠईऊएओऐऔइति ॥

तिस्रः प्लुत उच्यते स्वरः ॥

स्वरसञ्ज्ञा प्लुतस्यानेन विधीयते। स च तिस्रो मात्रा भवति ॥

अधः स्विदासी३दुपरि स्विदासी३दर्थे प्लुतिर्भीरिव विंदती३ति ॥

तिस्रो मात्राः प्लुतस्वरो भवतीति प्रतिज्ञाय अधुनोदाहरणैस्तानेव प्लुतान्दर्शयितुमाह । अधः स्विदासी३ दुपरि स्विदासीत् । नत्वाभीरिव विन्दती३, एतेषूदाहरणेषु अर्थे प्लुतिः, अर्धसमाप्ते प्लुतिः, आख्यातस्यान्तस्वरे प्लुतिरित्यर्थः । उदाहरणैरेव त्रित्वस्य सिद्धत्वाद्यत्त्रिग्रहणं करोति तद्विषयापेक्षयैव । स प्रैषसंहिताचतु. षष्ठ्यां त्रिरेव प्लुतो भवतीति, भीरिव ग्रहणं च विशेषग्रहणार्थं अध उपरिशब्दौ विशेषणत्वेनोपादीयेते, किंस्विदासीदित्यत्र प्लुतिर्माभूदिति, भयं विंदति मामिहेत्येवमादि निवृत्त्यर्थम् ॥

स्वरभक्तिः पूर्वभागक्षराङ्गम् ॥

ऋकारवर्णः स्वरभक्तिरुत्तरे वक्ष्यति । सा स्वरभक्तिः पूर्वं रेफं लकारं वा भजते । रेफादुत्तरा रेफसदृशी भवति । लकारादुत्तरा लकारसदृशी भवति । रेफाद्वा लकाराद्वा यस्माद्व्यञ्जनादुत्तरा भवति तत्सहिता सा पूर्वस्य स्वरस्याङ्गं भवतीत्यर्थः । यथा प्रत्यु अदर्शि आर्ष्टिषेणः । वनस्पते शतवल्शो । नारायासो न जल्हवः । अन्वर्थसञ्ज्ञा चेयं । स्वरभक्तिः स्वरप्रकार इत्यर्थः ॥

द्राघीयसी सार्द्धमात्रा ॥

तत्र या दीर्घतरा स्वरभक्तिः साऽर्द्धमात्राकाला भवति । यथा प्रत्यु अदर्शि । कर्हि । वनस्पते शतवल्शो ॥

इतरे च ॥

उक्तकालेभ्यो येऽन्ये वर्णास्ते अर्द्धमात्राकाला भवन्ति । कादीनि व्यञ्जनान्युदाहरणम् ॥

आर्द्धोनान्या ॥

द्राघीयस्याः स्वरभक्तेर्याऽन्या स्वरभक्तिः साऽर्द्धोना भवति । पादमात्रा भवतीत्यर्थः, यथा आर्ष्टिषेणः । वर्ष्यन् ॥

रक्तसञ्ज्ञोऽनुनासिकः ॥

अनुनासिको वर्णो रक्त उच्यते । यस्य वर्णस्यानुनासिकसञ्ज्ञा विहिता तस्यानेन रक्तसञ्ज्ञा विधीयते । यथा अनुनासिकोऽन्त्यः । ङञणनमाः । पूर्वस्थानादनुनासिकः स्वरः । महाँ इन्द्रो नृवत् । यन्नीक्षणं मांस्पचन्याः । रक्तसञ्ज्ञाप्रयोजनं 'रक्तं ह्रस्वं द्राघयन्त्युग्रघोषाः' । 'रक्तो रागः समवाये स्वराणामिति' ॥

संयोगस्तु व्यञ्जनसंनिपातः ॥

व्यञ्जनयोर्मेलकः संयोगो भवति । यथा प्रप्रवक्षिइभमिदं, संयोगसञ्ज्ञाप्रयोजनं 'स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिरिति' ॥

कण्ठ्योकारः ॥

इदानीं वर्णानां स्थानान्युच्यन्ते । कण्ठे भवः कण्ठ्यः । कण्ठस्थानो ऽकारवर्णः प्रत्येतव्यः । 'ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णाविति' वचनात्प्लुतमकारमाकारौ गृह्येते । यथा सञ्ज्ञा स्थानकथने प्रयोजनं । 'निरस्तं स्थानकरणापकर्षे' इति ॥

प्रथमपञ्चमौ च द्वाऊष्मणाम् ॥

प्रथमो हकारः पञ्चमो विसर्जनीयः एतौ चोष्मणां मध्ये कण्ठस्थानौ वेदितव्यौ । ह । अः । द्वाविति पादपूरणः । प्रथमपञ्चमाविति द्विवचनेनैव द्वित्वस्याभिहितत्वात् ॥

केचिदेता उरस्यौ ॥

केचिदाचार्या एतौ हकारविसर्जनीयौ उरस्थानाविच्छन्ति । ह । अः ॥

ऋकारऌकारावथ षष्ठऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः ॥ ८ ॥

ऋकारस्य लृकारस्य षष्ठस्योष्मा जिह्वामूलीयः प्रथमस्य ककारादिवर्गः एते जिह्वामूलस्थाना वेदितव्याः । ऋॠलृᳵकखगघङ । ननु च 'धातौ स्वरः कल्पयता लृकार इति' लृकारस्य स्वरसंज्ञा कृता । 'चाक्लृपे तेन ऋषयो मनुष्या इति' प्रयोगश्च दृश्यते । लृकारस्तु चतुःषष्ट्यां न दृश्यते । अथ किमर्थमुदाह्रियते । नैष दोषः । यथोदकाहारस्य मत्स्याहरणमविरुद्धं । यथा पुष्पाहारस्य फलाहरणमविरुद्धं, एवमेतदपि प्रसङ्गादुच्यते ॥

तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः ॥

एकारस्य चवर्गस्य इकारस्य ऐकारस्य यकारस्य शकारस्य एते तालुस्थाना वेदितव्या, एचछजझञइऐयशाः ॥

मूर्द्धन्यौ षकारटकारवर्गौ ॥

मूर्द्धि स्थाने षकारस्य टवर्गस्य वेदितव्यौ षटठडढणाः ॥

दन्तमूलीयस्तु तकारवर्गः ॥

दन्तमूलस्थानस्तकारवर्गो वेदितव्यः । तथदधनाः ॥

सकाररेफलकाराश्च ॥

सकारादयश्च वर्णा दन्तमूलस्थाना वेदितव्याः । स-

रलका ॥

रेफं वर्त्स्यमेके ॥

एके आचार्या रेफं वर्त्स्यमिच्छन्ति । वर्त्स्ये भवो वर्त्स्यः । वर्त्सशब्देन दन्तमूलादुपरिष्टादुच्छूनः प्रदेश उच्यते । अवकोदन्तमूलीयैरितिदर्शनात् ॥

शेष ओष्ठ्योऽपवाद्य नासिक्यान् ॥

शेषो वर्णराशिः ओष्ठस्थानो वेदितव्यः । क्रमविशेषेण नेत्याह । अपवाद्य नासिक्यान् परिवर्ज्य नासिकास्थानान्वर्णानित्यर्थः, कस्य शेषः । उऊकारौपफबभमवउपध्मानीयश्च इति । के ते नासिक्या इत्यस्यामपेक्षायामाह ॥

नासिक्ययमानुस्वारान् ॥

इति नासिक्याः । कंखंगंघं इति यमाः । वक्ष्यति हि ‘यमः प्रकृत्यैव सदृगिति’ । अं इत्यनुस्वारः एते नासिक्याः ॥

इति स्थानानि ॥

अधिकरणं वर्णानां स्थानशब्देनोच्यते । इतिकरणः समाप्त्यर्थः । कंठ्योकार इत्यत आरभ्य परिभाषितानि तानि स्थानानि वेदितव्यानि ॥

अत्र यमोपदेशः ॥ ९ ॥

कंठ्योऽकार इत्यत आरभ्य यानि स्थानान्युक्तान्यत्र एषु स्थानेषु यमानां स्थानोपदेशः कर्तव्यः । नासिक्यास्तावत्सर्व एव यमा उक्ताः । द्वितीयं तु प्रकृत्याश्रयं यत्स्थानं तदर्थमिदमुक्तं, तच्च भवद्व्यवान्तरं भवति । पलिक्नीरित्यत्र ककारस्वरूपो यमः, चख्नथुरित्यत्र खकारस्वरूपो यमः, जग्मतुरित्यत्र गकारस्वरूपो यमः । जघ्नुरित्यत्र घकारस्वरूपो यमः । वक्ष्यति । 'यमः प्रकृत्यैवसहगिति' । एवं विंशतिर्यमा वर्गरूपाणां भवन्ति स्वरूपैश्चत्वार एव, तदुत्तरत्र यमलक्षणे विचारयिष्यामः । डकारस्य पूर्वोक्तस्थानापरितोषात्स्थानान्तरं प्रतिपादयितुमाह ॥

जिह्वामूलं तालु चाचार्य आह स्थानं डकारस्य तु वेदमित्रः ॥

अधस्तनं स्थानमुपसंहरन्नाह । आचार्यो वेदमित्रो जिह्वामूलं तालु च डकारस्य स्थानमाह । कोऽन्यथा ब्रवीति । आचार्यग्रहणं पूजार्थम् ॥

द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः ॥ १० ॥

ळ्हकारतामेति स एव चास्य ढकारः

सन्नूष्मणा संप्रयुक्तः ॥

इळा साळ्हा चात्र निदर्शनानि वीड्वंगइत्येतदवग्रहेण ॥ ११ ॥

स एवोष्मस्थानो डकारोऽस्य आचार्यस्य मतेन द्वयोः स्वरयोर्मध्यं प्राप्य ळकारभावं याति । किं च स एव डकारो हकारेणोष्मणा संप्रयुक्तः सन् अस्येवाचार्यस्य मतेन ढकारे तथासति स एव ढकारः ळ्हकारतां याति । अस्यार्थस्पष्टत्वात्, स्वयमेवोदाहरणानि दर्शयति । इळासाळ्हा चात्र यथासङ्ख्येन ळकारळ्हकारयोरुदाहरणं । इळां देवीः, मरुद्भिरुग्रः पृतनासुसाळ्हा । बहुवचनमत्र वक्ष्यमाणोदाहरणापेक्ष्यं । वीड्वंगइत्येतदुदाहरणमवग्रहेण सह भवति । वनस्पवीळु । अङ्गः । स्वरयोरिति किं । वन॑स्पते वीड्व॑ङ्गः । मीढ्व॑स्तो॒काय॒ तन॑याय ॥

न्यायैर्मिश्रानपवादान्प्रतीयात् ॥

न्याया उत्सर्गाः महाविषया विधयः । अपवादा अल्पविषया विधयः । तानुत्सर्गैर्मिश्रानेकीभूताञ्जानीयात् । अपवादविषयं मुक्त्वोत्सर्गाः प्रवर्तन्त इत्यर्थः । स्पर्शाः पूर्वं व्यञ्जनान्युत्तराण्यास्थापितानामवग्रहमं तत्स्थिविषयमुत्सर्गः । घोषवत्पराः प्रथमास्तृतीयान्-

त्यपवादः, एष स्य स च स्वराश्च पूर्वे भवन्ति व्यञ्जनमुत्तरं यदेभ्य इत्युत्सर्गः । अस्य स्वयमेवापवादमाह । सामवशा इति चैवापवादाननुलोमानामन्वक्षरसन्धीनामपवादानिति ॥

सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम् ॥

सर्वं च तच्छास्त्रं च सर्वशास्त्रं तस्यार्थः तं सर्वशास्त्रार्थं उत्सर्गत्वेन पुरस्तात्तस्यैवापवादत्वेन प्रतिकण्ठमुक्तं जानीयात् । प्रतिकण्ठशब्देन निपातनमुच्यते । तद्धि कण्ठं कण्ठमिव प्रतिसंगृह्य एकैकस्यैव प्रदृश्यते । नू इत्थाते इत्यनन्वित्या इति प्राप्ते क्षैप्रसन्धेरपवादो दीर्घत्वं च निपात्यते । परीतो षिञ्चतेति, इतः सिञ्चतेति प्राप्ते विसर्जनीयस्य सोपधस्यौत्वं निपात्यते । परस्य च षत्वम् ॥

स्थानप्रश्लेषोपदेशे स्वराणां ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ

कण्ठ्याकार इत्यादि स्थानोपदेशः । समानाक्षरे सस्थान इत्यादि प्रश्लेषोपदेशः । एतस्मिन्नुभयरूपे स्वराणामुपदेशे सति यत्र ह्रस्वस्वरस्यादिश्यते तत्रोभावपि ह्रस्वदीर्घौ सवर्णौ प्रत्येतव्यौ । कण्ठ्योऽकार इत्युक्तेः ह्रस्वदीर्घावपि गृह्येते । उपलक्षणार्थं चैतत् । तथाहि । अथः दिवोदासोदित्यादीनां प्लुतानां चानुक्तार्थं

भवतीति । तथा हृकारोदयएकारमकारः सोदयस्तथेत्युक्ते ह्रस्वदीर्घावपि गृह्येते । स्थानप्रश्लेषोपदेशप्रवृत्तिकं । 'ह्रस्वपूर्वस्तु सोकारमिति' ह्रस्वएव गृह्यते ।

असावमुमिति तद्भावमुक्तं यथांतरम् ॥

असाविति प्रथमानिर्दिष्टस्य ग्रहणं, अमुमिति द्वितीयानिर्दिष्टस्य । यत्रासौ वर्णो अमुमित्येव वक्ष्यति । तत्र तद्भावमुक्तं जानीयात् । तदित्यनेन द्वितीयानिर्दिष्टं परामृश्यते । तेन रूपेण भवनं तद्भावः स च प्रथमानिर्दिष्टस्य भवति । तं च तद्भावं यथान्तरं जानीयात् । यो यस्यान्तरः संनिकृष्टस्थानकरणानुप्रदानैः स तस्य भवति । यथा समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरमिति । तत्रायं असावमुमिति तद्भावमुक्तमिति द्वावकारौ दीर्घमेकं स्वरमापद्यते । तच्च यथान्तरमिति कृत्वा आकारमेवापद्यते । मधु उदकं मधूदकं । अत्र असावमुमिति तद्भावमुक्तमिति, द्वावुकारौ दीर्घमेकं स्वरमापद्यते । तं च यथान्तरमिति कृत्वा ऊकारमेवापद्यते । न्यायैर्मिश्रानपवादानित्यत आरभ्य परिभाषासूत्राण्येतानि ॥

पादवच्चैव प्रैषान् ॥

होता यक्षदग्निं समिधा सुसमिधेत्यादयः प्रैषास्तान्पादतुल्यलक्षणान् जानीयात् । कस्तु यजुर्लक्षणं त-

ष्प्रैषेष्वपि भवतीत्यर्थः । तद्यथा नकार अकारोपध इत्यनेन ककारलोपः पदृक्तिषु विहितः स प्रैषेष्वपि भवति । होता यक्षदिन्द्रं हरिवाँ इन्द्रो धानाइति । इन्द्राग्नी छागस्येत्यत्र छकारो दीर्घेण समेतिवर्जमिति वचनाच्छकारस्य द्वित्वं च न भवति ॥

प्राक्चनार्षादितिकरणात्पदान्तांस्तद्युक्तानाम् ॥

पदान्तान्पदादिभिः सन्दधदिति दत्संतिसंहितालक्षणं वक्ष्यति । न च पदान्तपदाद्योर्लक्षणमनुक्त्वा संहितालक्षणं वेदितुं शक्यते । तत्र पदादयो ज्ञायन्त एव । पदान्ता अपि ये इतिकरणरहिताः । ये च सेतिकरणास्ते सन्दिह्यन्ते । अतस्तत्र लक्षणमाह ॥ प्राक्पूर्वेण अनार्षादितिकरणात् । अवैदिकादितिकरणात् पदान्तान्जानीयात् । कथंभूतानां । तद्युक्तानां तेनानार्षेणेति करणेन युक्तानां सम्बद्धानां । प्रातरिति । सोमं देवं, भारितिभाः । अत्र विसर्जनीयः पदान्तः न तु रेफः ऊष्मान्तस्थसोष्मचकारवर्गीयाणां तं यान्त्यन्यत्र विसर्जनीयादिति वचनात् । अनार्षादितिकरणादिति किं, यः प्राणिति ॥

तेन येऽसंहितानाम् ॥

यत्रेतिकरणो विद्यते न तु पदान्तेन संसृष्टस्तत्रायं

विधिरुच्यते । तेनार्षेणेतिकरणेनासंहितानामसम्बद्धानां पदानां ये पदान्तास्त एव पदान्ता वेदितव्याः । इन्द्राग्नी इति । पत्नी इति । इन्द्राग्नीइत्यपादियं । प्रातरितिसोमं । इत्येवं संहिता मा भूदिति ह्यारम्भः ॥

सामवशा इति चैवापवादा न कुर्वंति ये सम्पदं पादवृत्तयोः ॥

सामवशान् सन्धीननुपरिष्टाद्वक्ष्यति । यथादिष्टं सामवशः समन्धिरिति । तान् सामवशान् सन्धीननुलोमानामन्यतरसन्धीनामपवादभूतान् जानीयात् । अन्वर्थसञ्ज्ञा चेयं । समस्य भावः सामं "प्राणभृज्जातिवयो वचनोद्गात्रादिभ्यो ऽञिति" उद्गात्रादित्वादञ् । छन्दसां समत्वं वशः प्रयोजनं येषामन्यतरसन्धीनां ते सामवशाः सन्धयः छन्दसां संपत्करा इत्यर्थः । अतएवमाह । कुर्वंति ये सम्पदं पादवृत्तयोः । कतरौ तौ पादस्य वृत्तौ गुर्वक्षरप्रपञ्चो लघ्वक्षरप्रपञ्चश्च । ताभ्यां च प्रपञ्चाभ्यां गायत्र्यादयः पादा वर्तंते । अतः पदस्य तौ वृत्तौ । पादवृत्तस्य सम्पदं कुर्वंति । नार्थान्तरं कुर्वन्ति । "मक्षूमक्षूकृणुहि गोजितो न" इत्युदाहरणानि ॥

अप्रत्याम्नाये पदवच्च पद्यान् ॥

पदान्तादिष्वेव विकारशास्त्रमिति वक्ष्यति । ननु त-

त्यन्तेषु प्राप्नोति । अतस्तस्यापवादार्थमाह । प्रत्याम्नायः पुनर्वचनं । असतिपुनर्वचने पदवत्पद्यान् जानीयात् । त्वा ऊतासः, त्वोतासोन्यर्वता । उकारोदयऊकारान्निति पदसन्धिषु वक्ष्यति । पद्येष्वपि तद्भवति । अप्रत्याम्नाय इति किं । वसोरिन्द्र वसुपतिमिति षष्ठं चाष्टाक्षरमिति ष्टुतिः प्राप्ता । विग्रह इति पुनर्वचनान्न भवति । किमेतावानेवापवादो नेत्याह ॥

ऋते न तोपाचरितक्रमस्वरान् ॥

ऋते विहाय परित्यज्य न तं उपाचरितं क्रमं स्वरञ्च । अन्यत्र पदवत्पद्यान् जानीयात् । इह तु पदस्य यत्कार्यं विधीयते तत्पद्यस्य न भवति । न ते सुदीतिभिः, सुदीदिहि, पदकार्यं पद्येऽपि स्यात्, भिः शब्देनावग्रहान्तरेणोपहितत्वात्स्ववग्रहान्तरेणेति सुशब्दस्य षत्वं स्यात् । यदङ्ग गोपतिः स्यां । यदि पदकार्यं पद्ये स्यात् अत्रापि पदादयस्य स्वितीतिपतिशब्देनावग्रहान्तरेणोपहितत्वात् स्वितिपदादेः षत्वं स्यात् । णत्वे तूदाहरणं नास्ति । उपाध्यायस्तु पितृयाणं इत्युदाहरति । पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य पदवत्त्वानिति पदभावाद्भिन्नपदवत्त्वान्नतिर्न प्राप्नोति । ततो ऋते न तदित्यनेन प्राप्यत इत्यनेनाभिप्रायेण । एतदासत् ॥ यत्र च सामान्येन पदस्य कार्यं विधीयते

तच्च पदवत्पद्यानित्यनेन पद्येष्वपि प्राप्यते तत्प्राप्तं 'सहते नल'इत्यनेन पुनर्निषिध्यते । सोऽस्यापवादस्सूत्रस्य विषयः । अत्र तु स्वयमेव सूत्रकारोऽवोचत् । 'ऋकाररेफषकारानकारसमानपदेऽवगृह्ये नमन्ति । अन्तःपदस्थमिति । अतएतदसदुदाहरणं । उपाचरितः । पथस्पथः परिपतिं । अत्रापि पदकार्यं यदि पद्येषु स्यात्पथस्पथइत्यत्रोपाचरितो न स्यात् भिन्नपदत्वात् । अन्तः पदं तु सर्वत्रैवोपाचरितइत्यनेनान्तःपदस्तुपाचरितो विधीयते । अतः पदवद्भावः उपधानामुपाचरिते निषिध्यते । निरवकाशोऽयमन्तः पादविधिरिति चेन्न । अञ्जस्या इव । दुष्प्राप्यो वहन्ता । त्वं हि राधस्पतइत्येवमादिषु समापाद्योपाचरितेषु स्यात् । अत्र हि विक्रान्तसन्धिरेव भवति । न तु खण्डनं । क्रमः । सुतसोमा अहर्विदः । अत्र यदिपदवत्पद्याः स्युः "क्रमो द्वाभ्यामभिक्रम्येति' द्वाभ्यां पदाभ्यां स्यात् । स्वरः । पुरोहितमितिपुरः । हितम् । अत्र पुरः शब्दस्यान्तोदात्तस्य हितशब्दोऽनुदात्तो मात्राकालव्यवहितः । तत्र पदवद्भावे सति पूर्वमन्तोदात्तंपश्यमनपेक्षयैव हितशब्दोऽनुदात्तः स्यादतः स्वरग्रहणं । ननु यथा 'सेवीयमानानामि'त्यनेनावग्रहस्य स्वरं वक्ष्यति एवं तर्हि स्पष्टार्थं स्वरग्रहणम् ॥

अष्टात्राद्यानवसाने प्रगृह्यानाचा-

याँ आहुरनुनासिकान्स्वरान् ॥

अष्टौ स्वरानाद्यानकारादीनाचार्या अप्रगृह्यान् अवसाने अनुनासिकान् ब्रुवन्ति । ईड्यो नूतनैरुत । इन्दवो वामुशन्ति । आद्यानिति किं । अग्ने । शतक्रतो । अवसान इति किं । न निमिषति सुरगणः । अप्रगृह्यानिति किं । सुतानां वाजिनीवसू ॥

तत्त्रिमात्रे शाकला दर्शयन्त्याचार्यशास्त्रापरिलोपहेतवः ॥

तदेतदनुनासिक्यं त्रिमात्रे स्वरे शाकल्यऋषिमतानुसारिणो दर्शयन्ति । अत्र हेतुमाह । आचार्यशास्त्रमनेनैकेन प्लुतेनानुनासिकेन सता अस्माकमपरिलुप्तं यथा स्यादिति । नत्वा भीरिव विंदती३ ॥

ऋकारादयो दश नामिनः स्वराः ॥

ऋकारादौ कृत्वा दश स्वरा नामिसञ्ज्ञा वेदितव्याः । नमयन्ति दन्त्यं सन्तं मूर्द्धन्यं कुर्वन्तीति नामिनः । ऋॠइईउऊएऐओऔ इति । नामिसञ्ज्ञाप्रयोजनं 'अन्तः पादं नाम्युपधः सकार' इति ॥

पूर्वोनन्तानातिषु नम्यमुत्तरम् ॥

ऋकाररेफषकारा नकारं नमन्तीति वक्ष्यति तत्र

पूर्वं ऋकारादय उत्तरे वा अतस्तद्व्यवस्थार्थमाह । पूर्वोऽनन्त्यानतिषु नम्यमुत्तरं । नतिषु वर्तमानानां वर्णानां पूर्वोऽनन्त्यो वर्णो भवति । नम्यं व्यञ्जनमुत्तरं भवति । यथा मनुप्रविद्वाग्निपट्टयाणां । पूर्वोऽनन्त्येति किं, अर्वाचमश्वय्यं नृवाहणां । ऋकारात्पूर्वस्य नकारस्य नतिर्माभूदिति । नम्यमुत्तरमिति किं । ऋकारादुत्तरस्य वाहनं नकारस्य नतिर्यथा स्यात् इति ॥

सहोपधो रिफित एकवर्णवद्विसर्जनीयः स्वरघोषवत्परः ॥

अरिफितो विसर्जनीय उपधासहित एकवर्णवदवगन्तव्यः । स्वरपरो घोषवत्परश्च सन् स्वरपरः । य इन्द्र सोमपातमः । 'ह्रस्वपूर्वस्तु सोकारमिति' सोपधस्याकारः । घोषवत्परः । नमो भरन्त एमसि । ऊधारं, ह्रस्वपूर्वमिति सोपधस्यौकारः । अरिफित इति किं । पुनर्द्यौर्देवी पुनरन्तरिक्षं ॥ स्वरघोषवत्पर इति किं । यस्तिग्मशृङ्गो वृषभो न भीमः ॥

ओकार आमन्त्रितजः प्रगृह्यः ॥

ओकार आमन्त्रिताज्जातः प्रगृह्यसञ्ज्ञो भवति । इन्द्रो इति । विष्णो इति । प्रगृह्यसञ्ज्ञाप्रयोजनं । 'प्रकृत्येतिकरणादौ प्रगृह्या' इति । एतच्च सूत्रं स्वार्थ-

मभिधायोत्तरसूत्रेषु प्रगृह्यसंज्ञामधिकरोति । अतोऽधिकारसूत्रमेवैतत् । ननु अधिकारसूत्रं परार्थं भवति । एतत्तु स्वार्थमभिधाय परार्थं भवति । अथ कथमधिकारसूत्रमेतदिति । नैष दोषो गुणोऽयं शास्त्रकृतो यदनेनैव सूत्रेण स्वार्थमभिधत्ते अधिकारं च करोति । अतोऽधिकारसूत्रमेवैतदिति । "आह च, उभयार्थं परार्थं वा सूत्रं स्यादाधिकारिकम् । संज्ञासूत्रं परार्थं स्यात्पारिभाषिकमेव च" । "परिभाषां च संज्ञां च कार्यकालं प्रचक्षते । अधिकारः कृतो यत्र ततोऽन्यत्र न गच्छति" ॥

पदं चान्यः ॥

आमन्त्रितमङिन्नतादोकारादन्यओकारः पदं ओइति सोऽपि प्रगृह्यसंज्ञो भवति । ओह्विवर्तते रथ्येव चक्रा ॥

अपूर्वपदान्तगश्च ॥

पूर्वपदान्तगस्य यओकारो न भवति स प्रगृह्यसंज्ञो भवति । पूर्वपदोत्तरपदव्यपदेशस्य समासएव भवत्यतोऽयमर्थः । पूर्वपदस्यौकारस्य प्रगृह्यसंज्ञा न भवति अन्यत्र सर्वत्र भवति । यँास्वोनुदाष्टविर्भरध्यै । एषो उषा अपूर्व्या । अपूर्वपदान्तग इतिकिं । यदहं गोपतिः स्याम् । कुवित्सु नो गविष्टये । नन्वनेनैवसूत्रेणाध-

स्तनयोः सूत्रयोर्विषयः सूचितः । एवंतच्चैवस्तनाभ्यां सूत्राभ्यां अस्यैव सूत्रस्य प्रपञ्चः कृतः, ते वैविधयः सङ्गृहीतव्या येषां लक्षणं प्रपञ्चश्च ॥

षष्ठादयश्च द्विवचोन्तभाजस्त्रयो दीर्घाः ॥

षष्ठादयश्च त्रयो दीर्घाः स्वरा द्विवचनाभिधायिनः प्रगृह्यसञ्ज्ञा भवन्ति । इन्द्राबृहस्पती वयं । इन्द्रवायू इमे सुताः । द्वे विरूपे चरतः स्वर्थे । द्विवचोन्तभाज इति किम् । अग्नऽआयाहि वीतये ॥

साप्तमिकौ च पूर्वौ ॥

एतेषामेव त्रयाणां वर्णानां मध्ये यौ पूर्वौ दीर्घौ स्वरौ तौ प्रगृह्यसञ्ज्ञौ भवतः सप्तम्यर्थाभिधायिनौ चेद्भवतः । दृतिं न शुष्कं सरसी इति । सरस्यामिति प्राप्ते छान्दसः सप्तम्यर्थ ईकारः । सोममिन्द्र चमू सुतम् । चम्वामिति प्राप्ते सप्तम्यर्थ ऊकारः । स्वाया तनू ऋत्व्ये । सोमो गौरी अधिश्रितः । स्तीर्णं राये सुभरं वेदी । साप्तमिकाविति किं । पीत्वी सोमस्य वावृधे ॥

अस्मे युष्मे त्वे अमी च प्रगृह्याः ॥

अस्मे युष्मे त्वे । अमी इत्येते च ईकारैकाराः प्रगृ-

ह्यसञ्ज्ञा भवन्ति । अस्मे । अस्मे आवहतं रयिं । युष्मे । न युष्मे वाजबन्धवः । त्वे । त्वे इहूयते हविः । अमी । अमी ये पञ्चक्षणः । प्रगृह्यसञ्ज्ञाधिकारे पुनः प्रगृह्यग्रहणं ईकारस्य एकारस्य च सप्तम्यर्थनिहत्यर्थम् ॥

उपोत्तमं नानुदात्तं न पद्यम्

अस्मे युष्मे इत्यादीनां यदुत्तमस्य पदस्य समीपे पदं तदनुदात्तं वा पद्यं सत्प्रगृह्यसञ्ज्ञं न भवति । ओह ब्रह्माणो विचरन्त्यु त्वे । त्वं तमग्ने अमृतत्व उत्तमे ॥

उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितः शाकलेन ॥

अपृक्तश्च उकारः प्रगृह्यसञ्ज्ञो भवति स च इतिकरणेन युक्तः । रक्तोऽनुनासिको दीर्घश्च भवति । शाकलेन मतेन । ऊइति । अपृक्तइति किं स्वितिसु । इतिकरणेन युक्तइति युक्तवचनमितिकरणात्परस्याप्युकारस्यदीर्घत्वं रक्तत्वं च भवति । ऊँइत्यूँ । आर्ष्यां च संहितायां इतिकरणायोगात् । रक्तत्वं दीर्घत्वं प्रगृह्यसञ्ज्ञत्वं च न भवति । अवेहिन्द्रजल्गुलः ॥

ऊष्मा रेफी पञ्चमो नामि पूर्वः ॥

पञ्चम ऊष्मा विसर्जनीयः । नामिपूर्वः सन्रेफि-

सञ्ज्ञो भवति । अ॒ग्निर॑स्मि॒ जन्म॑ना । पूर्वीरहंशरदः । रेफिसञ्ज्ञाप्रयोजनं 'सर्वोपधस्तु स्वरघोषवत्परो रेफं रेफी'॥

महोऽयो वर्जमितरो यथोक्तम्

महः मयः इत्येते पदे वर्जयित्वा उक्तादन्य इतरः अनामिपूर्वो यः पञ्चम ऊष्मा विसर्जनीयः स यथोक्तं वक्ष्यमाणं तथा रेफिसञ्ज्ञो भविष्यतीत्येतदधिकृतं वेदितव्यं । मयर्मह इन्द्र । अयस्कः । इत्येते वर्जयित्वा । ननु कस्मादनयोः पदयोः पुरस्तादपवादः क्रियते, एते हि पदे वक्ष्यमाणानां पदानां विशेषणाभिप्रायेण पठ्यते । नैतत् । यथाभूतं च इतरेषां विशेष्यभूतानां पदानां रूपं तथाभूतमनयोरपि पदयोः । तेषामथनामिपूर्वो विसर्जनीयः । यथा च तेषां तथा अनयोरपि पदयोः मयर्मह इत्यत्र निपातनाशंका न कर्तव्येति । एवं तर्हि आचार्यः किमर्थं पुरस्तादपवादं करोति । अत्र ब्रूमः । यदेवमनेन प्रकारेण दुःप्रतिपाद्यत्वमस्यार्थस्यायं तावत्प्रधानभूतो दोषः । अन्यच्च ग्रन्थगौरवभयाद्दुष्टशिष्येण, तन्नोदितं महोऽयो वर्जमित्यनयोः पदयोः पुरस्तादपवादो न कर्त्तव्य इति । तच्च ग्रन्थगौरवमनेन प्रकारेण प्रतिपाद्यतः सुतरामपरिहृतमेवास्ते अतोऽयं लाघविकमाचार्यः परस्तादपवादं च

क्ते । मह्नोऽर्योवर्जमिति ॥

अन्तोदात्तमन्तः ॥

अन्तरित्येतत्पदं अन्तोदात्तं सद्रेफिसञ्ज्ञं भवति । अन्तरिच्छन्ति तं जने । अन्तोदात्तमिति किं । इयं वेदिः परोऽन्तः पृथिव्याः ॥

अह्ना विपर्यये ॥

अहरित्येतत्पदं अवग्रहस्य स्वरविपर्यये सति रेफिसञ्ज्ञं भवति । अन्तोदात्तं वाऽवग्रहपदन्तस्वरविपर्ययेऽनुदात्तं वाऽऽद्युदात्तं वा भवति । अनुदात्तम् । अनूपे गोमानोऽभिरक्षः । आद्युदात्तं यदहारतिदेवयुः विपर्यय इति किं । न्यह्ना अह्नावनुदीव आसन् ॥

स्पर्शे चोषः प्रत्यये पूर्वपद्यः ॥

उषरित्ययं पूर्वपद्यः सन् स्पर्शे प्रत्यये रेफिसञ्ज्ञो भवति । उषर्बुधमावह । उषर्भुद्भूदतिथिः । स्पर्श इति किं । उषउषो हि वसो । पूर्वपद्य इति किं । उषो मघोनि । प्रातः प्रातरित्येतत्पदं रिफितसञ्ज्ञं भवति । प्रातरग्निं प्रातरिन्द्रं हवामहे ॥

देवं भाः ॥

भारित्येतत्पदं रिफितसञ्ज्ञं भवति देवमित्येतत्पदं पूर्वं चेत् । देवं भाः परावतः । देवमिति किं । बृहद्

मा विश्वतो हविः ॥

वधराद्युदात्तम् ॥

वधरित्येतत्पदं आद्युदात्तं चेद्रिफितसञ्ज्ञं भवति । वधर्जघान तविषीभिरिन्द्रः । आद्युदात्तमिति किं । आरे गोहा नृहा वधो वो अस्तु ॥

करनुदात्तम् ॥

करित्येतत्पदं रिफितसञ्ज्ञं भवति अनुदात्तं चेत् । निकाव्या वेधसः शश्वतस्कः । अनुदात्तमिति किं । को अध्वर्यो देवकामः ॥

अविभः ॥

अविभरित्येतत्पदं रिफितसञ्ज्ञं भवति । पितेव पुत्रमविभरुपस्थे ॥

तद्दादः ॥

आदरित्येतत्पदं तदित्येतत्पूर्वं चेद्रिफितसञ्ज्ञं भवति । दिवस्परि सुग्रथितं तदादः । तदिति किं । अदो यद्दारु प्लवते ॥

स्तः प्रागाथम् ॥

स्तरित्येतत्पदं प्रागाथं चेद्रिफितसञ्ज्ञं भवति । मा वस्तरभिमातये । प्रागाथमिति किं । नास्य ते अ-

ष्विमानं परिष्टः ॥

एतशे कः ॥

करित्येतत्पदं एतशे पूर्वं चेद्रिफितसञ्ज्ञं भवति । पुरः सतीरुपरा एतशे कः । एतशइति किं । कोऽद्यमर्यः । कोऽनुदात्तमुक्तमुदात्तार्थं आरम्भः ॥

दिवे कः ॥

करित्येतत्पदं रिफितसञ्ज्ञं भवति दिवे पूर्वं चेत् ॥ महे यत्पित्र ईरसं दिवे कः । दिवइति किं । को अद्य ॥ उदात्तार्थमारम्भः ॥

अयस्कः

करित्येतत्पदं रिफितसञ्ज्ञं भवति अयइत्येतत्पूर्वं चेत् । इन्द्रस्य योनेः प्रदिवोऽपस्कः । अपइति किं । कोऽवस्नाता । उदात्तार्थं आरम्भः ॥

अत्साः ॥

अत्सारित्येतत्पदं रिफितसञ्ज्ञं भवति । लोपाशः सिंहं प्रत्यञ्च मत्साः ॥

अविपूर्वमस्तः ॥

अस्तरित्येतत्पदं रिफितसंज्ञं भवति विपूर्वं न चेत् । वज्रेण हि वृत्रहा वृत्रमस्तः । अविपूर्वमिति किं । पुरुत्रा वृत्रो अशयद्व्यस्तः ॥

स्वः स्वरितम् ॥

स्वरित्येतत्पदं रिफितसञ्ज्ञं भवति स्वरितं चेत् । स्वर्यद्दिदि सुदृशीकमर्कैः । स्वरितमिति किं । यो नः स्वोअरणा ॥

न समासाङ्गमुत्तरम् ॥

स्वरित्येतत्पदं समासस्योत्तराङ्गं सद्रिफितसञ्ज्ञं न भवति । यः पृश्निणीश्च प्रस्वश्च धर्मणा । उत्तराङ्गमिति किं । मादयस्व स्वर्णरे ॥

स्वरादेशोऽपूर्वपदेषु ॥

योऽयं स्वरादेशः अन्तोदात्तमन्तर्वधराद्युदात्तं स्वः स्वरितं इत्यादेशः स अपूर्वपदेष्विति । पूर्वपदेषु न भवत्येतदुक्तं भवति । यदि पूर्वपदानि भवन्ति तदान्यस्वरानुदात्ताद्युक्तान्यपि रिफितान्येव भवन्ति । अन्तर्वावत् चय दधे । वर्धयंती वज्रभ्यः । स्वर्जिदंजित्पवते ॥

अवर्महः ॥

अवरित्येतत्पदं रिफितसञ्ज्ञं भवति । मह इत्येतस्मात्पदात्पूर्वं चेत् । अवर्मह इन्द्र दादृहि । मह इति किं । अवो बभूथ शतमूते ॥

अनर्द्धर्चान्ते स्वरघोषवत्परमूधः ॥

ऊधरित्येतत्पदं स्वरघोषवत्परं रिफितसंज्ञं भवति । अहर्चोन्तं न धेत् । प्रक्षणाय कण्वाऽपिन्वतो घर्मतं । ऊधर्न गोनां स्वाद्मा पितूनाम् । अनर्ह्चोतद्इति किं । सकृच्छुक्रं दुदुहे पृश्निरूधः । स्वरघोषवत्परमिति किं । पृथिव्यामतिषितं यदूधः ॥

न रेफेऽरुषासोऽतृणन्मही ॥

रेफादौ पदे परभूते अरुषास अतृणन्मही इत्येतेषु परभूतेषु च ऊधः शब्दो रिफितसंज्ञो न भवति । रेफे । समूधो रोमशं हतः । विष्टंतयूधो अरुषासो अस्य । मुच्च्यूधो अतृणन्नगवाः पृश्निर्यदूधो महीजभार ॥

वरवरावरिति चैकपादे व्यपपूर्वाण्यसमासांगयोगः ॥

वः अवः आवः इत्येतानि पदानि रिफितसंज्ञानि भवन्ति । कथंभूतानीत्यत आह । एकस्मिन्पादे यदि वि अप इत्येवं पूर्वाणि भवन्ति । यदि च उभयोरपि समासाङ्गयोगो न भवति । यदि च वः अवः आवः इत्येतानि पदानि समासाङ्गभूतानि न भवन्ति । विअपि इत्येते च पदे यदि समासांगभूते न भवत इत्यर्थः । वः गृणानो अङ्गिरोभिर्दस्म विवरुषसा । योगा उदाजदपहिवलं वः । अव । विज्योतिषा सबृहत्वत्तमोऽवः ।

अपावरद्द्विवो बिलं । आवः व्यावर्द्दिव्यामतिं । अपदुहस्तमं आवरजुष्टं । एकपादिति किं । अभैष्मापतदुच्छत्वनेह सोवः । व्यपघूर्णोति किं । को वस्त्राता । माऽहृणीनामवोऽस्तु । आवो यहृस्युइत्येकुत्सपुत्रं । असमासांगइति किं । अपावरद्द्विवो बिलं । असमासांगयोगइत्युभयार्थं कस्मात् । विद्युन्नतश्चौ मरुतो रथेषु वः ॥

पथ्यामघोनीदिवि चक्षसा मदेपूर्वोर्चिषातीतृषामोत्तरेषु न ॥२६॥

पथ्या । मघोनी । दिवि । चक्षसा । मदे । पूर्वः अर्चिषा । अतीतृषाम । इत्येतेषु परभूतेषु, वः अवः, आवइत्येतानि पदानि रिफितसञ्ज्ञानि न भवन्ति । पथ्या । व्युषा आवः, पथ्या३ जनानां । मघोनी अथो अवेदंव्यावोमघोनी । दिवि । व्युषा आवो दिवि जा ऋतेन । चक्षसा । वियदावश्चक्षसा सूर्यस्य । मदे यज्ञाय स्तीर्णबर्हिषे द्विवोमदे । पूर्वः, स्तुतान्यो अस्मद्युजते विद्यावऽपूर्वः । अर्चिषा । व्यु षाश्चन्द्रामघावोऽर्चिषा । अतीतृषामनापाभूतनवोतीतृषाम । एतेषूत्तरेषु किं । विश्वुर्यी रोदसी चक्षसावः ॥

होतः सनितः पोतर्नेष्टः सोतः सवि-

तर्नेतस्त्वष्टः॥ मातर्जनितर्भ्रातस्त्रातरस्थातर्जरितर्धातर्धर्तः ॥ २७ ॥

होतः । सनितरित्यादीनि षोडशपदानि रिफितसञ्ज्ञकानि भवन्ति । होतः, यथा होतर्मनुषोदेवतातः, सुसनितरुग्रः, पोतर्यजे ति । प्रैषिषं ग्नावो नेष्टः पिबऽऋतुना, ज्यैष्ठेन सोतरिन्द्राय, विश्वानि देव सवितः । ते ते देव नेतः । शिवस्त्वष्टरिहागहि । पितर्मातर्यदिहोप । बोधि प्रयन्तर्जनितर्वसूनां । इन्द्रत्रातरभयजाते, पथैं भोजिष्ठत्रातरवित । स्वभिस्थातर्हरीणां । प्रबोधय जरितर्जारमिन्द्रं । धातर्विधातः कलशाँ अभक्षयं । धनानां धर्त्तःस्वसा ॥

जामातर्दुहितर्दर्त्तः प्रशास्तरावितः पितः ॥ दोषावस्तरवस्यर्त्तः प्रयन्तश्चेङ्ग्यमुत्तमम् ॥ २८ ॥

जामातः प्रभृति प्रयन्तः पर्यंतान्येतानि पदानि रिफितसञ्ज्ञानि भवन्ति । किमविशेषेण सर्वाणि पदानि नेत्याह । इङ्ग्यशब्देनसावग्रहं पदमुच्यते । उत्तमं पदं सावग्रहं भवति तदानीं रिफितसञ्ज्ञं भवति । त्वष्टुर्जामातरद्भुत । प्रावाद्य दुहितर्दिवः । पुरान्दर्त्तः

पायुभिः प्रशास्तर्यजेति प्रैषिकं ॥ योनिष्ठ भ्रातरवितः पितर्मतिर्यदिहोप । होर्षावस्तर्धियावयं । अवस्मात्तर्धिवक्तारमस्मयु । बोधि प्रयन्तर्जनितर्वसूनां । इत्यव्ययमुत्तममिति किं । उपप्रयन्तो अध्वरम् । प्रयन्तपदमत्र नावगृह्यते अतो रिफितं न ॥

दीर्घरभारवरीवरदर्दर्दरदर्द्धरजागरजीगः॥वारपुनःपुनरस्यरकस्यःसस्वरहः सनुतःसवरस्वाः॥ २९॥

दीर्घः, अभाः, अवरीवः, अदर्दः, दर्दः, अदर्द्धः, अजागः, अजीगः, वाः, अपुनः, पुनः, अस्यः, अकः, स्यः, सस्वः, अहः, सनुतः, सवः, अस्वाः, । इत्येतानि रिफितसञ्ज्ञानि भवन्ति । आमासु पक्वं प्राच्यानि दीर्घः । इषमूर्जं सुक्षितिं विश्वमाभाः । किमावरीवः कुहकस्य । अदर्दर्हूत्समसृजः । अपोपदर्द्रिं पृथक्तदर्द्दः । उत्संहायास्थाद्व्यृ१तूंरदर्द्धः । अजागगास्त्वंधिदेवः । प्रादिदुप्रसिद्धोषधीरजीगः । वारीन्मवह्नकड्कृति । अनानुकृत्यमपुनश्चकार । पुनरागाः पुनर्नव । अहोरात्रे चितयन्न विमस्यः । अवद्यमिव मन्यमाना गुहाकः । शूरो न युध्यन्नवनो निदस्यः, सस्वश्चिद्धि तन्वः । अहस्त्र कृष्णमहः । सनुतर्धेहि तन्नतः, सवर्दुघायाः पयः । आ

यस्ते योनिं घृतवन्तमस्राः ॥

इति श्रीपार्षदव्याख्यायां वज्रटसुतोव्वटकृतौ परिभाषाप्रथमं पटलम् ।

संहिता पदप्रकृतिः ॥

संहिता पदप्रकृतिरित्येतदधिकृतं वेदितव्यम् । आसीमापटलात् । पदानि प्रकृतिभूतानि यस्याः संहितायाः सा पदप्रकृतिः संहिताऽच विकारः । तथा हि । षत्वणत्वादयो विकाराः संहिताया एव भवन्ति । प्रकृतिभूतत्वाच्च पदानां सिद्धत्वम् ॥

पदान्तान्पदादिभिः सन्दधदेति यत्सा ॥ कालाव्यवायेन

संहितायाः पदानि प्रकृतिभूतानीत्युक्तं । न तु संहितायाः स्वरूपं प्रतिपादितमित्यत आह । पदान्तान्पदादिभिर्यदेकीकुर्वन्नेति ग्रन्थमनुसरति सा संहितेति । कालाव्यवायेन तु पदानां कालक्रमानुपादानपरिपाट्या । सा च द्विविधा संहिता । आर्षी क्रमसंहिता च । आर्षी अयं देवाय जन्मने । क्रमसंहिता पर्जन्याय प्रप्रगायत । गायत दिवः । संहितासञ्ज्ञा प्रयोजनं 'ऋतेन च द्वैपदसंहितास्वरौ' ॥

स्वरान्तरं तु विवृत्तिः॥

अस्यामेव संहितायां यत्स्वरयोरन्तरं वक्ष्यति । तद्विवृत्तिसञ्ज्ञं स्यात् । नूइत्याते पूर्वथा च । विवृत्तिसञ्ज्ञाप्रयोजनं ‘‘यतो दीर्घस्ततो दीर्घा विवृत्तय’’ इति॥

सा वा स्वरभक्तिकाला॥१॥

सा विवृत्तिः स्वरभक्तिकाला वा स्यात् । स्वरभक्तेः कालः । द्राघीयसी सार्द्धमात्रा अर्द्धेनान्येति तत्रायं विवृत्तेर्विभागस्त्रिः प्रकारः । उभयतो ह्रस्वाः पादमात्राकालः प्रउटभुभ्यः । प्रत्युअदर्शि । एकतो दीर्घाऽर्द्धमात्राकाला । नूइत्याते । सानोअव्ये । उभयतो दीर्घा, पादोनमात्राकाला । ताईंवर्द्धति । इमा गावः सरमेयाऐच्छः । विवृत्तिषु प्रत्ययादेरदर्शनमिति दोषं वक्ष्यतः, छायोष्माविवृत्तिरिति सम्यग्व्याख्यातं न भवति ॥

पदान्तादिष्वेव विकारशास्त्रं पदे दृष्टेषु वचनात्प्रतीयात् ॥

यत्किंचिद्विकारशास्त्रं तत्पदान्तेषु पदादिषु च वेदितव्यं । पदे दृष्टेषु पदावस्थायामुपलब्धेषु । पदेषु दृष्टेष्वपि वचनात्प्रतीयात् । वचनमन्तरेण विकारो न भवति पदान्तेषु, वसुः सूनुः सहसः । अर्यमा मनुषः ।

पदादिषु । आपो हि ष्ठा मयोभुवः, परावीरासएतनः, पदे इष्टेष्वितिकिं । ताऽअस्य पृतनायुवः, तस्मा अर गमामवः । अत्र पदे आकारस्यादृष्टत्वात्स्वरसन्धिर्न भवति । वचनादितिकिं । अग्निमीळे पुरोहितं । अत्र मकारस्य पदान्तीयस्य वचनमन्तरेण न कश्चिद्विकारः ॥

पदं पदान्तादिवदेकवर्णं प्रश्लिष्टमपि ॥

एको वर्णो यस्येत्येकवर्णं एकवर्णं यत्पदं तत्पदान्तवत्पदादिवच्च कार्यं लभते । यद्यपि प्रश्लिष्टं भवति । इन्द्रेहि मत्स्यंधसः । उद्वेति सुभगः ॥

आनुपूर्व्येण सन्धीन् ॥ २ ॥

पदान्तान्पदादिभिः सन्दधदिति यत्सा कालाव्यवायेनेत्यत्र पदपाठक्रमानुपूर्व्येण सन्धय उक्ताः सामान्यतोऽपीदानीं प्रश्लिष्टान् सन्धीनाह । यदानुपूर्व्येण प्रश्लिष्टान् सन्धीन् कुर्यात् । तद्यथा । इन्द्र । आ । इहि । मत्सि । अन्धसः । इन्द्रशब्दस्य तु आकारेण सह सन्धौ कृते इन्द्राइति भवति । तत इहि अनेन सह सन्धौ इन्द्रेहि भवति । ननु 'पदान्तान्पदादिभिः सन्दधदेति' इत्यनेनाप्येतदेव प्राप्नोति इत्यथ किमर्थोऽयं योगः । शृणु । 'पदं पदान्तादिवदेकवर्ण'मित्यनेन सूत्रेण पदान्तवत्कार्यं लभत इ-

त्येतत्प्रथममुक्त्वा पश्चात्पदादिवदित्युक्तं। अतः संश्लिष्टस्य पदस्य पूर्वमन्तकार्याणि प्रवर्तंते पश्चात्पदादिकार्याणि। तथा चानिष्टं रूपं सिध्यति॥ अतस्तदपवादार्थमाह। अत्रापि यदानुपूर्व्येण सन्धयो भवन्तीति॥

एष स्य स च स्वराश्च पूर्वे भवन्ति व्यञ्जनमुत्तरं यदेभ्यः॥ तेऽन्वक्षरसन्धयोऽनुलोमाः

चतुः प्रकाराः सन्धयो भवन्ति। तद्यथा। द्वयोः स्वरयोर्द्वयोर्व्यञ्जनयोर्व्यञ्जनस्वरयोः, स्वरव्यञ्जनयोरिति। तत्र स्वरव्यञ्जनसन्धिमाह। एषः, स्यः, सः, एतानि च पदानि यदा पूर्वाणि भवन्ति स्वराश्च स्वरान्तानि च यदा पूर्वाणि पदानि भवन्ति। व्यञ्जनं च यदा उत्तरं एतेभ्यो भवति। तदा ते अनुलोमाः, अन्वक्षरसन्धय इत्येवं सञ्ज्ञा वेदितव्याः। एष देवो अमर्त्यः, उ॒त स्यं वा॒जी क्षि॒पणिं तुरण्यति। ससुतः पीतये वृषा। स्वराः पूर्वे न निमिषति सुरणाः। एष स्य स च स्वराश्चेति द्विप्रकारकरणं तुल्ययोगनिवृत्त्यर्थं। तेनैतद्भवति। प्रतिलोमास्तु विपर्यये तएवेत्यत्र एषः स्य स इत्येते न गृह्यन्ते। यदि हि गृह्येरन्।

गमत्सगोमतीत्यत्र तत्र प्रथमास्तृतीयभावमिति तकारस्य दकारः स्यात् । द्विसकारकरणात्त्वयं दोषो न भवति ॥

प्रतिलोमास्तु विपर्यये त एव ॥ २ ॥

तएवान्वक्षरसन्धयः प्रतिलोमा यदा भवन्ति । यदा स्वरव्यञ्जनविपर्ययो भवति । पूर्वेषु सन्धिषु स्वराः पूर्वे व्यञ्जनान्युत्तराणि । इह तु व्यञ्जनानि पूर्वाणि स्वरा उत्तरइत्यर्थः । तमिन्द्रं दानमीमहे ॥

तत्र प्रथमास्तृतीयभावं प्रतिलोमेषु निर्यान्ति ॥

तत्र तेषु प्रतिलोमेष्वन्वक्षरसन्धिषु प्रथमाः स्पर्शाः पदान्तीयाः तृतीयभावं गच्छन्ति । अर्वागावर्त्तया हरी । हव्यवाळग्निरजरः पिता नः, प्रदक्षदाशुषे त्वं । इन्द्रस्य त्रिष्टुबिह ॥

अथेतरेषु ॥ ऊष्मा परिलुप्यते त्रयाणां स्वरवर्जम् ॥

अथेतरेष्वनुलोमेष्वन्वक्षरसन्धिषु ऊष्मा विसर्जनीयो लुप्यते त्रयाणां पदानां । एष स्य स इत्येतेषां । स च स्वरं वर्जयित्वा । सहोपधोरिफितइत्यादिना

एष स्य स विसर्जनीयलोपे सति स्वरस्य लोपः प्राप्नोति । अतः स्वरवर्जमित्युच्यते । एष कविरभिष्टुतः । उत स्य वाजी । स वाज्यर्वा ॥

न तु यत्र तानि पद्याः ॥ ४ ॥

इत्येषां मध्ये अन्यतमत्, यत्र यस्मिन्पदे सावग्रहं भवति तत्र विसर्जनीयलोपो न भवति तद्यथा । पशुषो न वाजान् । इत्याद्युदाहरणं द्रष्टव्यं । न तु यत्र तानि पद्यादिति वा पाठः । तदा तु पद्यात्परभूतानि यत्र तानि भवन्ति यत्र न लुप्यते । उदाहरणं तदेव ॥

पुरएतातितउना ;प्रउगं नमउक्तिभिः । अन्तः पदं विवृत्तयः ॥

स्वरान्तरं तु विवृत्तिरित्युक्तमन्तः पदमध्ये या विवृत्तयस्ताः प्रतिपादयन्त्यवग्रहसन्देहव्युदासार्थं । पुरएतेत्याद्याश्चतस्रः, अन्तः पदं पदस्य मध्ये विवृत्तयः । इन्द्र प्रणः पुरएते व, ननु पुरएतासि महतोधनस्य ते, तत्कृतो नोदाहरणं भवति । पदवच्च 'पद्यानिति' परिभाषितत्वात्पदसन्धिरेवायं । सक्तुमिवतितउनापुनन्तः । छन्दः किमासीत्प्रउगं । दाश्नोति नमउक्तिभिः ॥

अतो ऽन्याः पदसन्धिषु ॥ ५ ॥

अतो विवृत्तिचतुष्टयात् या अन्या विवृत्तयस्ताः

पदसन्धिषु वेदितव्याः । श्रुतऋषिमुग्रमभिमातिषाहं । क॒क्षीव॑न्तं॒ य औ॑शि॒जः । इत उत्तरं स्वरसन्धयः प्राक्प्रकृतिभावात् ॥

समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम् ॥

अष्टौ समानाक्षराण्यादित इत्युक्तं । समानाक्षरे समानस्थाने च दीर्घमेकं उभे स्वरमापद्येते । यम्बा॑जनि॒ प्र॒चे॑तसः । स॒द्यो ज॑ज्ञा॒नो विहीमि॒द्धः । क्षीरं सर्पिर्मधूदकं । समानाक्षर इति किं । त एते वाचमभिपद्य । सस्थान इति किं । द्रवं नः सर्पिरासुतिः ॥

इकारोदय एकारमकारः सोदयः ॥

इकारपरश्चाकारः एकारमापद्यते । सोदयः सह परेण इकारेण । इन्द्र सामसिं रयिं, एतेनं सृजता सुते ॥

तथा ॥ ६ ॥ उकारोदय ओकारम् ॥

यथा इकारोदय अकारः सोदय एकमेव वर्णमापद्यते । एवमवर्ण उकारोदय ओकारमापद्यते । एता यामोपगव्यन्तः ॥

परेष्वैकारमोजयोः ॥

परेषु सन्ध्यक्षरेष्वैकारमापद्यते । अकारः सोदयः । किमविशेषेण नेत्याह ॥

ओजयोः प्रथमतृतीययोः ॥

एऐइत्येतयोः । आ एनं, ऐनं देवासः, स्मदापरैदपदभ्रचेताः ॥

औकारं युग्मयोः ॥

द्वितीयचतुर्थयोः ओऔइत्येतयोः अकारः ओकारमापद्यते सोदयः । यचौषधीः स॒मग्मत । तं य॒ज्ञं बर्हि॒षि प्रौक्षन् ॥

एते प्रश्लिष्टा नाम सन्धयः ॥ ७ ॥

प्रश्लिष्टसंज्ञाः सन्धयो वेदितव्याः एते समानाक्षरे सस्थान इत्यारभ्य । प्रयोजनं प्रश्लिष्टादभिनिहितादिति ॥

समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम् ॥

समानाक्षरलक्षणमुक्तं अन्तस्थामापद्यते । स्वां स्थानेन । अकण्ठ्यं कण्ठ्यरहितं अकाराभ्यां विना । स्वरोदयं स्वरपरं, अभ्यार्षेयं जमदग्निवन्नः । अधीन्वत्रसप्ततिंचसप्तच । अकारवर्ज्यग्रहणं यथासंख्यविहत्यर्थम् । यथासंख्यं हि संभवति । चतस्रोऽन्तस्थाश्चत्वारश्च स्वराः, ह्रस्वदीर्घौ

सवर्णादिति वचनात् ॥

न समानाक्षरे स्वेस्वे ॥

न भवति क्षैप्रः समानाक्षरे स्वे स्वे । ननु तत्रोक्तः प्रश्लिष्टः सन्धिः, सत्यं । उक्तो यदि नाम एवं मन्यते । मात्रिके प्रश्लिष्टः चरितार्थः, यथा दिवीव सूर्यं दृशे । सूयस्थाभिर्न धेनुभिः । द्विमात्रिकेषु क्षैप्रस्यावकाशः । तन्मा भूदिति । न समानाक्षर इत्युक्तम् ॥

ते क्षैप्राः प्राकृतोदयाः ॥ ८ ॥

ते क्षैप्राः सन्धयः प्राकृतोदयाः । प्राकृतोदयाः प्राकृतस्वरोदयाः । प्राकृतग्रहणं सोदयाधिकारनिवृत्त्यर्थं । क्षैप्रसञ्ज्ञाप्रयोजनं 'क्षैप्राभिनिहितेषु चेति' ॥

विसर्जनीयोऽरिफितो दीर्घपूर्वस्वरोदयः ॥ आकारम् ॥

विसर्जनीय अरिफितः दीर्घपूर्वः सह्योपधः स्वरोदयः स्वरपर आकारमापद्यते । तथा, या ओषधीः सोमराज्ञीः । अरिफित इति किं । वारिन्मगाङ्कृइच्छति । स्वरोदयग्रहणं समानाक्षराधिकारनिवृत्त्यर्थम् ॥

उत्तमौ च द्वौ स्वरौ ॥

ऐऔ आकारमापद्येते स्वरोदयौ । सूर्यी॑य॒ पन्या॒म॑न्वे॑ त॒वाउ॑ । उभा उ नूनम् ॥

ताः पदवृत्तयः ॥ ९ ॥

ताएतास्तिस्रः पदवृत्तय उच्यन्ते । अत्र याभिः सञ्ज्ञाभिः शास्त्रकृद्व्यवहरति तावत्यः स्वव्यवहारार्थाः । याभिर्व्यवहारो नास्ति तासां ज्ञाने धर्मः फलम् ॥

ह्रस्वपूर्वस्तु सोऽकारम् ॥

ह्रस्वस्वरपूर्वस्तु सः अरिफितो विसर्जनीयः सोपधः स्वरोदयः अकारमापद्यते । य इन्द्र सोम पातमः । अरिफितइति किं । अन्तरिच्छन्ति तं जने ॥

पूर्वौ चोपोत्तमात्स्वरौ ॥

पूर्वौ च उपोत्तमात् । उत्तमात्पूर्वः स्वरः ऐकारस्तस्मात्पूर्वौ एकारओकारौ स्वरपरौ अकारमापद्येते । अग्न॒ इ॒न्द्र॑ वरु॒ण मित्र॒ दे॒वाः । वायउक्थेभिर्जरन्ते ॥

तउद्ग्राहाः ॥

तउद्ग्राहसञ्ज्ञाः सन्धयो वेदितव्याः । उद्ग्राहाणां पूर्वरूपाण्यकारइति प्रयोजनम् ॥

दीर्घपरा उद्ग्राहपदवृत्तयः ॥ १० ॥

तथा ते एव उद्ग्राहदीर्घपराः सन्तः पदवृत्तयो भवन्ति । कद्रूषते तुज्यते । सहस्रसावे प्रतिरन्तआयुः । उग्राणामिन्द्र ओजिष्ठाः ॥

ओष्ठ्ययोन्योर्भुग्नमनोष्ठ्ये वकारोऽवान्तरागमः ॥

ओष्ठ्यौओकारऔकारौ योनी ययोस्तौ ओष्ठ्ययोनी अकाराकारौ तयोः अनोष्ठ्ये स्वरे परभूते वकारश्च अन्तरागमो भवति । यतओकारौकारयोः स्थानसंभूतौ अतः कारणात् अकारावोष्ठ्ययोनी, तेन वकारागमः । भुग्नं नाम चैतत्सन्धानं भवति । वायवायाहि दर्शत । ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । अनोष्ठ्यइति किं । वावउक्थेभिर्जरन्ते उभाउपांशु प्रथमापि वा वा ॥

ऋकारउदये कण्ठ्यावकारं तदुद्ग्राहवत् ॥ ११ ॥

कण्ठ्यौ अकाराकारौ ऋकारउदये अकारमापद्यते । तत्सन्धानं उद्ग्राहवत्सञ्ज्ञं वेदितव्यं । प्रऋभुभ्योदूतमिव । आनुषा यन्मधुनऋतस्य ॥

उद्ग्राहाणां पूर्वरूपाण्यकारे प्रकृ-

त्या द्वे ओभवत्येकमाद्यम् ॥ प्राच्यपञ्चालपदवृत्तयस्ताः पञ्चालानामोष्ठ्यपूर्वा भवन्ति ॥ १२ ॥

उदग्ग्राह्याणां सन्धीनां यानि पूर्वरूपाणि ये पूर्वरूपा अवयवाः ह्रस्वपूर्वौ विसर्जनीयएकारओकारश्च तानि यकारे प्रत्यये प्रकृत्या द्वे भवतः । ओभवत्येकमाद्यं । ताश्च प्राच्यपदवृत्तयः पञ्चालपदवृत्तयश्चोच्यन्ते । एवं सामान्यत उक्त्वा, अथेदानीं विशेषमाह । पञ्चालानामोष्ठ्यपूर्वा भवन्ति । इतरास्तु प्राच्यपदवृत्तयः । पुरोलाशं यो अस्मै । अध्व॑र्यो॒ अद्रि॑भिः सु॒तम् । ते अग्ने पाकभवो मन्दसानाः ॥

अथाभिनिहितः सन्धिरेतैः प्राकृतवैकृतैः ॥ एकीभवति पादादिरकारस्तेऽत्र सन्धिजाः ॥ १३ ॥

अथशब्दो महाधिकारद्योतनार्थः । अभिनिहितसञ्ज्ञकः सन्धिर्वक्ष्यत इति वाक्यशेषः । स च एतैः प्राकृतवैकृतैरधस्तनैः । एकारौकाराभ्यां प्राकृताभ्यां ह्रस्वपूर्वेण च ओकारभूतेन वैकृतेन च एकीभवति पा-

दादिरकारस्तेनाथ त्रयः सन्धौ दृश्यन्ते । सुगस्त्येतावकेभ्यो रथेभ्योऽग्ने । दधासि रत्नं द्रविणं च दाशुषेऽग्ने । अत्राचिन्नोमधोपितोरं । पादादिरितिकिं । चिकित्वां सोअचेतसं नयन्ति, आरे अस्मं च शृण्वते । अध्वर्यभिरद्रिभिः सुतं । अभिनिहितसञ्ज्ञाप्रयोजनं ‘नैप्राभिनिहितेषु चे’ति ॥

अन्तः पादमकाराच्चेत्संहितायां लघोर्लघु ॥ यकाराद्यक्षरपरं वकाराद्यपिवा भवेत् ॥ १४ ॥

अन्तः पादं पादमध्ये अधिकारवचनं । अकाराच्चेत् । अभिनिधीयमानस्याकारस्य विशेषणानि । अकाराल्लघोः परमक्षरं लघु यकारादि वा वकारादि वा यदि भवेत्संहितायां संहितापाठे अथ सः अकारः अभिनिधीयते प्राकृतवैकृतैरेकीभवतीत्यर्थः । यकारादेः, यमैच्छाममनसा सोऽयमागात् । वकारादेः, तं पृच्छन्तो वरासः । यस्ते मन्यो ऽविधद्वज्र । तेऽवदन्प्रथमाः । लघोरिति किं । व्रतैः सीक्षन्तो अव्रतं. लघ्वितिकिं । दुह्रीतिदोमित्रमह्नो अवद्यात् । यकाराद्यक्षरपरं वकाराद्यपीतिकिं । एनं देवासोअमृतासोअस्थुः । वज्रेण धृष्णो अपतानुदस्व । यथा शार्यातेअ-

मिथः ॥

अन्याद्यपि तथायुक्तमावोन्तोपहितात्सतः ॥

यकारादि वकारादि वा यदक्षरमुक्तं तदुच्यते यद्यप्यन्यव्यञ्जनादि तदक्षरं भवति । तथा तेनैव प्रकारेण युक्तं भवति । संहितायां लघोर्लघु भवतीत्यर्थः । पथ तदा वोन्तोपहितात्सतः, अकारस्याभिनिधानं भवति, आवएवमन्तो यस्य पदस्य तदावोंतं, तेनोपहित आवोंतोपहितः । तस्मादावोन्तोपहितात्सतः । स यत्र गावोभितोननन्त, तथायुक्तमितिकिं, आगावो अग्मन् । आवोंतोपहितात्सतइतिकिं । एतं देवासो अमृतासो अस्थुः ॥

अयेयोवेऽवइत्यन्तैरकारः सर्वथा भवन् ॥ १५ ॥

अये । अयः, अवे । अवः । एवमन्तैः पदैरुपहित अकारः सर्वथा सर्वप्रकारोऽपि सन्नभिनिधीयते । सर्वथा ग्रहणं गुरुलघ्वर्थं । अग्नीतये इतये पवस्व । ताम्बञ्जयोरुपायोनसत्नुः । युवं श्वेतं यद्देवेश्विनाश्वं । पुरूरवोऽनुतेकेतमायं । तदन्तग्रहणादिह न भवति । विपावराहमयोअग्रयाहन् । तद्देवानामवोऽअद्याहृणीमहे ।

वइत्येते न चान प्र क्व चित्तः सवितैव कः॥ पदैरुपहितेनैतैः ॥

आ। न। प्र। क्व। चित्तः। सविता। एव। कः। एतैः पदैरुपहितेन वइत्येतेन पदेन उपहितोऽकारोभिनिधीयते। आवोऽहंसमितिंददे। नवोऽश्वाः श्रथयन्ताहसिस्वतः। प्रवोऽच्छारिरिचे देवयुष्पदं। क्व१वोऽश्वाः क्वाऽभीशवः। चित्तो वस्तुयामः। तत्सविताबोऽमृतत्वमासुवत्। अत्रैववोयुनज्मि। कोवोंऽतर्मरुतऋष्टिविद्युतः। एतैः पदैरितिकिं। अच्छावो अग्निमवसे। पादमध्यइतिकिं। उत येनामयोवीवीनासः। अत्र च प्रकारान्तरेण जातत्वात् ॥

सर्वैरेवोदयाः परे ॥ २६ ॥

सर्वैरेव प्राकृतविकृतैः एकारौकारैरुपहिताः सन्तः परे पादादिभूता अभिनिधीयन्ते, न श्रूयन्ते कथमेतेइत्यत आह ॥

अदादवर्वोऽजनयन्ताव्यत्या अभेदयोपाऽस्वन्त्वर्वारता॥ अमुमुक्तममतयेऽनशामहा अवत्वचोऽर्वारतेऽर्वास्य-

वे रथा ॥१७॥

अदात् । अवर्णः अजनयन्त । अव्यत्यै । अभेत् । अयोपाष्टिः । अवन्तु । अवीरतां । अमुमुक्तं । अमतये । अनशामहै । अवत्वचः । अवीरते । अवांसि । अवः । अरथाः इति । एतेषां पदानां सर्वैः पदैः उपस्थितः अकारः उदयः सन् अभिनिधीयते । सनः सनितासनये सनोऽदात् । अमर्त्योऽवर्ण ओषधीषु । यन्देवासोऽजनयन्ताग्निम् । उत स्म तेऽव्यत्यै पृणासि । विदिग्मे न हृषभेणापुरोऽभेत् । श्येनोयोऽपाष्टिं हन्ति दस्यून् । पदादौ लक्षणतोऽभिनिहितः । पदमध्ये निपातनात् । अधिवृश्चन्तु तेऽवन्त्वस्मान् । माशेषसोऽवीरतापरित्वा अग्निं नमह्मुक्तम् । मानो अग्नेऽमतये । येन वस्योऽनशामहै, धिरोऽवत्वचोभरः । त्वचइतिकं । माशिवासो अवक्रमुः । मानो अग्नेऽवीर ते परादाः । आदेव्यावृणीमहेऽवांसि । आतेऽशो वरेण्यम् । आनोऽवोभिर्महतः । इत्युदाहरणे । अनश्वासो ये पवयोऽरथाः । अरश्मानोयेऽरथाः ॥

वासो।वाये।भिमुत्र कवष्यः संक्रन्दनो धीजवनः स्त्रधावः ॥ उत्सादतऋतावः सगर्भ्यो हिरण्यशृङ्गइति चोपधा-

भिः ॥ १८ ॥

वास्तोष्पायः । अभिभुवे । कवष्यः । संक्रन्दनः । धीजवनः । स्वधावः । उत्सादतः । ऋतावः । सगर्भ्यः । हिरण्यशृङ्ग इति च । एवं रूपाभिस्वउपधाभिरुपहितस्वकारोऽभिनिधीयते । वास्तोष्पायोऽग्नीनां । अभिभुवेऽभिभङ्गाय । कवष्येऽकोषधावनीः । संक्रन्दनोऽनिमिषएकवीरः । पूषेवधीजवनोऽसिसोमः । रायस्पूर्धि स्वधावोऽस्तिहि ते, उत्सादतोऽगादङ्गादवत्तानां । सखा ऋतावोऽनुमा गृभाय । सगर्भ्योऽनुसखासयूथ्यः । हिरण्यशृङ्गोयोऽस्य ॥ १८ ॥

येरा रायोध मेधायि नोऽहिरग्नेऽभिदासति ॥ जायमानोऽभवोऽग्नेयं नृतोपोऽहति पिप्रति ॥ १९ ॥

येराः, रायोध । मेधायि । नोऽहिः । अग्नेऽभिदासति । जायमानोऽभवः । अग्नेयं । नृतोपः । अंहोतिपिप्रति । एते षट्पदा यथागृहीतमभिनिधीयन्ते । रथानां नयेराः । सखारायोधये पार्थिवासः । उपप्रागात्सुमन्मेधायि मन्म । उतनोऽहिर्बुध्न्यः । योनोऽग्नेभिदासति । जायमानोऽभवो महान् । त्वयाऽग्नेयं सुन्वन्नमानस्य नृतोपः, तवत्यन्नर्यंनृतोपइन्द्रः । योनोअं

होतिपिप्रति ॥

जम्भयन्तोऽहिं मरुतोऽनुभर्त्री यवसेविष्यन्वयुने जनिष्ट ॥ वृत्रहत्येर्वाः समेरतमाना मरुतो मदन्नभितो नवन्त ॥२०॥

एते द्वैपदा यथागृहीते अभिनिधीयन्ते । जम्भयन्तोऽहिं इत्कं रक्षांसि । एषास्यावोमरुतोऽनुभर्त्री । प्रोथदश्वो । नयवसेऽविष्यन् । इडायास्पुत्रो वयुनेऽजनिष्ट । ताभिष्ठ्वृष्टचपर्यश्रीर्नः । नयम्बयन्ति समरेतमानाः । स्वर्नोषासो मरुतो मदन्ननु । समच्चगावोऽभितो नवन्त ॥

ब्रुवेत द्वंस्तवसे वाचिमेरपद्दधिरेऽग्नाःनहुषेऽस्मत्पुरोऽभिनत् ॥ उपतेऽधां वहते यं यमोऽर्दातिर्ज्जनुषो यासुव्रतोऽनुश्रियोधित ॥२१॥

एते च द्वैपदा यथागृहीतमभिनिधीयन्ते । संहब्रुवतेऽध्वन्ना । सत्यशुष्माय तवसे वाचि । उत मेरपद्दुव-

तिः । वैश्वानरे न दधिरेऽग्ना वसूनि । सनुतसो नङ्गषोऽस्मत् । पुरोभिनदर्हन्दस्यूहत्ये । उपतेधां सहमानाम् । वहतेऽयं मघवा सर्वसेनः । नराशंसश्चतुरंगोऽयमोऽदितिः ॥ नय ईषन्ते जनुषो याः सुविता देवांस्सुवितोनुपत्म । विश्वाऽभिश्रियोऽषित ॥

वपुषे नु विशोयन्त सन्तोऽवद्यानि खेन सः । भरन्तोऽवस्यवोऽवोऽस्तुबुध्न्योऽजो मायिनोऽधमः ॥ २२ ॥

एते द्वैपदा अभिनिधीयन्ते । प्रवांवयो वपुषेऽनु पदान् । सहिष्ठोऽयन्त । अन्तः सन्तोऽवद्यानि पुनानाः । रथे रथस्य खेनसः । स्थूरं न कश्चिद्भरन्तो वस्यवः । महि ग्नानामवोऽस्तु । अहिर्बुध्न्योऽजएकपात् । त्वंमायाभिरपमायिनोऽधमः ॥

देवो न यत्पुरुवसोऽसुरघ्नोभूतोऽभिश्वेतोरुषस्तेननोद्य ॥ येजामयस्तेरदन्नोऽश्विवक्तारतेऽवर्द्धत तेऽरुणाभिः सदाधि ॥ २३ ॥

एते च द्वैपदा यथागृहीतमभिनिधीयन्ते । देवो

न यस्त्वविताः पुरुहूत पुरूवसोऽसुरघ्नः । मेषो भूतोऽभियन्नयः । कृष्णः श्वेतोऽरुषोयामः । तेन नोऽद्य विश्वेदेवाः । तेनेति किं । तेनो अद्य ते अपरं । इन्द्रजामयउत ये जामयः । प्रतेरदद्वरुणो यातवेः स प्राविता मघवानोऽधिवक्ता । तेऽवर्द्धन्त स्वतवसः । तेऽवग्रोभिर्वरं । राजेव सद्म निषदोऽधिवर्हिषि ॥

स्वाध्यो ऽजनयन्धन्वनोऽभिमातीरग्नेयदह मनसोधियोऽध्वनः ॥ योह्यरतेविंदं स्तपसोधि नयोधि पादोऽस्ययोति ब्राह्मणोऽस्या पोऽनयत् ॥ २४ ॥

एते च यथागृहीतमभिनिधीयन्ते । स्वाध्यो जनयन्नब्रह्मदेवाः । ओजस्विरेव धन्वनोऽभिमातीः । विश्वा अग्ने यदहारातीः । दहेति किं । महोरायः सातिमग्ने अपादधि । उर्वश्या ब्रह्मन्मनसोऽधिजातः । मनो न योऽध्वनः सद्य एति । घृतचक्रं योऽश्वः । तेऽविन्दन्मनसा दीध्यानाः । तपसोऽध्यजायत । भुवन्न योऽधि । नेति किं । पावमानीर्योऽध्येतिहृत्तिः । पादेऽस्य विश्वा भूतानि । इन्द्रो विश्वायोऽति घृराव । ब्राह्मणोऽस्य मुखमासीत् । आपोऽनयत्त्वथमाः ॥

सोऽस्माकं योद्वेषोभ्योऽन्यकृतेभ्यस्तेभ्योऽकरं पयस्वन्तोऽमृताश्च ॥

एते च द्वैपदा यथा गृहीतमभिनिधीयन्ते । उपस्थिरस्तु मोऽस्माकं । यः । यदूति किं । सोऽस्माकमनवद्य । द्वेषोभ्योऽन्यकृतेभ्यऽउत । इदन्तेभ्योऽकरं नमः । युक्ताः पयस्वन्तोऽमृताः ॥

अन्योर्वाकेऽथो इतिनोदयेषु पुत्रः पराके च परावतश्च ॥ २५ ॥

अथाभिनिहितं सन्धिरित्यनुक्रम्य यदुक्तं पादादिरकारएकीभवतीति तस्यापवादः । अन्यः । अर्वाके । अथो । एतेषूदयेषु । पुत्रः पराके । परावतः । एतेषु च पूर्वपदेषु यथासंख्यमभिनिहितो न भवति । पितरं न पुत्रोऽअन्यः । यन्नासत्या पराके अर्वाके । आविवासन्परावतोऽअथो ॥ २५ ॥

अन्तः पादं च वयो अन्तरिक्षे वयो
अस्या अथ योहेतयस्त्रयः ॥ वो अन्धसः
शयत्रे अश्विनो भये अवो आधिसाज्ज
योजामयः पयः ॥ २६ ॥

अन्तः पादमित्युपक्रम्य यदुक्तं तस्यायमपवादः । पादमध्ये च । अग्निं वयो अन्तरिक्षे । अन्तरिक्ष इति किं । आवां वयोऽश्वासः । वयो अस्य । ऊर्ध्वो अग्ने वयो अस्य । अस्येतिकिम् । आवां वगोऽश्वासः । अश्वथयो यथा, सतीनमन्युरश्रथायोऽअद्रिं । शतानीका हेतयोऽअस्य । त्रयः । चत्वारि शृंगा त्रयो ऽअस्य । पान्तमावो अन्धसः । अन्धस इति किं । आवोऽहंसमितिन्द्रदे । वइत्येते नचानप्रेत्यस्यायमपवादः । अये योवेवइत्यन्तैरित्यस्यापवादाः शेषाः । अपिन्व तं शयवे अश्विनागां । यद्वां हवन्त उभये अध । यन्नार्षदाय श्रवो अध्यधत्तं । अधीतिकिं । श्रवो मृत्यु । भरद्वाजांत्साज्जयो अभ्ययष्ट । जामयो अध्वरीयतां । मामाग्रदस्य पयो अक्रतस्व ॥

प्रकृत्येतिकरणादौ प्रगृह्याः ॥

इदानीं प्रकृतिभावः । तत्र प्रथमं पदसंहितामाह । प्रकृत्येतिकरणादौ प्रगृह्याः । इतिकरणादौ परभूते प्रकृत्याप्रगृह्या भवन्ति । इन्द्रो इति । शतक्रतो इति शतऽक्रतो । मो इति । इन्द्राग्नी इति । द्वे इति ॥

स्वरेषु चार्ष्यम् ॥

स्वरेषु च परभूतेषु आर्ष्यां संहितायां प्रकृत्या प्र-

गृह्या भवन्ति । ऋषिदृष्टा आर्षी । राजन्ती अस्य भुवनस्य रोदसी अस्मे । इन्द्रवायू इमे सुताः । ते इहिप्रा ईळते । प्रोअयासीदिन्द्रः । सोमो गौरी अधिश्रितः ॥

प्रथमो यथोक्तम् ॥

प्रथमः प्रगृह्यः आर्ष्यां संहितायां यथोक्तमेव भवति । कश्च प्रथमः । ओकार आमन्त्रितजः प्रगृह्य इत्यादिना यदुक्तः । इन्दविन्द्राय मत्सरं । वायउक्थेभिर्जरन्ते । अग्नाविन्नो मघोपितोरं । यददोपितो अजगन् । पुरुहूत पुरूवसोऽसुरघ्नः । प्रथमइतिकिं । प्रोअयासीदिन्द्रः ॥

सहोदयास्ताः प्रगृहीतपदाः सर्वत्रैव ॥

सह उदयेन वर्त्तंतइति सहोदयाः । ताः संहिताः प्रगृहीतपदसञ्ज्ञा वेदितव्याः । सर्वत्रैव । पदसंहितायां इतिकरणादौ परभूते स्वरेषु वार्ष्यां उदयेषु प्रगृहीतपदा भवन्ति । इन्द्रो इति । शतक्रतो इति शतऽक्रतो । इन्द्राग्नी इति । अतप्यमाने अवसावन्ती अनु ॥

त्र्यक्षरांतास्तु नैवे ॥ २७ ॥

त्र्यक्षरपर्यंताः पुनः प्रगृह्या इवप्रत्यये न प्रकृत्य

भवन्ति । आर्ष्यां संहितायां, दम्पती अक्रतु विद्या । आर्ष्यामिति किं । दम्पतीइवेतिदम्पतीऽइव । तथा । उपधीव । उपधीइवेत्युपधी । इव । अस्वरान्ता इति किं । अघोइव अह्नुषायातम् ।

आर्ष्यामेव सन्ध्ययकारपूर्वौ विवृत्तेश्च प्रत्ययः सन्नुकारः ॥

आर्ष्यामेवेत्यवधारणं क्रमसंहितानिवृत्त्यर्थम् । सन्धौ भवः सन्ध्यः । सन्ध्यो यकारः पूर्वो यस्मात् इति सन्ध्ययकारपूर्वउकारः प्रकृत्या भवति । प्रत्यु अदर्श्यायती । अभूर्वौ।क्षीर्व्यु१आपुः । विवृत्तिस्तु परभूतउकारः प्रकृत्या भवति । अभूदुभाउ अंशवे । सोमं धनसा उ इमहे । सन्ध्यग्रहणं किं । तामेजराह्वजरं मरायु । यकारपूर्वइति किं । अभूर्वौ।क्षौः ॥

ऊकारादौ स्विति ॥

ऊकारादौ पदे परभूतेषु इत्येतत्पदं प्रकृत्या भवति । ताभिरूषु ऊतिभिः । ऊकारादाविति किं । सूपस्याभिर्न धेनुभिः ॥

पूषेत्यकारे न चेत्तदेकाक्षरतत्र पूर्वम् ॥ २८ ॥

पूषा इत्येतत्पदं मकारादौ परे पदे प्रत्यये प्रकृत्या भवति । यदि तत्पूषेतिपदं एकाक्षरपदपूर्वं न भवति । तत्र पूर्वं चेन्न भवति । पूषा अविष्टु माहिनः । स्वस्ति पूषा असुरः । नचेत्तदेकाक्षरतत्र पूर्वमिति किं । नतं पूषाऽपिमृष्यते । तत्र पूषाभवत्सचा ॥

श्रद्धा सम्राज्ञि सुशर्मा स्वधोत पृथुज्रयि पृथिवीषामनीषा ॥ अयानिद्राज्या प्रेप्रेतिस्वराणां मुख्ये परे पञ्चमषष्ठयोश्च ॥ २९ ॥

इत्येतानि पदानि प्रकृत्या भवन्ति । स्वराणां मध्ये मुख्ये प्रथमे अकारे पञ्चमषष्ठयोश्च स्वरयोः परभूतयोः इकारे ईकारे चेत्यर्थः । श्रद्धा इत्ते मघवन्पार्ये दिवि । सम्राज्ञी अधिदेवृषु । एते शमीभिः सुशमी अभूवन् । स्वधा अवस्तात्प्रयतिः परस्तात् । उतो अनूती हिरिशिप्रः । पृथुज्रयी असुर्ये च । द्यावाक्षामा पृथिवी अन्तरिक्षं । ईषा अक्षो हिरण्ययः । पूर्वीरर्यो मनीषा अग्निः । अया ईशानस्तविषीभिः । मा नो निद्रा ईशत, ज्या इयं समने । धन्वन्निव प्रपा असि । मुख्ये परे पञ्चमषष्ठयोश्चेति किं । आरादुपस्थ आगहि । माध्यामिवेति किं । सम्राज्ञीति सं । राज्ञी ॥

स्वरे पादादा उदये सचेति ॥

सचा इत्येतत्पदं प्रकृत्या भवति । स्वरे पादादौ उदयभूते । उगने काव्ये सचा इन्द्रः । हनते सूर्यः सचाँ उद्यत् । स्वरे पादादावुदये इति किं । सचैषु सवनेष्वा । सुख्ये परे पञ्चमषष्ठयोश्चेत्यस्याधिकारनिवृत्त्यर्थं स्वरग्रहणं । केचित्किल पार्षदप्रपञ्चयज्ञप्रयोगे कुर्वंति । इन्द्र इद्धर्योः सचेत्यतस्याभ्यासेऽपीमं प्रकृतिभावं कुर्वंति तन्न । कथं । संहितायां यद्दृष्टं तदनेन शास्त्रेण साध्यते नानेनादृष्टम् ॥

ष्वंतं जोषं चर्षणिश्चर्षणिभ्यः ॥ एकारान्तं मित्रयोरस्मद्विन्नमस्युरित्युपधं चेत्यपृक्तम् ॥ २० ॥

इतिकरणः पदस्वरूपग्रहणार्थः । एवमुपधं च आ इत्येतत्पदं अपृक्तं चेत्प्रकृत्या भवति । स्वरे पदादा इत्यनुवर्त्तते । ष इत्येवमन्तं ष्वन्तं । तमर्जयन्त सुष्टुभं नदोष्वा उपान्तं । उतोन्वस्य जोषमाँ इन्द्रः । आयाहि पूर्वीरतिचर्षणीराँ अर्यः । संसहस्राकारिषच्चर्षणिभ्य आँ आविः । एविंडीने गभीर आँ उग्र । उदुत्यच्चक्षुर्महि मित्रयोराँ एति । नचैतदुदाहरणमिह स्यादेकारौकारौ चेत्यनेन सिद्धत्वात् । तन्न । नहि समानलक्ष-

णानां परित्यागो न्याय्यः। नचैतं विषयं स विधिः प्रवेष्टुं शक्नुयात्। अत्राशक्तग्रहणात्। तत्र सामान्येन विधानाच्च। तस्मात्साधूदाहरणं। इमा अस्मै मतयो वाचो अस्मदाँ ऋचः। आ स एतु य ईवदाँ अदेवः। उप वो विश्ववेदसो नमस्युराँ असृक्षि। स्वरपादादा उदय इति किं। सोमं वज्रिण आभरत्। इत्युपध इति किं। आरभ्रयो गभस्त्योः स्थूरयोराध्वन्। अष्टकामिकि किं। यः प्राणतो निमिषतो महित्वैकः ॥ ६ ॥

एकारोकारपरौ च कण्ठ्यौ लुशाद्वाक् ॥

एकारस्य उकारस्य परौ ययोः अकारआकारयोः तौ तथोक्तौ लुशादृषिः प्राक् प्रकृत्या भवतः। अबुध्नमुत्य इत्यत्र लुशः। एकारओकारयोर्विशेषणार्थं पादादिग्रहणमिहानुवर्त्तते। आ यन्मा वेना अरुहन्नृतस्यँ एकं। तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका। त्वं न इन्द्राभरँ ओजः। विश्वे दृढ़ानि तविषीव उग्राँ ओकः। लुशाद्वागिति किं। यः प्राणतो निमिषतो महित्वैकः। पादादाविति किं। मैनमग्ने विदहः। अमितौजा अजायत ॥

गोतमे चामिनंत ॥

गोतमऋषिदृष्टे च अमिनन्तेत्येतत्पदं प्रकृत्या भवति । आ ते सुपर्णा अमिनं तँ एवैः । पादमध्यप्राप्त्यर्थं पुनर्वचनम् ॥

विश्वा विधर्ता विपन्या कदायामाते
त्यृकारेप्यपादादिभाजि ॥ ३१ ॥

एतानि पदानि प्रकृत्या भवन्ति ऋकारादौ प्रत्यये परे । अपि अपादादिभाजीत्यपि शब्द उभयार्थः । ते वाजो विभ्वाँ ऋभुः । आदित्यो असृजद्विधर्ता ऋतं । आर्त प्रथमं विपन्याँ ऋतस्य । अग्ने कदा ऋतचित् परितवभ्यायाँ ऋणं च ये । अयामाताँ कृणुत । ऋकार इति किं । उत त्वष्टोत विभ्वानु ॥

परुच्छेपे भीषापथेत्यकारे ॥

भीषापथेत्येते परुच्छेपे ऋषौ अकारे प्रकृत्या भवतः । वृषान्न भीषाँ अद्रिवः । याहि पथाँ अनेहसा । ऋषिग्रहणादिह न । कदर्यम्णो महस्पथाति । अकार इति किं । पथ्येवयं तावनुशासता रजः ॥

एवाँ अग्निमतिषु साप्लुतोपधा ॥

एवाँ अग्निमित्येतद्द्वैपदं यथागृहीतं भवति । मतिमवह्ले प्लुतोपधसञ्ज्ञकं सन्धानं भवति । एवाँ अ-

ग्निमजुर्यमुः । एवाँ अग्निवसूयवः । अनिग्रहणं किं । एवाग्निसहस्यं१ वसिष्ठः । प्लुतोपधासञ्ज्ञा प्रयोजनमिदानीमेव वक्ष्यति ॥

सचादयो या विहिता विवृत्तयः प्लुतोपधान्ता अनुनासिकोपधाः ॥ ३२ ॥

स्वरे पादादावित्यादिना या विहिताः सचादयः । एवाँ अग्निमर्चिषु साप्लुतोपधान्ताः । ता अनुनासिकोपधा भवन्ति । आनुनासिक्यमुपधानां विधीयते । उदुस्रिया । सृजति सूर्यः सचाँ उद्यत् ॥

सेदु सा रिमं त्सेमभि साभिवेगः सेदभवः सोपमा सौषधीरनु ॥ सास्मा अरं सोतनः सेन्द्र विश्वा सेति सास्माकमनवद्यसासि ॥ ३३ ॥

यथागृहीतान्येतानि भवन्ति । अत्र विवृत्तिलोपो निपात्यते । सेदु राजा क्षयति । उदु इति किं । सइद्भोजो यो गृहवे । त्वमीशिषे सास्मिन्नासत्सि । धिया शमीसचते सेमभिः । अभि इति किं । सईममादमहि । असत्सु मे जरितः साभिवेगः । सेदभवो ऽयमवथ । स

भव इति किं । स इद्देवेषु गच्छति । जीवयाजं यजते सोपमा दिवः । सौषधीरनु रुध्यसे । अन्विति किं । स ओषधीः सो अपः भवनानि । सास्मा अरं बाहुभ्यां । अरमिति किं । सो अस्मै चारुश्छदयत् । सौषधः सोतनोमतिं । न इति किं । नृम्णं । याचकर्थ सेन्द्र विश्वास्युक्थः । विश्वेति किं । स इन्द्र चित्राँ अभि । कुह सेति घोरं । सास्माकमनवद्यात्तूतुजान । अनवद्येति किं । उपस्तिरस्तु सोऽस्माकं । इत्येतद्देवनिपातनं प्रत्युदाहरणमत्र । अत्रापि विसर्जनीयलोपो निपात्यते । अन्यत्र तु विसर्जनीयस्य कृतौ लक्षणाभिनिहितः । यस्ताकृणोः प्रथमं सास्युक्थः ॥

सेदग्ने सेदग्निर्वासिष्ठं सास्माकेभिः
सेदुग्रः सेमः ॥ सैनां सैनं सोदंचं सेमा-
सोषां सेशे सेदीशे ॥ ३४ ॥

एतानि यथागृहीतं भवन्ति । सेदग्ने अस्तु सुभगः सुदानुः । अग्न इति किं । स इत्तक्षेति । सेदग्निरग्नीँरत्यस्त्वन्यान् । वासिष्ठमिति किं । स इदग्निः कण्वतमः कण्वसखा । सास्माकेभिरेतरीन । सेदुग्रो अस्तु मरुतः । उग्र इति किं । स इद्देवेषु । सेमं मही रोदसी । सैनानीकेन सुविदत्रः । सैनं सश्चद्देवो देवं । सेमं नो अध्वरं

यत । सोऽहन्त्वं मिन्ध्रमरिणात् । सेमामविड्ढि प्रभृतिं, सोषामविन्दत्सस्वः । नसेशे यस्य रंवते । सेदीशे यस्य रोमशं । ईशइतिकिं । सइहवेषु ॥

नूइत्थाते सा नो अव्येत्रो अस्मे वासौ वेद्यस्याम् ॥ धिषणे मे नूअन्यत्राचित्पादादौ नू इन्द्रेत्यत्र्वाक् ॥ ३५ ॥

यथागृहीतमेतानि पदानि भवन्ति । नूइत्थातइति दीर्घत्वं निपात्यते । सन्धिस्तु पदे अदृष्टस्य न भवति । नू इत्था ते पूर्वथा च । तइति किं । आरे । पद्याकोन्वित्था । सा नो अव्येइति मानाबव्यइतिप्राप्ते ओकारो निपात्यते । सन्धिस्तु पूर्ववन्न । दृषास्वसारो अधिसानो अव्ये । वा अस्मे अभिनिहिताभावो निपात्यते । प्रप्रावो अस्मे स्वयशोभिः । अस्य वासा उ अर्चिषा । वै असौ प्रश्लेषो निपात्यते । वेद्यस्यां प्रगृह्यस्यान्तस्थां निपातयति । स्तीर्णं राये सुभरं वेद्यस्याधिषणेमे, इकारलोपो निपातितः । पदान्तपदाद्योरेत्वं वा । आविवासन्रोदसी धिष्णायेते । नू अन्यत्राचित्दीर्घो निपात्यते । नू अन्यत्राचिदद्रिवः । पादादौ नू इन्द्र । पादादौ वर्तमानस्य दीर्घत्वं निपात्यते । नू इन्द्र राये वरिवः । पादादाविति किं । यदिन्विन्द्रपृथिवी । अत्यर्वाक् । प्रकृतिभावे प्राप्ते अन्तस्थापत्तिर्निपात्यते । बर्हिषदः

पिबत्वजात्यर्वाक् ॥

उदू अयान्रजेषितं धनर्चं शतर्चंसन्दशोणये दशोण्ये ॥ यथोहिषे यथोचिषि दशोणिं स्वरोदयं पिबा इमं रथोळ्ह ॥३६॥

एतानि यथागृहीतं भवन्ति । उदूअयान् । दीर्घत्वं निपात्यते । सन्धिस्तु पदे अदृष्टस्य नेत्युक्तं । उदू अयाँ उपवक्तेव । अयानितिकिं । उद्विति सुभगः । रजेषितं । विसर्जनीयस्य प्रश्लेषो निपात्यते । अश्वेषितं । रजेषितं । धनर्चं । उत्तरपदादि लोपः । हिरिश्मश्रुं नाग्नीणां धनर्चं शतर्चसंपूर्वत् । विचक्रमे शतर्चसं महित्वा । दशोणये । अत्र पञ्चस्तु औकारे प्राप्ते ओकारो निपात्यते । दशोण्ये कवयेर्कसातौ । दशशिप्र दशोण्यं । वाचं दूतो यथोहिषे । पिबा दधृग्यथोचिषे सत्रेतसुन्दृशमयं दशोणिं । स्वरोदयं पिबा इमं । हैपदमेतद्यथागृहीतं भवति । इन्द्र सोमं पिबा इमं । एदं बर्हिः । स्वरोदयमितिकिं । इन्द्र सोमं सोमपते पिबेमं माध्यन्दिनं । रथोळ्हऔकारे प्राप्ते ओकारः । एना तु भ्यं रथोळ्हभद्रैः ॥

वीरास एतन तमू अकृण्वंस्ततारेव प्रैषयूरोदसीमे ॥ धन्वर्णसः सरपसः सचोत प्रश्नीविर्वीलू उतसत्त्वाजौ ॥ २७ ॥

एतानि द्वैपदानि यथागृहीतं भवन्ति। परावीरास एतन। इकारस्य एत्वं। तमू अकृण्वन्त्रेधा। दीर्घत्वं। अकृण्वन्निति किं। तम्वभिप्रगायत। एवेन्नु कं सिन्धुमेभिस्ततारेव। एत्वं। एकारौकारपरौ चेति सचादिविहृत्तिप्रतिषेधः। प्रैषयुर्न विद्वान्। एकारे प्राप्ते ऐकारः। अन्तर्मही बृहती रोदसीमे। प्रगृह्यसन्धेरपवादः प्रश्लेषः। धन्वर्णसो नद्यः। पद्यादेरकारलोपो दीर्घस्य वा ह्रस्वः। चरमयः सरपसस्तरायेति पूर्ववत्। स्वस्तिधामहे सचोतैधि। सचादिविहृत्तेः प्रतिषेधः। उपधीव प्रगृह्यस्य प्रश्लेषः। वीलू उत प्रतिष्कभे। दीर्घत्वं। पत्याँइव प्रासृजः सत्त्वाजौ। प्रश्लेषो निपात्यते।

अश्विनेव पविरोपवसनानां महो आदित्याँ उषमामिवेतयः ॥ स्तोतव अव्यञ्च सृजाइषध्यै सचेन्द्रसानि अ-

व्यये स्वधामिता ॥ ३८ ॥

एतानि पदानि यथागृहीतं भवन्ति । यह्वा वाणीभिरश्विनेव । सचादिविवृत्तेः प्रतिषेधः । एत्वं च । अग्निष्वात्तानां पीवोपवसनानां । विसर्जनीयस्य लोपः प्रश्लेषश्च । निपात्यत इति सर्वत्र । महो आदित्याँ अदितिं । अकारस्यौत्वं । आ ते चिकित्व उषसामिवेतयः । ऐकारे प्राप्ते एकारः । वेतिस्तोतव अम्ब्यं । अभिनिहिताभाव एकारस्य च अत्वं । मातुर्नसीमुपसृजा इयध्यै । आत्वं । ब्रह्म च नोवसो सचेन्द्रः सचादिविवृत्तेः प्रतिषेधः । वृषा पवित्रे अधिसानो अव्यये । ओकारस्य ओत्वं । अनुस्वधामितादस्मीयते । अह्वादिपाठात्प्रकृतिभावे प्राप्ते प्रश्लेषः ॥

गोओपशागो ऋजीकप्रवादौ मनीषा आत्वा पृथिवी उत द्यौः ॥ मनीषा वस्यूरणया इहात्र बृहतीइवेति च यथागृहीतम् ॥ ३९ ॥

इत्येतानि पदानि यथागृहीतं भवन्ति । इतिकारः समाप्तिवचनः । चकारः समुच्चयार्थीयः । गोओपशागोऋजीकइत्युभयोः प्रकृतिभावो निपात्यते । प्रवा-

द्वचनात्प्लिङ्गविभक्त्योरनुपलक्षणं । या ते अष्ट्रागोओपशा । असाविदेवं गोऋजीकमन्धः । इमा हि वाङ्गोऋजीका: । अर्वागुपभाममनीषा आत्वा, प्रकृतिभावः । सिन्धुः पृथिवी उत द्यौः । प्रकृतित्वं । द्यौरिति किं । अन्यं, पथ्या बृहती मनीषावस्युः । स्वरादित्वे प्राप्ते प्रश्लेषत्वं । उक्थेषु रणया इह । दीर्घत्वं, कदावसोस्तो । हर्यत आवसच्चादिविवृत्तेः प्रतिषेधः । बृहती इव सूनवे रोदसी । प्रगृह्यलक्षणात: प्रश्लेषे प्राप्ते प्रकृतित्वं । यथागृहीतग्रहणं च काकाक्षिवदुभयत्र सम्बद्धं उपरिष्टादधस्ताच्च ।

योनिमारैगगादारैगादैरैगारैदुर्योणआवृणक् ॥ हन्त्यासद्रुपआरुपितमनायुधासआसता ॥ ४० ॥

एतानि पदानि यथागृहीतं भवन्ति । स्वसा स्वस्रेज्यायस्यै योनिमारैक् । योनिग्रहणं किं । अन्यं । अग्नीम्र्वत्यागादारैक् । आरैक्पन्थां यातवे सूर्याय । निर्विशेषेणोपादानमर्धर्चादि ज्ञापनार्थम् । दुर्योणआहवाङस्मभ्रवाचं । दुर्योणइति किं । वज्रेण हत्वा हणासु विष्णिः । हन्ति रक्षो हन्त्यासद्दन्तं । हन्तीति किं । अमत्सु मे । अग्रेरुपस्थ रुपितं । रुपदिति किं । अनायु-

धास आसता सचन्तां । अनायुभास इति किम् ॥ ८ ॥

अस्त्वासतो निराविध्यद्भ्यादेवं क
आसतः ॥ न्यावृणङ्नाकिरादेवोऽ
न्याविध्यदेनमायुनक् ॥ ४१ ॥

एतान्यपि यथागृहीतानि । असन्नस्त्वासतं इन्द्रवक्ता । अस्त्विति किं । देवानां पूर्व्ये युगे सतः । सतश्च योनिमसतश्च । निराविध्यद्गिरिभ्यषा । निरिति किं । भुवद्विश्वमभ्याद्देवमोजसा । अभीति किं । मनेमि त्वमस्मद्र्यग्देवं । क आसतो वचसः सन्ति । क इति किं । सतश्च योनिमसतश्च । इन्द्रो यः शुष्णमशुषं न्यावृणक् । नीति किं । वज्रेण हत्वा वृणक् । ययोः प्रभुर्न किरादेवश्चोहते । नकिरिति किं । अदेवोपदभ्योदिष्ट । न्याविध्यदिलीबिशस्य । नीति किं । यमेन दत्तं त्रित एनमायुनक् । एनमिति किं । अयं रथमयुक्सप्तरश्मिम् ॥

अहिहन्नारिणक्पथ आयुक्षातामुदावताः ॥ रिस्फमारैग्य आयुक्तकुरुश्रव-
णमावृणि ॥ ४२ ॥

एतान्यपि यथागृहीतानि । योधौतीनामहिह-

त्वारिषण्कपदः । अहिहन्निति किं । आयुवतामश्विना। उदावता त्वक्षसा । नजामयेतान्वोरिक्थमारैक् । रिक्थमिति किं । य आयुक्त तु जागिरा । यदूति किं । अयुक्त सप्तशुन्ध्युवः । कुत्र स्वचणमाष्टधिराजानं । अत्र येषां विशेषणपदानां उदाहरणानि न विद्यन्ते तेषां छन्दः परिपूर्तिफलं । योनिमारैगित्यादीनि पदानि यानि तेषु दीर्घत्वं आदिस्वरस्य निपात्यते ॥

शुनश्चिच्छेपं निदितं नरावाशंसंपूषणम् ॥ नराच शंसं दैव्यं ता अनानुपूर्व्यसंहिताः ॥ ४२ ॥

शुनश्चिच्छेपं निदितं सहस्रात् । नरावाशंसं पूषणमगोह्यम् । नरा च शंसं दैव्यं च धर्तरि । ता अनानुपूर्व्यसंहिताः । नह्येतेषां त्रयाणां पदाऽऽनुपूर्व्येण संहितास्ति । संहितापदप्रकृतिः पदान्तान्पदादिभिः सन्दधदेतीत्यस्यापवादः । सङ्ख्याप्रयोजनं अनानुपूर्व्ये पदसन्ध्यदर्शनात् ॥

यतो दीर्घस्ततो दीर्घा विवृत्तयः ॥

स्वरान्तरं विवृतिरित्युक्तं तत्र यतो दीर्घस्वरो भवति पुरस्तात्पश्चादुभयतो वा ततो दीर्घवृत्तयो वेदितव्याः ।

सूचीपत्र।

			रु.	आ.	पा.
मनोरमाशब्दरत्नटीकासहित	...	...	६	०	०
कारिकावलीमुक्तावलीदिनकरीटिप्पणीसहित	...		४	०	०
बीजगणितपं०सुधाकरकृत टिप्पणीसहित		...	१	०	०
जातकतत्त्वज्योतिष	...	...	०	१२	०
सांख्यचन्द्रिका	...	...	०	८	०
दत्तकमीमांसा	...	...	०	८	०
लघुकौमुदीटिप्पणीसहित	...	...	०	६	०
" भाषाटीकासहित	...	...	४	०	०
पराशरस्मृति (पराशरसंहिता)	...	...	०	६	०
सांख्यतत्त्वकौमुदीमूल	...	...	०	४	०
पाणिनीयशिक्षासभाष्य	...	...	०	२	०
धातुरूपावली	...	...	०	२	०
वसिष्ठसिद्धान्तज्योतिष	...	...	०	१	६
तर्कसंग्रह	...	...	०	१	६
शब्दरूपावली	...	...	०	१	६
उपसर्गवृत्ति (प्राद्युपसर्गार्थसंग्रहः)	...	...	०	१	०
धातुपाठ	...	...	०	२	०
समासचन्द्रिका	...	...	०	१	०
परिभाषापाठ	...	...	०	०	६
शब्दपरीक्षा	...	...	०	२	०
गोलप्रकाश	...	...	२	८	०
सरस्वतीकण्ठाभरणसटीक	...	...	५	०	०
व्युत्पत्तिवादमूलजीवद	...	...	२	०	०
तत्त्वबोधिनीसिद्धान्तकौमुदीकीटीका	...	...	४	०	०
चक्रदत्तमूल (काशी)	...	...	१	८	०

शृंगारतीलकसटीक	...	...	०	२	०
न्यायतलप्रबोधनी	...	...	०	२	०
चानक्यनीतीमुल	...	...	०	१	०
कारिकावलीमुल	...	...	०	२	०
लघुसंग्रह	...	...	०	३	०
गंगासहस्रनाम	...	...	०	२	०
सत्यनारायणमुल	...	...	०	१	६
महीमनमुल	...	...	०	१	०
अमरकोशमुल सांचीपत्रा	...	...	०	८	०
पंचकोशी यात्रा	...	...	०	१	०
रम्भाशुकसम्वादभाषाटीका	...	...	०	२	०
दानमयुख	...	...	१	८	०
प्रायश्चीतमयुख	...	...	१	०	०
व्यवहारमयुख	...	...	०	१२	
हीतोपदेशमुल	...	...	०	८	०
सुश्रुतमुल	...	...	३	०	०
पींगलछन्दसूत्रसटीक	...	...	१	८	०
भट्टीकाव्यपाचसर्ग	...	...	०	६	०
वीष्णुसहस्रनाममूल	...	...	०	१	०
प्रबोधचन्द्रोदयनाटकसंस्कृतटीकाभाषाटीकासहीत			०	१२	०
शुक्लयजुः वेदसंहिताकाभाषाभाष्यखंड२ ३ ४प्रत्येकखंड			१	०	०
कृष्णभट्टीव्युतपतीवादकीटीका	...	...	०	८	०
व्याकर्णकौमुदीभागदुसरा	...	...	१	०	०
संस्कृतारम्भः	...	...	०	२	०
संस्कृतोपक्रमः	...	...	०	४	०

इनसेअधिकबहुतसीसंस्कृतहिन्दीअंग्रेजीआदिपुस्तकेंहमारेयहांमिलतीहैंजिनकोअपेक्षितहोहमारेपासलिखे।

व्रजभूषनदास और कम्पनी

बनारस।

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS:
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
No. 59.

महर्षिशौनकप्रणीतम् ऋक्प्रातिशाख्यम् ।
उव्वटकृतभाष्ययुतम् ॥
श्रीपण्डितयुगलकिशोरपाठकान्तेवासिना मैथिलस्वामी संस्थापित भास्करपाठशाला प्रधानाध्यापकेन श्रीयुतनारायणमन्दिराध्यापकेनच श्रीमद्गौडवंशावतंसेन श्रीपण्डित
प्रभुदत्त शर्मणा संशोध्य प्रकाशितम् ॥

SAUNAKA'S PRÂTIŚÂKHYA
OF THE RIGVEDA,
WITH THE COMMENTARY OF UVVATA.
EDITED AND ANNOTATED BY THE LATE PANDIT
YUGALAKIŚORA VYÂSA,
A SCHOLAR OF THE BENARES SANSKRIT COLLEGE
And His Esteemed Pupil Pandit
PRABHUDATTA ŚARMÂ.
Fasciculus II.

BENARES.
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya vilas Press,
BENARES.

1901.

(Registered under Act XXV of 1867. All Rights Reserved.)

सूचीपत्रम् ।

गोलप्रकाशः	२	८	०
जातकतत्त्वम्	०	१२	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धातुपाठः	०	२	०
धातुरूपावली	०	२	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम्	१	०	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	५	०	०
मुद्राराक्षस	०	१२	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती महामहोपाध्यायपण्डितसुधाकरद्विवेदीकृतटिप्पणीसहिता	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वाक्यकुसुमाञ्जली	१	०	०
विनयपत्रिका	०	६	०
विष्णुसहस्रनाम	०	१	०
व्याकरणकौमुदी उपक्रमणिका का दूसरा खण्ड	१	०	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	५	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	४	०
सिधान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	४	०	०
उपसर्गवृत्तिः	०	१	०

गोषाइंदोन्वषाअसि । यआनयत्परावतः । ताअपोदेवी-रिह । विविधान्युदाहरणानि ॥

द्विषंधयस्तूभयतः स्वरस्वराः ॥४५॥

द्वौसंधीयासांविवृत्तीनां ताद्विसंधयः तास्तूभयतः स्वरावेदितव्याः । मध्यगतस्वरस्य उभयतःस्वरौयासांविवृत्तीनांताउभयतः स्वरस्वराः । अभूदुभा उ अंशवे ॥ तस्मा उ अद्य । संज्ञाप्रयोजनं । अर्धर्चांते कुर्यु रधोद्विषेधौ

प्राच्यपंचालउपधानिभोदयाः शाकल्यस्यस्थविरस्य ॥ ४६ ॥

प्राच्यपंचालपदवृत्तयोरधस्ता त्प्रतिपादिताविवृत्तयः तासांशाकल्यस्यस्थविरस्यमतेन किंचिदुच्यते । प्राच्यपंचाललक्षितानांविवृत्तीनां उपधाः तन्निभाः तादृशाउदयायासां तास्तथोक्ताः । एषदेवोअमर्त्यः । आंगिरसोजुह्वे वाजे अस्मिन् । नो अहप्रविंदसि ।

इतरास्थितिः ॥ ४७ ॥

इतरात्तु अस्माकंशाकलानांस्थितिः प्राकृतोदयत्वंनाम । एषदेवः आंगिरसोजुह्वे । नोअह ॥

इति वज्रटपुत्रोव्वटकृतौ प्रातिशाख्यभाष्ये संहितापटलंद्वितीयम् ॥

उदात्तश्चानुदात्तश्च स्वरितश्चत्रयः स्वराः ॥
आयामविश्रम्भाक्षेपैः स्तउच्यंते ॥ १ ॥

प्रथमपटले संहितापरिभाषामनुक्रम्य द्वितीयेन संहितागतलोपागमवर्णविकारानुक्त्वा अथेदानीं स्वरसंधिमाह ॥ उदात्तश्चानुदात्तश्च स्वरितश्च संक्षेपतः स्वरास्त्रयो वेदितव्याः । इदानीं तानुपलक्षयितुमाह ॥ आयामविश्रंभाक्षेपैस्त उच्यन्ते ॥ आयामो नाम वायुनिमित्तमूर्ध्वगमनं गात्राणां तेन उच्यन्ते स उदात्तः ॥ विश्रंभो नाम अधोगमनं गात्राणां वायुनिमित्तं नः नौ आक्षेपो नाम वायुनिमित्तं तिर्यग्गमनं गात्राणां क न्यक्।

अक्षराश्रयाः ॥ २ ॥

स्वरोक्षरमित्युक्तं अक्षरमाश्रयीभूतं येषां ते तथोक्ताः ॥ स्वराणामक्षरैः सह धर्मधर्मिभावसंबंधो न तु व्यंजनैः ।

एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ॥ ३ ॥

उदात्तानुदात्तौ स्वरौ उक्तौ तयोः स्वरितः स्वरो निष्पद्यत इत्यत आह । एकाक्षरसमावेशे सति पूर्वयोरुदात्तानुदात्तयोः स्वरितः स्वरो निष्पद्यते । ते वर्धंत स्वतवसः । ब्राह्मणासः । स्रुचाव घृतं चम्वीव । त्र्यंबकं यजामहे इन्द्रः पर्यास्तुतिः ।

तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा ॥ ४ ॥

तस्य स्वरितस्य स्वरस्य द्विस्वरसंभूतस्य पृथक्श्रुत्यादाकथनं क्रियते । उदात्तात्प्रकाशात् उदात्ततरा आदावर्धमात्रा वेदितव्या ॥ त्र्यंबकं । अर्धमेव वा । अर्धमात्रा-

यत् द्विमात्रस्वरितस्यार्धमात्रमुदात्तांशः कथितः । तेवर्धंत

अनुदात्तः परः शेषः स उदात्तश्रुतिः ।

स्वरितस्य परः शेषोयदर्धमात्रो यद्विमात्रिकः स उदात्तश्रुतिः । उदात्तवच्छ्रूयते । यथात्रपुताम्रयोः संयोगेसति कांस्यस्यधात्वंतरस्योत्पत्ति रेवमिहापिद्रष्टव्या ।

नचेत् । उदात्तं वोच्यते किंचित्स्वरितंवाक्षरंपरं ॥ ५ ॥

चेच्छब्दो यद्यर्थे ॥ यदिनभवति उदात्तमक्षरं स्वरितंवापरं । तेवर्धंत । दिवीवचक्षुः, । द्रुन्नः सर्पिरासुतिः । यदि उदात्तंस्वरितंवापरंस्यात् तदायोनुदात्तः परः शेषः स्यात् । सचकंपइत्युच्यतेबह्वृचैः । नयोयुच्छतितिष्यो ३ यथादिवो ३ ऽस्मेरारंत । अभी ३ दमेकमेकः । यहन्य १ ग्न्यंसहसा ॥ उदात्तपरस्योदाहरणं । शतचक्रंयो ३ ह्यो-वर्तनिः । स्वरितपरस्योदाहरणं एवंचकृत्वा उदात्तपूर्वाः सर्वएवास्यकंपाः स्युः अनुदात्तपूर्वेषुतुक्रियमाणेषुमात्राधिक्यं स्यात् सचदोषः । अयथामात्रं वचनं स्वराणामितिदर्शयति चोदात्तपूर्वत्वकल्पनंक्रमहेतौ । स्वरैकदेशस्वरितस्य यचोत्तरंपदानिहन्यादिति ।

उदात्तपूर्वं स्वरितमनुदात्तंपदेक्षरं ॥६॥

एवमुदात्तानुदात्तसंधौ त्रीन्स्वरानभिधायेदानीमेकपदप्रभावानाह । स्वरितानुदात्तस्वरूपव्याचिख्यासया सर्वस्मिन्नेवपदे एकाक्षरमुदात्तंवास्वरितंवाभवति ॥ शेषमनुदात्तमयं तावदुत्सर्गः । सर्वानुदात्तस्वरूपं कथाद्यु-

दातैर्वा स्वरितैर्व्यपदेशः आद्युदात्तंक्रियते ॥ आद्युदात्तं इंद्र । मध्योदात्तं । अग्निना । अंतोदात्तं । यानु । कः । आदिस्वरितं । स्वर्णरे । मध्यस्वरितं । हृदय्यया । अंतस्वरितं । कन्या । स्वरितएव । क्व । स्यः । द्विरुदात्तं । बृहस्पतिः । द्विरुदातं । इंद्राबृहस्पती । सर्वानुदात्तं । वः । नः । एतेएकादशस्वराः पदेषुप्रत्येतव्याः तत्प्रतिपादनार्थमाह । एकस्मिन्पदे उदात्तपूर्वं स्वरितमक्षर मनुदात्तंप्रत्येतव्यम् ॥ सांहितिक स्तस्यायंधर्मो नुदात्तस्यसतः उदात्तपूर्वस्य । इंद्रः । होता ॥

अतोन्य त्स्वरितंस्वारं जात्यमाचक्षतेपदे ॥ ७ ॥

अतः प्रकृतादुदात्तपूर्वात्स्वरितात्स्वरा द्यदन्यदेकस्मिन्नेवपदे स्वरितंस्वारं तज्जात्यमाचक्षते । व्यालिप्रभृतयः । किमन्य त्पदमत्राभिप्रेतं अपूर्वत्वंवानीचपूर्वत्वंवा । अपूर्वोदाहरणं ॥ स्वः । क्व । न्यक् । नीचपूर्वस्य । कन्या । हृदय्यया । जात्यस्वरूपेणैवोदात्तानुदात्तसंगतिंविना जातोजात्यः । यत्तुक्तं । स्वरितस्योदात्तानुदात्तसंगतिरिष्यते । तदुदात्तपरस्यैवा नुदात्तस्यफलं । तस्य उदात्तपरस्य स्वरितपरस्यचकंपः । कन्या २ वारवायती । क्वा २ भीशवः ।

उभाभ्यांतुपरंविद्या त्ताभ्यामुदात्तमक्षरं ॥ ८ ॥

अनेकमप्यनुदात्तम् ॥ ९ ॥

तुशब्दोविशेषार्थः । उभाभ्यांतु आद्योदात्तपूर्वाभ्यांतु परंविद्यात् ताभ्यांपरंजानीयात् ॥ उदात्तमक्षर मुदात्तश्रुतिरुदात्तव द्विप्रचितः श्रूयते । अनुदात्तमनेकमपि बहून्यप्यक्षराणि । अत्राप्येतदेवकथ्यते ॥ यथा सर्वस्मिन्नेवपदे एकमक्षरमुदात्तं स्वरितंवाभवति । शेषमनुदात्तमिति ॥ तत्प्रचयंभवति उदात्तात्परं अनुदात्तं स्वरितं स्वरितात्परंप्रचयंभवतीत्यर्थः । मादयस्व । अदब्धव्रतप्रमतिः ॥

नचेत्पूर्वन्तथागतात् ॥१०॥

चेच्छब्दोयद्यर्थे । यदिनभवति पूर्वंतथागतादक्षरात् स्वरितगतादुदात्तगताद्वा स्वरितत्वंप्राप्तादुदात्तत्वं वाप्राप्तात् ॥ पूर्वंनभवति यदित्वेवंभूतादक्षरात्पूर्वंभवति ॥ अथप्रकृत्यैवाऽवतिष्ठते ॥ मादयस्वस्वर्णरे । अदब्धव्रतप्रमतिर्वसिष्ठः ।

उदात्तवत्येकीभाव उदातंसंध्यमक्षरम् ॥ ११ ॥

इदानीं पदांतपदाद्योः संधौ उदात्तानुदात्तस्वरितप्रचितानां बलाबलमाह । यस्मिन्नेकीभावे परंपूर्वं॥ क्षरंवोदात्तंभवति । इतरस्तुचतुर्णांस्वराणा मन्यतमः सउदातवानेकीभावः तस्मिन्नुदात्तवत्येकीभावे उदात्तंसंध्यक्षरंजानीयात् ॥ द्वयोरुदात्तयोः । तानिनराजुजुषाणोपा । इंद्रेहिमत्स्यंधसः । अत्र मध्यगतआकार उदात्तोधस्तनं स्वरित मुपरितनं चानुदात्तमुदात्तीकरोति ॥(१)शरदोनया तींद्रः । प्रचितउदात्ते नलुप्तः ।

---

(१) नयाति इन्द्रः ।

अनुदात्तोदये पुनः स्वरितं स्वरितोपधे ॥ १२ ॥

उदात्तस्ताव स्वरांलुंपत्यथस्वरितोनुदात्तं लुंपत्येतद्दर्शयति । अनुदात्तोदये पुनरयंविशेषः स्वरितपदोनुदात्तः स्वरितमापद्यतेचोरसर्पिर्मधूदकं ।

इकारयोश्चप्रश्लेषेक्षैप्राभिनिहितेषुच । उदात्तपूर्वरूपेषुशाकल्यस्यैवमाचरेत् १३

ह्रस्वयोरिकारयोः प्रश्लेषेक्षैप्रसंधिषुचाभिनिहितसंधिषुच अविशेषेण उदात्तपूर्वरूपेष्वनुदात्तोत्तररूपेषु शाकल्याचार्यमतेन एवमाचरेत् । एवमितिस्वरितनिर्देशः । स्रुचीवघृतं । योजान्विन्द्रतेहरी । तेवर्धंत । इकारयोरितिकिं । सद्योजज्ञानोविहीमिद्धोअख्यत् । उदात्तपूर्वरूपेष्वितिकिं । उतेमाहुर्नैषोअस्तीत्येनं । सतुवस्त्राण्यध । हिरण्यशृंगोयोअस्य ।

मांडूकेयस्य सर्वेषु प्रश्लिष्टेषुतथाचरेत् ॥ १४ ॥

मांडूकेयाचार्यस्यमतेनसर्वेषुप्रश्लिष्टेषुउदात्तपूर्वरूपेषु(१)तथाचरेत् । नकुर्यात् । इंद्र । विश्वामित्रः ।

इत्येकीभाविनोधर्माः ॥ १५ ॥

एवंप्रकाराः एकीभाविनांअक्षराणां धर्माः प्रत्येतव्याः ।

---

(१) उदात्तंकुर्यात्स्वरितमित्यर्थः ।

उदात्तवत्येकीभावेत्यतआरभ्य समाप्तौइतिशब्दः ।

परैः प्रथमभाविनः ॥ १६ ॥

परैस्तूदात्तैः एकीभावंप्राप्यते प्रथमभाविनः स्युः । द्वयोरप्याचार्ययो र्मतेनउदात्तभाविनः स्युः ॥ उदात्तवत्येकीभावे इत्येतद्धिप्रथममुक्तं ॥ आव्याजानु । प्राप्तपारं

उदात्तपूर्वं(१)नियतं विवृत्याव्यंजनेनवा ॥ स्वर्यतेंतर्हितंनचेदुदात्तस्वरितोदयं ॥ १७ ॥

उदात्तः पूर्वोयस्मात् इत्युदात्तपूर्वः । उदात्तपूर्वं नियतमनुदात्तं विवृत्या व्यंजनेनवा अंतर्हितमक्षरंस्वर्यते । यथेंद्र । अग्निमीलेपुरोहितं । इंद्रेश्वसंहि । नचेदुदात्तस्वरितोदयमितिकिं । ज्याइयंसमनेपारयंती । इंद्रसोमंसोमपतेपिबेमं । क १ वोश्वाक्का २ भीशवः ।

वैवृत्ततैरोव्यञ्जनौ
क्षैप्राभिनिहितौचतान् ॥
प्रश्लिष्टंच यथासंधिः
स्वरानाचक्षते पृथक् ॥ १८ ॥

विवृत्तौभवावैवृत्ताः । स्वरांतरंतु विवृत्तिरित्युक्तं तिरोंतर्धानंव्यञ्जनंयस्येतितैरोव्यञ्जनः । क्षैप्राभिनिहितौचप्राश्लिष्टं तानेतान्यथासंधि यस्मिन्संधौयथासंधि तद्यथा क्षिप्रसंधौभवः क्षैप्रइत्यादिस्वरान्कथयंति । व्या-

---

(१) विहतमिति खपुस्तकपाठः ।

त्विप्रभृतय: । पृथक्नाना । एतेचाधस्तात्सोदाहरणा: प्रतिपादिता: संज्ञार्थं पुनर्वचनं ।

स्वरितादनुदात्ताना
म्परेषांप्रचय:स्वर: ।
उदात्तश्रुतितोयांत्येकं
द्वेवा बहूनि वा ॥ १९ ॥

स्वरितात्परेषामनुदात्तानां प्रचय: स्वरोभवति । संहितायां प्रचय: स्वरोभवति । संहितायां प्रचय: स्वरो ऽधस्तान्नप्रतिपादित इत्यत आह । उदात्तश्रुतितोयांति उदात्तश्रुतीनिभवंति एकमक्षरं द्वेवाक्षरे बहूनिवाक्षराणि । अग्निमीळे । नासत्याभ्यांबर्हिरिव । इमंमेगंगेयमुनेसरस्वति । वाजेवाजे वत वाजिनोन: ।

केचित्त्वेकमनेकंवा
नियच्छंत्यन्ततोक्षरं ।
आवाशेषात् ॥ २० ॥

तुशब्दोविशेषणार्थ: केचित्त्वाचार्या एकमक्षर मनेकं वाक्षरंवा द्वेअक्षरे नियच्छंतिनीचीकुर्वंति । अंततआरभ्य निमित्तमेवोदात्तं स्वरितंविनेत्यर्थ: । आशेषाद्वा यावदेकमक्षरं मनेकंवा अक्षरं द्वे नियच्छंति । एकेनापिप्रचितस्वरूपंदर्शितंभवत्येवेत्यर्थ: ।

नियुक्तं तूदात्तस्वरितोदयं ॥ २१ ॥

तुशब्दोवधारणार्थ: । सर्वएवाचार्या नियुक्तंनिश्चित

सविप्रतिपत्त्यांतुअनुदात्तंकुर्वंति । उदात्तोदयं उदात्तपरंस्वरितपरंच । वाजेवाजेवत वाजिनोनोधनेषु । तमेवऋषिं तमुब्रह्माण माहुर्यज्ञन्यम् ।

नियमंकारणादेके प्रचयस्वरधर्मवत् । प्रचयस्वरआचार:
शाकल्यान्यतरेतयो: ॥ २२ ॥

नियमंनियमनं अनुदात्तभावं कारणादेकेमन्यंतेआचार्या: । किंतत्कारणमितिचेत् प्रचयस्वरधर्मयुक्त मध्ययनं यथास्यादिति । यदिहि उदात्तस्वरितोदयं प्रचितंनानुदात्तम्भवेत् । अथ प्रचितोदात्तयो: कोविशेष: स्यादिति । प्रचितोहि स्वरितोदात्तपरो ऽनुदात्तोभवति नतूदात्त: । एवंचकृत्वा प्रचितस्वरे । आचारोयं शाकल्यस्या न्यतरेयस्यच एतत्कारणकोद्रष्टव्य: । उक्तान्येवोदाहरणानि ।

परिग्रहत्वेनार्षान्ता
त्तेनवैकाक्षरीकृतात् ।
परेषान्यसमाचारं व्यालि
स्तौच्चे त्स्वरौपरौ ॥ २३ ॥

तुशब्दोविशेषणार्थ: । एतावानेवविसंवादो अस्तमेन स्वरलक्षणेन सहपरिग्रहोवैष्टक: । एतावान्वेष्टकेविशेष: । अनार्षान्ता इनार्षइतिकरण उच्यते । सचद्व्यक्षरआद्युदात्त: पराध्यासस्थमध्येवर्तमान: पूर्वपदांतमादिनास्पृशति । द्वितीयपदादिमंतेनस्पृशति । तस्यायंविकार: पदसं-

धिकृतः । अथउत्तरपदादि व्यंजनादिस्वरादिर्वाभवति । यदिव्यञ्जनादि सदाप्रचयेप्राप्ते अयमपवादः । अनार्षादितिकरणा त्परेषामक्षराणां न्यासमनुदात्तत्वमाचारंमन्यते व्यालिराचार्यः । यदातु स्वरादिर्भवति तदानेनस्वरादिना एकाक्षरीकृतात् परेषांन्यासमेतितुल्यं । तौयदिस्वरौपरौभवतः । उदात्तस्वरितौ ॥ सत्यान्नृते-इतिसत्यान्नृते । अवपश्यन् । सुप्राव्य ऽ इतिसुप्रऽअव्यः । तेनैवैकाक्षरीकृतात् । अललाभवंतीरीत्यललाभवंतीः । तौचेत्स्वरौपराविति किं । शतक्रतोइतिशतऽक्रतो । अविहर्यंतक्रतोइत्यविहर्यंतक्रतो ।

यथासंधीयमानाना
मनेकीभवतांस्वरः ।
उपदिष्टस्तथाविद्या
दक्षराणामवग्रहे ॥ २४ ॥

इदानीमवग्रहस्वरूपस्वरं यथायेनप्रकारेण संधीयमानाना मेकीक्रियमाणाना मनेकीभवतां प्रश्लेषमनाप्नुवतां विवृत्तिव्यंजनतिरस्कृतानां स्वरउपदिष्टः । उदात्तपूर्वं नियतंविवृत्त्या व्यञ्जनेनवा । स्वर्यतेंतर्हितं । स्वरितादनुदात्तानामित्यादिना च । तथान्यक्षराणा मवग्रहे विजानीयात् । ननु योविवृत्तौ स्वरउक्तः सइहभवत्येव । कस्मादयत्नः कृतः । मात्राकालत्वा द्व्यवधानंप्राप्नोति । उषःऽउषः । नावाऽइव । गवाऽपतिं । गोऽपते । पुरःऽहितं । अनेकीभवतामितिकिं । पल्हान्हा ।

पद्यादींस्तु द्व्युदात्तानामसंहितवदुत्तरान् ॥ २५ ॥

पद्यं पदार्धम् । द्व्युदात्तानांपदानां पद्यादीनुत्तरानसंहितवत् संहितवर्जनीयान् । स्वरविधौ । ऋतस्यपंथामन्वेतवाउ नैषागव्यूतिरपभर्तवाऽउं । द्व्युदात्तानामितिकिं । क्षत्रपतेगोपतेउर्वरापते ।

जात्यवद्वातथावान्तौ तनूशचीति पूर्वयोः ॥ २६ ॥

जात्येनतुल्यंजात्यवत्यथाजात्यस्यांतोनिहन्यते । उदात्तपरभूते । एवं तनूशचीपदयोः पूर्वपदयोः सतोरंतोनिहन्यते । तथावांतौकुर्यात् । यथावस्ता प्रतिपादितं । तनूनपादुच्यते गर्भआसुरः । इन्द्रंकुत्सोवृत्रहणंशचीपतिं । असंहितव द्वा कुर्यात् । तनूनपादुच्यतेइन्द्रंकुत्सोवृत्रहणं । संहितवद्वाकुर्यात् । तनूनपादुच्यते । वृत्रहणंशचीपतिं । पृथक्त्वा । वत्करणंतुल्ययोगनिवृत्त्यर्थम् । तेनैवतत्सिद्धं जात्यवद्वेवाध्ययनंयथास्या दितरयोर्माभूदिति । द्व्युदात्तानामेव । तनूनपात्पथऋतस्य । शचीपतेशचीनां । ननु पदानांलक्षणं नकर्तव्यं । सिद्धेषु हिपदेषु संहिताप्रवृत्तिः । सत्यं । यथापुष्पाहारस्य फलाहरणं । यथावा दार्वाहारस्य मध्वाहरणमेवंतत् ।

त्रिमात्रयो रुत्तरयो रंत्यापि प्रचयस्वरे । मात्रन्यस्ततरैकेषाम् ॥२७॥

त्रीणि त्रिमात्राण्ययुक्तानि तत्त्रिमात्रयो रुत्तरयोरंत्यापि मात्राप्रचयस्वरे वर्त्तमाना एकेषामाचार्याणाम्मतेन न्यस्ततरानीचतरास्यात् । उपरिस्विदासी ३ त् । नत्वाभीरिवविंदती ३ँ ॥

उभेव्यालिः समस्वरे ॥ २८ ॥

व्यालिस्त्वाचार्य उभेअंत्येमात्रे उभयोस्त्रिमात्रयोरितराभ्यांसमस्वरे मन्यते । प्रचितस्वरइत्यर्थः । स्विदासीत् । विंदती ३ँ

असंदिग्धान् स्वरान्ब्रूयात् ॥२९॥

संदेहोनाम अस्पष्टता । उदात्तानुदात्तस्वरित प्रचितान्स्वरान् नसंदेहः । नवकान्ब्रूयात् ।

अविक्लिष्टान् ॥३०॥

अविक्लिष्टोनाम सुश्लिष्टता स्वराणां स्वरैःसहस्वरसंधीनुपश्लिष्टान् कुर्यादित्यर्थः ।

अकंपितान् ॥३१॥

कंपितान्कंपनंनाम स्वराश्रितपाठदोषः प्रायेण दक्षिणात्यानां भवति । तमुपसंलक्ष्यसवर्ज्यः ।

स्वरितं नातिनिर्हन्यात् ॥३२॥

नातिप्रेरयेत् । स्वरितमाक्षेपेण ।

पूर्वौनातिविवर्तयेत् ॥३३॥

पूर्वावुदात्तानुदात्तौ उक्तौ नातिविवर्तयेत् । आयामविश्रंभाभ्यां नातिदूरंनयेत् ।

जात्योभिनिहितश्चैव क्षैप्रःप्रश्लिष्टएवच। एतेस्वराः प्रकंपंतेयच्चोच्चस्वरितोदयाः ॥

इतिपार्षदव्याख्यायांआनंदपुरवास्तव्योव्वटकृतौप्रातिशाख्यसूत्रभाष्येतृतीयंस्वरपटलम् ॥

स्पर्शाः पूर्वेव्यंजनान्युत्तराण्यास्थापितानामवशंगमंतत् ॥१॥

चत्वारःसंधय स्तथाहिपूर्वेस्वराः व्यंजनान्युत्तराणि ॥ अनुलोमान्वक्षरसंधयःपूर्वाणि व्यंजनान्युत्तरे स्वराः प्रतिलोमास्त्वक्षरसंधयः। स्वरसंधिस्तु प्रश्लेषाद्यनेकप्रकारउक्तः। इदानीं परिशिष्टोव्यञ्जनसंधिरुच्यते। स्पर्शाःपूर्वेव्यञ्जनान्युत्तराणि। आस्थापितानां संधानमवशंगमन्नाम तत्संधानंवेदितव्यं। अवद्धयोर्व्यञ्जनयो रविकारः सअवशङ्गमःसंधि। आरैक्पंथांयातवे। वषट्तेविष्णावासः। सूर्यांयत्पत्येशंसंतीं। तद्वामजानन्पुवः। इममेवरुणश्रुधी हवं आस्थापितव्यञ्जनसंधयउक्ताः। तेचद्विविधाः। तत्रावशंगमाउक्ताः। अवशंगमार्थआरम्भः।

घोषवत्पराः प्रथमास्तृतीयान्स्वान् ॥२॥

घोषवद्व्यञ्जनपराः प्रथमाः स्पर्शाः तृतीयान्स्पर्शान्स्वानापद्यंते। स्ववर्गीयान्। यद्वाग्वदंति। आचतु-

भिराषड्भिः । यद्वादिवि । स्वानुत्तरसूत्रार्थंकृतंइत्युग्रंथांतरमितिपरिभाषयापिसिध्यति ।

उत्तमानुत्तमेषूदयेषु ॥३॥

प्रथमस्पर्शाः स्वानुत्तमानापद्यंते । उत्तमेषूदयेषुसत्सु । अर्वाङ्नरादैव्येन । वरामह । अतिसूर्यं । तंनोमित्रोवरुणाः । स्वानित्युच्यतेपरवर्गीयेष्वपिपंचमेषूदयेषुसत्सुपदांतीयपंचमोयथास्यान्नतुपरकीयपंचमः । स्पष्टार्थं । सूत्रांतरं ।

सर्वैः प्रथमैः स्पर्शैरुपधीयमानः शकारः शाकल्यपितुर्मतेनछकारमापद्यते ॥ ४ ॥

प्रथमागंतमर्वाक्छफाविव । तनायंसोमः त्वमेद्धवाङ्क्छ्वत्तमं ॥ घनेनवर्वाञ्चमूर्छ्ययिद्यमिवान् ।

पदान्तैस्तैरेवतृतीयभूतैस्तेषांचतुर्थानुदयोहकारः ॥५॥

पदस्यांतैरेवप्रथमैः स्पर्शैः नतुङकारेघोषोष्मपरेइत्येवमादिरतः पदांतैस्तृतीयत्वंप्राप्तैरुपहितोहकारः तेषामेवप्रथमानांचतुर्थानापद्यतेउदयभूतः शाकल्यपितुर्मतेन । वाग्भूतद्रुंद्रमदद्राग्घुवानः । पावाड्ढव्यानि । पदांतैस्तैरेवतृतीयभूतैरित्यवाच्यं । हकारस्यचतुर्भावेहत्वापत्त्वादघोषवत्पराः प्रथमास्तृतीयानित्यमेनतृतीयभावंकरिष्यामस्तथातावद्रूपंभवति । लघुचसूत्रंस्यान्नैतदस्ति । परस्यप-

दादेरदृष्टत्वात् । तृतीयभावोदुर्लभः स्यात् । तस्मात्साधूतांपदांतैस्तैरेवतृतीयभूतैरिति ।

विस्थानेस्पर्शउदयेमकारः सर्वेषामेवोदयस्योतमंस्वम् ॥६॥

विस्थानेअन्यस्थानेस्पर्शेउदयेमकारः सर्वेषामेवाचार्याणांमतेनउदयभूतस्योत्तमंपंचमंस्वमापद्यते । यङ्कुमारनवंरथं । अहञ्चत्वञ्चवृत्रहन् । तन्तेमाता । विस्थानग्रहणंचसंधिज्ञापनार्थं । पवर्गेतुअवशंगमेनभवतीति ।

अंतस्थासुरेफवर्जंपरासुतांतांपदादिष्वनुनासिकान्तु ॥७॥

सएवमकारोंतस्थासुपदादिभूतासुरेफवर्जितासुपरासुसतीषुतांतामंतस्थामापद्यते । यदिनामानुनासिका । यंय्यंयुजं । भद्रैषांल्लक्ष्मीः । तंवद्वंद्वंनसुक्रतुं । पदादिग्रहणांक्रियतेपदमध्येवसंगमसंधिनिवृत्त्यर्थम् । अम्यक्सातइंद्र । नोवमकारस्यांतस्थाभावः ।

तथानकारउदयेलकारे ॥८॥

तेनैवप्रकारेणनकारोलकारे परभूतेलकारमेवानुनासिकमापद्यते । श्वघ्नीवयोजिगीवांल्लक्षमादत् ।

ञकारंशकारचकारवर्गयोः ॥९॥

सएवनकारः ञकारमापद्यतेशकारेचवर्गेप्रत्ययेपरे । घनेववज्रिञ्छ्नथिहि । मघवञ्छग्धि । आस्माञ्जगम्यात् ।

तकारोजकारलकारयोःस्तौ ॥१०॥

नकारः ञकारलकारयोः परभूतयोस्तावेवापद्यते । ञकारेञकारं लकारेलकारं । प्रयञ्जिगासि । अंगादंगाल्लोम्नोलोम्नः ।

तालव्येऽघोषउदयेचकारं ॥११॥

चकारश्छकारश्शकारा अघोषास्तालव्याश्च एतेषुतकारश्चकारमापद्यते ॥ तच्चक्षुः । वरूथमस्तियच्छर्दिः । तच्छंयोरा । तालव्यादितिकिं । तत्त्वायामसि । अघोषइतिकिं । यद्यद्यामि । यद्वोदेवाः ।

छकारंतयोरुदयःशकारः ॥१२॥

तयोर्नकारतकारस्थाननिर्दिष्टयोः ञकारचकारयोरुदयभूतः शकारश्छकारमापद्यते । घनेववज्रिञ्छ्नथिहि । तच्छंयोः । ननुचसर्वैः प्रथमैरुपधीयमानः इत्यनेनसिद्धं । चकारादुत्तरस्यशकारस्यछत्वं । सत्यंसिद्धं यदिनामशाकल्यपितुर्मतेननैवंवक्तव्यं ।

नशाकल्यस्य ॥१३॥

नतुशाकल्यस्याचार्यस्यमतेनशकारश्छकारमापद्यते । वज्रिञ्श्नथिहि । तच्शंयोः ।

तानिवसंगमानि ॥१४॥

तानिशब्दलोपोद्रष्टव्यः । छंदोवत्सूत्राणिभवंति । तानिसंधानानिवसंगमानिवेदितव्यानि । घोषवत्पराः प्रथमस्तृतीयानित्येवमादीनि । अस्यापितानांमध्येनच्चनापठितानियानिव्यञ्जनानिसंयोगंगच्छंति । अतोवसंगमानीत्युच्यंते ।

रेफोष्मणोरुदययोर्मकारोनुस्वारन्तत्परिपन्नमाहुः ॥१५॥

रेफेऊष्मसुचउदयभूते मकारोनुस्वारमापद्यते तत्स्थानंपरिपन्नमाहुराचार्याः वशंगमस्यैव द्वितीयासंज्ञाकार्यार्थाकृता । सेतिचास्यपरिपन्नोपधाचेत् । परिपन्नंप्राकृतमूष्मसंधिमित्यादिना । वशंगमानीत्यस्याप्ययंयोगोयुक्तरूपः । छंदोभंगभयादधस्तादुक्तः । होतारंरत्नधातमम् त्वांहत्यदिंद्राणंसातौ । इंद्रोहंति वृषभंशंडिकानां । वसुंसूनं सहसः । एवमेव वशाख्यव्यंजनसंध्यनंतरमागमानाह ।

ङकारेऽघोषोष्मपरे ऽन्तरैके ककारम्१६

ङकारेऽघोषोष्मपरेसति अन्तराङकारस्याघोषोष्मणोश्च एकेआचार्याः ककारमागममाहुः । तवायंसोमस्त्वमेह्यर्वाङ्क्शश्वत्तमं । प्रत्यङ्क्सविश्वाभुवना । अघोषग्रहणंकिं । दध्यङ्हयन्मध्वाथर्वणः । ऊष्मग्रहणंकिं । प्रत्यङ्चित्राबिभ्र० ।

टकारनकारयोस्तु आहुःसकारोदययोस्तकारम् ॥१८॥

टकारनकारयोःपुनःसकारोदययो रंतरातकारागममाहुरेकेआचार्याः । यद्वेत्वविन्त्वेचविदंध्यप्राट्त्सप्रैति । त्वंताग्त्संचप्रतिधासि ।

ञकारेशकारपरे चकारं ॥१९॥

नकारस्थानगत ञकारग्रहणं । ञकारेशकारपरेसति

अंतराचकारमागममाहु रेकेषाचार्याः । घनेववश्चिकच्छू थिह्यमिवान् ।

तेन्तःपाताः ॥२०॥

अंतर्मध्येपदयोःपतंतीत्यंतःपाताः एतेंतःपातसंज्ञाः संधयोवेदितव्याः । ङकारेघोषोष्मपरेंतरैकद्वत्वादयः ।

अकृतसंहितानामूष्मांतानां पटलेस्मिन्विधानं ॥२१॥

येषामूष्मांतानांपदानामधस्तात्संधिर्नविहितः तेषामिहपटले संधानमधिकृतंवेदितव्यं । ओकारंह्रस्वपूर्वस्तचारेफौघोषवत्परःप्रत्येतव्योनतुस्वरपरस्तद्यथा । एषदेवोरथर्यंति । नत्वेषदेवोऽमर्त्यर्दति ।

चित्कम्भनंनोष्मलोपः ॥ २२ ॥

चित्कंभनेनेत्यत्र सकारलोपोनिपात्यते । चास्कंभचित्कंभनेन चिद्ग्रहणादिहनभवति । उपद्यास्कंभयुःस्कंभनेन ।

ककुद्मान् ॥ २३ ॥

ककुद्मानिति दकारोनिपात्यते । स्वानुत्तमानुत्तमेषूदयेष्वितिनकारेप्राप्ते । मुमोदगर्भोवृषभः ककुद्मान् ।

सम्राट्शब्दः परिपन्नापवादः ॥२४॥

सम्राडित्ययंशब्दः परिपन्नस्यवर्णागमस्यसंधे रपवादभूतोज्ञातव्यः । विराट्सम्राट्विभ्वौः । शब्दग्रहणं सपूर्वस्यराजतेरेकपदीभूतस्यसर्वप्रत्ययांतस्य सर्वविभक्तिकस्य सर्वलिंगयुक्तस्यच ग्राहकंभवति । सम्राजंत-

मध्वराणां । सखाणावस्य । सखाजस्य । सखाग्नीरवश्चाक्षणे । सखाग्नीश्वग्नरेभव । एकपदार्थश्च इहमाभूत् । संराजभीरलधेयाय ।

विसर्जनीय आकारमरेफीघोषवत्परः ॥ २५ ॥

सह्रोपधोविसर्जनीयआकारमापद्यते । अरेफीरेफरहितः । घोषवद्व्यञ्जनपरः ॥ पुनानायंत्यनिविशमानाः । रिफितस्यसंधिर्वक्ष्यति । घोषवत्परइतिकिं । ताविश्वरूपाः पशवः ।

ओकारं ह्रस्वपूर्वः ॥ २६ ॥

सह्रोपधोविसर्जनीयो ह्रस्वपूर्वओकारमापद्यते । घोषवत्परः सन् । देवोदेवेभिरागमत् । अरिफितइत्येव । प्रातर्जितंभगं । घोषवत्परइत्येव । यःपंचचर्षणीरभि ।

तौसंधीनियतप्रश्लितौ ॥ २७ ॥

तावेतौ संधीनियतप्रश्लितसंज्ञितौ वेदितव्यौ । पूर्वोनियतः संधिर्विसर्जनीयआकारमितिद्वितीयप्रश्लितः । ओकारंह्रस्वपूर्वइति ।

सर्वोपधस्तु स्वरघोषवत्परोरेफंरेफी तेपुनारेफसंधयः ॥२८॥

सर्वोपधो दीर्घोपधो ह्रस्वोपधश्च स्वरघोषवत्परश्चरेफीविसर्जनीयोरेफमापद्यते । तेपुनःरेफसंधयउच्यंते । स्वरपरः । प्रातरग्निंप्रातरिंद्रंहवामहे । वारिन्मंडूकः ।

अग्निरस्मि । शंनोदेवीरभिष्टये । घोषवत्परः । प्रातर्मित्रावरुणा । अग्निर्वीरं । अश्वावतीर्गोमतीर्नउषासः — स्वरघोषवत्परइतिकिं अग्निस्तुविश्रवस्तमं ।

रेफोदयोलुप्यते ॥२९॥

रिफितोविसर्जनीयोरेफोदयःसन् लुप्यते । युवोरजांसिसुयमासोअश्वाः ।

द्राघितोपधाह्रस्वस्य ॥३०॥

ह्रस्वपूर्वस्य रिफितस्य विसर्जनीयस्य रेफोदयस्यलुप्यतेविसर्जनीयः । उपधादीर्घमापद्यते । प्रातारत्नं । अग्नीरक्षांसि ॥

अकामनियतावुभाविमौ ॥३१॥

अकामस्यनियतस्य उभाविमौसंधीप्रत्येतव्यौ । पूर्वो। कामः । द्वितीयोनियतः ।

अघोषेरेफारेफौचोष्माणांस्पर्शउत्तरे ॥ तत्सस्थानमनूष्मपरे ॥३२॥

अघोषेस्पर्शंउत्तरेरेफीअरेफीचविसर्जनीय ऊष्माणमापद्यते । तस्याघोषस्यपरत्वावस्थितस्य समानस्थानं । अनूष्मपरेस्पर्शे । ऋषिᳵकोविप्रः । यᳵककुभः ॥ अग्निस्त्वसोम । यद्वोदेवाश्चकृम । देवास्तसर्वे । सनᳶपर्षत् । अनूष्मपरइतीति । मक्षुःघोणस्य । शतक्रतुःत्सरत् ।

तमेवोष्माणमूष्मणि ॥३३॥

अघोषेऊष्मणिपरत्वावस्थिते तमेवोष्माणमापद्यते वि-

सर्जनीयः। योवश्शिवतमः॥ देवीष्षूर्वीः। येनस्सपत्नाः। अघोषइतिकिं। अग्निर्होता॥

प्रथमोत्तमवर्गीयेस्पर्शेवा ॥३४॥

विकल्पतःतत्स्थानमूष्माणमापद्यते विसर्जनीयोरेफारेफीच। य×ककुभः। य×पंच।

ऊष्मणिचानते ॥३५॥

अघोषेऊष्मणिच अनतेदंत्यमूर्धन्यापत्तिर्नेति रित्युपरिष्टाद्वक्ष्यति। विकल्पतोविसर्जनीयःस्यात्। योवः। देवीःषलुर्वीः। येनःसपत्नाः। अनतइतिकिं। निष्ठिषष्वरीस्ते। व्यापन्नऊष्मसंधिः अविक्रांतः। प्राकृतोपधः॥ व्याप्नुवविसर्जनीयोविक्रांतः व्यापन्नेऊष्मसंधिः सवेदितव्योनाम्ना। यत्रविसर्जनीयोव्यापद्यते। विक्रांतसंधिस्तुप्राकृतोपधोवेदितव्यो विसर्जनीयःश्रूयते।

ऊष्मण्यघोषोदये लुप्यतेपरेनतेपि ३६

ऊष्मणिपरेअथंभूते अघोषोदये नतेलुप्यतायूष्मविसर्जनीयोलुप्यते। समुद्रस्थः॥ प्रवस्थट्। कस्विद्वृत्तः। निष्ठनिहि। अघोषोदयइतिकस्मात्। देवीःषट्। त्रिःसमाक्तः। किमर्थमिदमुच्यते। त्रयःषकारामाभूवन्निति। नैतदस्तिप्रयोजनं। प्रतिषिध्यंतेद्विर्वचनं। नतूष्मास्वरोष्मपरइति। एवंतर्हि परस्यद्विर्वचनार्थं। ऊष्मणीवेति।

सोन्वक्षरसंधिवक्रः ॥३७॥

संधिरन्वक्षरवक्रसंज्ञोवेदितव्यः। तनक्रमः॥ संधिशब्दोद्रष्टव्यः।

अव्यापत्तिः कखपफेषुवृत्तिः ॥३८॥

कखपफेषुपरत्वावस्थितेषु अव्यापत्तिरेववृत्तिः ॥ यः कृतदित्। अगस्त्यःखनमानः। यःपंच ॥ याःफलिनीः। वृत्तिग्रहणंयथाशास्त्रं तथापाठप्रवृत्त्युपलक्षणार्थं। तथाहि। प्रथमोत्तमवर्गौ येस्पर्शेवोष्मणिअव्यापत्तिः कखपफेषुवृत्तिरित्येवमादयोविकल्पाव्यवतिष्ठंते। यत्रचैकःपाठोभिमतस्तत्रयत्नंकरोति संधिविंक्रांतएवैषइति। तस्माद्वृत्यमेवार्थः प्रत्येतव्यः।

रेफंस्वधूँःपूरघोषेष्वविग्रहे ॥३९॥

रेफमापद्यतेअघोषेषुप्रत्ययेषुपरेषु स्वरादीनांविसर्जनीयोरेफमापद्यते। स्वः धूः पूः अघोषेषुप्रत्ययेषु। अविग्रहेऽपृथक्पदेसति। स्वः। काव्येनास्वर्चनाः। तिष्ठद्रथंनधूर्षदं। मित्रायुवोनपूर्पतिं। अविग्रहइतिकिं। स्वःसनिष्यवः। पूश्चपृथ्वी।

नाचाइन्दःस्वधितीवाहएवभूम्याददेहोभिरुषर्वसूयवः। आवर्त्तमोहोराचाणयदोपितोप्रचेताराजन्वर्त्तिनीरहेतिच ॥४०॥

इतिचविसर्जनीयो यथाप्राप्तंनभवति अतःनिपात्यते। परिष्यसुवानोअचाइंदुः। रेफलोपः। प्रस्वधितीवरीयते। मोतसूरोअहएव। दिविषद्भूम्याददे। ददइतिकिं॥

भूमिरावपनंमहत् । अह्नोभिरद्भिः । तांत्वासुषर्वसूयवः । गावोनव्रजंव्युषाआवर्तमः । अह्नोरात्राणिविदधत् । यद्दोपितोअजगन् । ह्वयनस्सभ्यमसुरप्रचेताराजन् । अनुष्वेनीसचतेवर्तनीरह ।

यथादिष्टं नामिपूर्वः षकारंसकारमन्योरिफितः ककारे । षकारेच प्रत्ययेंतःपदंतु सर्वत्रैवोपाचरितः ससंधिः ॥४१॥

यथादिष्टं यथोक्तमापद्यते । वक्ष्यमाणेसंधौ नामिपूर्वोविसर्जनीयः षकारमापद्यते । सकारमन्य अनामिपूर्वः अरिफितश्च ककारेपकारेंतःपदंतु सर्वत्रैवैतदधिकृतंवेदितव्यं । उपाचरितसंज्ञः ससंधिर्वेदितव्यः । अथोयूयंस्थनिष्कृतोः । यातंछर्दिष्पाउतनःपरस्पा । निकाव्यावेधसशश्वतस्कः यथादिष्टमितिकिं । यःपंच । अरिफितइतिकिं । भोजाज्जिग्युरंतःपेयं । उपाचरितसंज्ञायाः प्रयोजनं । प्लुतोपाचरितेनतिः ॥

अंतःपादं विग्रहेकारपूर्वः पतिशब्देद्व्यक्षरेपुंस्प्रवादे ॥४२॥

अंतःपादमित्यधिकारवचनं । विग्रहइ यंतःपदंतु सर्वत्रैवेत्यस्यनिवृत्त्यर्थं ॥ अकारपूर्वोविसर्जनीयः सकारमापद्यते । पतिशब्देप्रत्ययेद्व्यक्षरं पुंस्प्रवादेपुंशब्दस्यवाचिनि । उत्तिष्ठब्रह्मणस्पते । वाचस्पतिंविश्वकर्माणमूतये । अंतः

पादमितिकिं । तंजानतंजानतीःप्रत्युदायन्नुषासःपतिः । अकारपूर्वइतिकिं । अधीषमाणायाःपतिः । अचरमितिकिं । ऋतस्यनःपतयोमृडयंतु ॥ पुंस्प्रवादइतिकिं । अतःपत्नीर्दशस्यत । शब्दग्रहणंपुंस्प्रवादग्रहणंचोत्तरं ।

करंकृतं कृधिकरत्करित्यपिपरेषु ॥४३॥

करं । कृतं । कृधि । करत् । कः । एतेष्वपिपरेषु अकारपूर्वोविसर्जनीयः सकारमापद्यते । अहंन्य १ न्यंसहसासहस्करं । सोमंनचारुं मघवत्सुनस्कृतं । उरुकृदुरुणस्कृधि । कुविन्नोवस्यसस्करत् । निकाव्यावेधसःशश्वतस्कः ।

पादांतगतेपरीतिच ॥४४॥

पादांतप्राप्ते परीत्यस्मिन्पदेपरभूते अकारपूर्वोविसर्जनीयःसकारमापद्यते । तदुत्तानपदस्परि । पादांतगतइतिकिं । यदोषधीभ्यःपरिजायते । अकारपूर्वइतिकिं दक्षाद्दितिःपरि ।

असोंतोरेफवतः पारशब्देपरिकृतानिकरतीतिचैषु । अपादांतीयेष्वपिप्रत्ययेषु ॥४४॥

अरेफवतोरेफरहितस्य असइत्यस्यांतः ससकारमापद्यते । पारशब्देपरभूते परिकृतानिकरतीति एषुपरभूतेषु अपादांतीयेष्वपिसकारमापद्यते । अतारिष्मतमसस्पारमस्य इंद्राविष्णूअपसस्पारेअस्य । अविह्वरं-

तंमनसस्परिध्यया । कृतानि इंद्रस्येव प्रतवसस्कृतानि करति सुपेशसस्करति । अघोंतइतिकिं । सुजातासः परिचरंति । सद्योअस्याध्वनः परमश्नुथ । यदोषधीभ्यः परि । अरेफवतइतिकिं । रजसः पारईखितं । पादांताधिकारनिवृत्त्यर्थं अपादांतीयग्रहणं ।

वास्तोरित्येतत्पतिशब्दउत्तरे॥४५॥

यथाप्राप्तमुपाचरति । शब्दग्रहणं लिंगविभक्तिवचनग्रहणार्थं । वास्तोष्पतेध्रुवास्थूणा । वास्तोष्पतिंव्रतपांनिरतक्षन् ।

आविर्हविर्ज्योतिरित्युत्तरश्चेत्ककारः ॥४६॥

आविः । हविः । ज्योतिः । एतेषांविसर्जनीयः षकारमापद्यते । उत्तरोयदिककारः स्यात् । आविष्कृतंमहित्वना । हविष्कृणुध्वमागमत् । ज्योतिष्कर्तायदुस्मसि ।

अथोपांतपश्यंतिशब्दौ ॥ ४७ ॥

अपिचपांतपश्यंतिशब्दौ यद्युत्तरौभवतः । एतेषामेवशब्दानां अथविसर्जनीयः षकारमापद्यते । पांतं । हविष्पांतमजरं पश्यंति ज्योतिष्पश्यन्ति । शब्दग्रहणमनुत्तरार्थं ।

इलायागानमसोदेवयुर्द्रुहोमातुरित्येतानिपदप्रवादे ॥ ४८ ॥

इलायाः । गाः । नमसः । देवयुः । द्रुहः । मातुः

इळः । तान्येतानि प्रवादेउपाचरितंलभते । इडायास्पदेसुदिनत्वेअन्हां । यक्तेचिद्धास्पदेभ्योदात् । उपोएनंजुजुषुर्नमसस्पदे ॥ प्रवोअच्छारिरिचेदेवयुष्पदं । मानस्तेनेभ्योयेअभिद्रुहस्पदे । मातुष्पदेपरमेअन्ति । इळस्पदेसमिध्यसे ।

पूर्वः पुरः पूरितिपूर्वपद्यान्पदानिचापोद्यनवैतदेवम् ॥ ४९ ॥

पूर्वः । पुरः । पूः इत्येतान् पूर्वपद्यान् अपोद्यपरिवर्जयित्वा पदानि नववक्ष्यमाणानि वर्जयित्वा एतदुपचारप्रकरणं विहितमेवंप्रत्येतव्यं । अपवादविधिरयं सामान्यविधेः प्रभवितुमर्हति । अंतः पदंतुसर्वत्रैवास्यविधेस्तावदयमपवादः । पूर्वः पूर्वीयजमानोवनीयान् । पुरः प्रस्रवणावलिं । मित्रायुवोनपूर्पतिंसुशिष्टौ । ननु रेफंस्वर्धूः पूरघोषिष्वविग्रहे इत्यनेनैव सिद्धत्वादिति यश्चोदयेतंप्रतिब्रूमः । प्रतिकंठंतावन्नभवति । येन सर्वापवादकंस्यात् । सर्वापवादकं हितत्पठितं सर्वशास्त्रार्थं प्रतिकंठमुक्तमिति । अपवादस्तुविसर्जनीयस्यभवति । रेफमापद्यतेविसर्जनीयः । स्वर्धूः पूरघोषिष्विति । अथमप्युपाचरितापवादएव । अन्तः पदंतु सर्वत्रैवेत्यस्योत्सर्गस्य । अतोद्वयोरुत्सर्गयोर्द्वावपवादौ युक्तावुपावितिनातिरिक्तं ॥ इदानींनवपदान्युच्यंते ।

अस्यायः सोमोहृतोऽस्यपूर्व्यउरुज्योतिर्जातइमोहृधोन्यः ॥५०॥

अस्याय: । दीर्घायुरस्याय: पति: । अस्यादितिकिं । यस्पतिर्वीर्याणां । सोम:।सोम: पतीरयीणां । बृहत: । सुवीरस्यबृहत: पतिर्भू: । अस्यपूर्व्य: । उतनोअस्यपूर्व्य: पतिर्दन् अस्येतिकिं । महंभुवंत्रसुन: पूर्व्यस्पति: । उरुज्योति: । उरुज्योति: कृणुहिमत्सिदेवान् । उर्वितिकिं । ज्योतिष्कर्त्तायदुश्मसि ॥ जात: । भूतस्यजात: पतिरेकआसीत् । कृम: । उपल्वेम: कृधिनोभागधेयं । वृध: । इंद्रासिसुन्वतोवृध: पतिर्दिव: । अन्य: । स्विष्टमद्यान्य:करत् ।

ब्रह्मणो द्वेवातकर्त्तो विदु र्वसु: पशु रेतानिकविशब्दउतरे ॥५१॥

ब्रह्मण: । वातकर्तइतिद्वेपदे । विदु: । वसु: । पशु: एतानिउपाचारंलभन्ते । कविशब्देपरभूते । ब्रह्मण: । रत्नाधोब्रह्मणस्कवे । अग्नेवातकर्तस्कवि: । द्वेइतिकिं । पवमानकृत: कवि: । विदु: । प्रमर्षिष्टाअभिविदुष्कवि: सन् । वसु: । सद्रुधानोवसुष्कवि: । पशु: । पशुष्कविरशयच्चायमान: । शब्दग्रहणात् प्रतिपदिकमात्रंगृह्यते ।

पथिशब्दे जिन्वथश्चेतथोमह: ।५२।

पथिशब्देप्रत्यये जिन्वथश्चेतथोमहइत्येतानि उपाचारंलभंते । शब्दग्रहणात् प्रातिपदिकमुक्तार्थम् । जिन्वथ: । आवर्त्तनिंमधुनाजिन्वथस्पथ: । चेतथ: । विश्वांअनुस्वधयाचेतथस्पथ: । मह: । कदर्यम्णोमहस्पथा ।

पृथुशब्देविश्वतोवीलितोरज: ।५३।

पृथुशब्देपरभूते विश्वतोवीलितोरजइत्येतेषांविसर्ज-

नीयः षकारमापद्यते । विश्वतः । गिरिर्नविश्वतस्पृथुः पतिर्दिवः । वीलितः । रध्रचोदः श्नथनोवीलितस्पृथुः । रजः । विद्यामेषिरजस्पृथ्वहा ।

कामपोषपूर्धिशब्देषुरायः ॥ ५४ ॥

कामपोषपूर्धिइत्येतेषुपरभूतेषु रायइत्येतत्पदंउपाचरति । कामः । रायस्कामोवज्रहस्तं । पोषं । रायस्पोषं यजमानेषु(१)। पूर्धि । रायस्पूर्धिस्वधावोस्ति ।

पादादिरंतश्चदिवस्परीतिच ॥५५॥

दिवस्परीत्येतद्वैपदंनिपात्यते । पादादौपदांतेच वर्त्तमानं । दिवस्परिसुपथितंतदादः । ष्यंसयोदिवस्परि रघुयामापत्रिवषा । पादादिरंतश्चेतिकिं । दृष्टिं दिवःपरिस्रव । ननुषकारपूर्वविसर्जनीयानुवृत्तौ सत्यां पदांतगतेपरीत्यनेनैवसिद्धत्वात् । यदिहांतश्चदिवस्परीत्युच्यते । तदतिरिक्तमिति । नातिरिक्तंतस्यावकाशः दिवोषंतेयस्य इत्यादिष्वेवदृष्टांतग्रहणेनैव द्वैपदंनिपातितः स्यात् । पादादावेवनतु अंतेतस्मान्नातिरिक्तं ।

दिवस्पृथिव्या अधमस्पदौष्टपूर्वं-पादादौयदि ॥५६॥

दिवस्पृथिव्या अधमस्पदौष्टएतद्वैपदंनिपात्यते । अत्रपूर्वंद्वैपदंपादादौयदिस्यात् । दिवस्पृथिव्याः पर्योजउद्धृतं । विश्वस्यजंतोरधमस्पदौष्ट । पूर्वंपादादाविति किं । प्रये-

---

(१) दुभारवेति कपुस्तकपाठः ।

दिवःपृथिव्यानवर्हणा ।

सस्पदीष्ट ॥५७॥

एतद्द्वैपदंनिपात्यते । योनोद्वेष्ट्यधरःसस्पदीष्ट ।

शवसोमहःसहसइलायाःपात्वित्येकंपुत्रशब्देपराणि ॥५८॥

शवसः । महः । सहसः । इलायाः । पातु । एकं । इत्येतानिपदानिउपाचरंति । किमविशेषेणनेत्याह । पातुइत्येतस्मिन्पदेपरभूते । एकंप्रथमं पदमुपाचरंति पुत्रशब्देपराण्युपाचरंति । शवसः । वाजोनुतेशवसस्पात्वंतं । महः । महस्पुत्रासोअसुरस्यवीराः । सहसः । सहसस्पुत्रोअद्भुतः । इलायाः । इलायास्पुत्रोवयुनेजनिष्ट ।

रायस्खांमहस्करथोमहस्परंनिष्क्रव्यादंनिष्कथनिष्पिपर्तन ॥५९॥

इत्येतानिपदानि द्वैपदानिनिपात्यते । सरायस्खामुपसृजागृणानः । महस्करथोवरिव क्वस्विदस्यरजसोमहस्परं । निष्क्रव्यादमनीनशत् । यदामर्यतिनिष्कथ । निष्पिपर्तन । विश्वस्मान्नोअंहसोनिष्पिपर्तन ।

कबन्धंपृथुकणवासः पुत्रः पातु पथापयः । पायुः पृष्ठेपदंतेषां प्रवादाउदयेदिवः ॥ ६० ॥

कबंधं । पृथु । कणवासः । पुत्रः । पातु । पथा । पयः ।

पायुः । पृष्ठं । पदं । इत्येतेषांपदानां प्रवादाः उदयेवर्त्तमाना दिव इत्येतस्यपदस्य उपाचारंजनयंति । दिवस्कबंधमवदर्षदुद्रिणां । पृथु । अरित्रंवांदिवस्पृथु । कोशासः । दिवस्कोशासइंदवः । पुत्रासः । दिवस्पुत्रासअसुरस्यवीराः । पातु । सूर्योनोदिवस्पातु । पथा । दिवस्पथावध्वः । पयः । दिवस्पयो दिधिषाणा अवेषन् । पायुः दिवस्पायुर्दुरोणयुः । पृष्ठं । दिवस्पृष्ठं भंदमानः सुमन्मभिः । पदं ।(१) अभिप्रियादिवस्पदं ।

रजसस्पात्यंतस्पाथाः कस्काव्याचतुरस्कर । स्वादुष्किलनिस्पातुद्यौष्पितर्वसतिष्कृता ॥ ६१ ॥

एतानिपदानि यथागृहीतं निपात्यंते । विषक्रमे रजस्पात्यंतौ । अंतस्पथाः । अरिफितस्य विसर्जनीयस्य यदुक्तमंतः पदंतुसर्वत्रैवेति तदिहरिफितस्यदृश्यते । अतोनिपात्यते । अंतस्पथाअनुपथाः । कस्काव्यामहतकोहपौंस्या । कनिष्ठआह चतुस्करेति । स्वादुष्किलायं । सरस्वती निदस्पातु । द्यौष्पितःपृथिवि । वसतिष्कृता । पर्णोंवोवसतिष्कृता ।

तपोष्पवित्रं चिष्पूत्वौ धीष्पीपाय त्रिभिष्पतात् । द्यौष्पिता रजसस्पृष्टो ददुष्पज्राय नस्करः ॥६२॥

---

(१) अभिप्रियादिवस्पदा इतिचपाठः ।

एतानिपदानिनिपात्यन्ते । तपोष्पवित्रं विततंदिवस्पदे । अपालामिंद्र त्रिष्पूत्वी धीष्पोपाय इहदिवेषु मानुषा । यद्वांरथो विभिष्पतात् । द्यौष्पिताजनितासत्यमुचन् । धत्तोदिवो रजसस्पृष्ट ऊर्ध्वः । ददुष्पज्राय साम्ने । अधात्वंहि नस्करः ॥

वसुष्कुवि न्मनुष्पिता पितुष्पिता पितुष्परि । प्रणस्पुरो मयस्करं नभस्पथ स्त्वयस्परः ॥६३॥

एतेचोपचोरा यथागृहीतंभवंति । वसुष्कुवि इसुभिकाममावरत् । यामथर्वा मनुष्पिता । गर्भेमातुः पितुष्पिता । अहमिद्धि पितुष्परि । सद्वक्षाद्व प्रणस्पुरः । प्रेतिकिं । भद्रंभवातिनः पुरः । मयस्करत्परतरेचनाहन् । हरिरोपर्णंकृणुति नभस्पथः । येत्रिंशति त्वयस्परः ।

नकारश्चाकारोपधः पदांतोपि स्वरोदयः । लुप्यते ॥६४॥

अतउत्तरं नकारविकारा उच्यंते । ईमित्यंतलोप एषुदयेष्वस्मान्नकारलोपात्प्राक् । आकारोपधोनकारः पदांतो;पदांतोपिच विग्रहाधिकारनिवृत्त्यर्थंपदांतग्रहणं । अंतःपादाधिकारानुवृत्त्यर्थंच । स्वरोदयःसन् लुप्यते । सगाँइवसृजत सुष्टुतीरुप । महाँइंद्रो नृवदा चर्षणिप्रा । आकारोपधइतिकिं । केतुंकृण्वन्नकेतवे । स्वरोदयइतिकिं अयोदंष्ट्रान्विधावतोवराहून् । अंतःपादाधिकारानुवृत्तिः किं , तयेहविश्वां अवसे यजत्रानासादय ।

अज्रांजग्रसाना ञ्जघन्वा न्देवहूतमान्। ववृधानां इंद्रसोमाँस्तृषाणान्नो देवदेवान् । हंतदेवांइतिच ॥६५॥

पादान्तेएतेषुपदेषुनकारालुप्यन्तेपादांतीयार्थआरंभः। अज्रान्। आसूर्योबृहतस्तिष्ठदज्राँऋजु। जग्रसानान्। सृजःसिंधूँरहिनाजग्रसानांआदित्। जघन्वान्। त्वमपोयदवृत्रंजघन्वांअत्याँइव। देवहूतमान्। युक्ष्वाहिदेवहूतमांअश्वांअग्ने। ववृधानान्। त्वमुत्साँऋतुभिर्बँद्बधानांअरंहः। इंद्रसोमान्। यथापिबःपूर्व्याँइंद्रसोमाँएव। इंद्रेतिकिं। सुन्वंतिसोमाऽपिवसित्वमेषां तृषाणान्। धन्वान्यज्राँअपृणक्तृषाणांअधोक्। नोदेवदेवांअच्छ। हंतदेवान्॥ यजामहैयज्ञियान्हंतदेवाँईलामहै। हंतेतिकिं। यथायजऋतुभिर्देवदेवानेव॥ इतिच॥

एताश्चान्यदाःपदवृत्तयः ॥६६॥

एताश्चाज्रानित्यादिका अधस्तनाश्च नकारोपध इत्यादिका अन्यदाःपदवृत्तयउच्यंतेनादिताः।

विवृत्त्यभिप्रायेषुचपीवोअन्नांरयिवृधः। दधन्वांयो जुजुवांयः स्ववांयातुदद्वांवेति ॥६७॥

विवृत्त्यभिप्रायेषुच संधिषु नकारआकारोपधोलुप्यते। अंतस्थाव्यञ्जनोदयइत्येषुद्वै पदेषु । पीवोअंनारयिवृधः

सुमेधाः । दधन्वाँयोनर्यो अप्स्व १ न्तरा । जुजुर्वाँयो मुहुरायुवाभूत् ॥ सुमृळीकः स्ववाँयात्वर्वाङ् । दद्वाँवायत्पुष्यतिरेक्णः ॥

हतं योनौ वचोभि र्यां न्युवन्यून्वनिषीष्टेति । ईकारोकारोपहितो रेफमेषु ॥६८॥

हतं । योनौ । वचोभिः । यान् । युवन्यून् । वनिषीष्ट । एतेषुपदेषु प्रत्ययभूतेषु ईकारोकारोपहितस्यनकारः रेफमापद्यते । उत्पर्णींहतमूर्म्यो मदन्ता । योनौविदस्यूँर्योनावकृतद्यथाषात् । पणीँर्वचोभिरभियोधदिंद्रः । सखी यँइन्द्रचकृषे । युवन्यून् । रुद्रस्यसूनूँ र्युवन्यूँरुदश्याः वनिषीष्ट । प्रियँ । अपिधीँ र्वनिषीष्टमेधिरः ।

स्वरेषुच ॥ ६९ ॥

स्वरेषुप्रत्ययेषु ईकारोकारोपहितो नकारोरेफमापद्यते । रश्मीँरिवयच्छतं । अभीशूँ रिवसारथिः । परिधीँरतितां इहि । बंधूँरिमां अवरान् । अंतः पादाधिकारानुवृत्ते रिहनभवति । यतोनआग्हनतिथीनसः ।

दस्यूंरेकोनॄंरभिच ॥ ७० ॥

दस्यूंरेकोनॄंरभिच अनयोर्द्वैपदयो रेफमापद्यते । त्वंहनुत्यदद्मायोदस्यूँरेकः । पादान्तार्थतोआरम्भः । नॄँरभि । येनाश्व १ न्तततनामनॄँरभि । ऋकारोपधत्वा न्नकारस्य रेफविधानमेतत् ।

ते स्पर्शरेफसंधय: ॥ ७१ ॥

तएते इतंथोना।वित्याद्यारभ्य स्पर्शरेफसंधयो वेदितव्या: स्पर्शोष्मसंधीन् स्पर्शरेफसंधीनभिप्रायांश्च परिपातयंतीत्यादिभि: संज्ञाव्यवहार:।

नास्मानुपैतावान् स्फुरान्गछान्देवानयाड्वहान्। हिरण्ययचक्रान्मायावान् घोषांस्तानश्विनाविद्वान् पयस्वान्पुत्रानाधेह्यायजीया न्यतीनुरो: ॥ ७२ ॥

अस्मानुप। एतावान्। स्फुरान्। गछान् (देवान्। अयाट्। वहान्। हिरण्ययचक्रान्। मायावान्। घोषान्। तान्। अश्विना। अविद्वान्। पयस्वान्। पुत्रानाधेहि। आयजीयान्। यतीनुरो:। एतेनकारा: प्रकृत्याभवंति। अस्मान्। धेनुर्वागस्मानुपसुष्टुतैतु। उपेतिकिं। प्रास्मांअवपृतनासुप्रविद्धु। एतावान्। एतावानस्य महिमा। स्फुरान्। अनुयद्गाव: स्फुरानृजिप्यं। गछान्। गछानिद्ददुषोरातिम्। देवानयाट्। देवानयाड्यां परिप्रेयेंते। अयाडितिकिं। देवाँआवीतये वह। कस्मैदेवा आवहानाशुहोम। हिरण्ययचक्रान्। पश्यंहिरण्ययचक्रानयोदंष्ट्रान्। मायावान्। निमायावानब्रह्मादस्युरर्त्त। घोषा:। आयतेघोषानुत्तारायुगा। तानश्विनाप्रैषोनुमेय:। तानश्विना। तानश्विनासरस्वतीमिन्द्रंसुत्रामाह्वम्। अश्विनेति किं। तांइंद्रसहसेपिब। अविद्वान्। अविद्वानित्था-

परश्चेताः । पयस्वान् । पयस्वानग्न आगहि । पुत्रानाधेहि । दशास्यां पुत्रानाधेहि । आधेहीतिकिं । पुंसः पुत्रां उत । धेहीतिकिं । मृग्यंप्रत्युदाहरणं । आयजीयान् । होतुर्होतुरायजीयान् । यतीनुरोः । यतीनुरोः प्रियाधामन्ःप्रियव्रतान्महस्व । सरस्वयतीनुरोः । उरोरितिकिं । मृग्यंप्रत्युदाहरणं ।

चरति चक्रे चमसां श्चचोचिश्चरसि च्यौल श्चतुरश्चिकित्वान् । एतेषुसर्वत्र विसर्जनीयवद्दीर्घोपधः ॥ ७३ ॥

चरति । चक्रे । चमसान् । च । चो । चित् । चरसि । च्यौलः । चतुरः । चिकित्वान् । एतेषुपदेषु परभूतेषु सर्वत्र अंतः पादंपदांतेवर्तमानो दीर्घोपधोनकारो विसर्जनीयवत् प्रत्येतव्यः । विसर्जनीयधर्मांल्लभते नकारइत्यर्थः । कतमेतइतिचेत् । अघोषिरेफ्यरेफौचोष्माणां स्पर्शउत्तरे । तत्सँस्थानूष्मपरेति । चरति । अंतर्महां श्चरतिरोचनेन । चक्रे । पशूंतांश्चक्रे वायव्यान् । चमसां । विभ्राजमानाश्चमसां अहेवावेनत् । च । अस्मांश्चतांश्च प्रहिनेषिवस्यआ । चो । यांश्चोनुदाध्रुविः । चित् । तांश्चिद्देवापिगच्छतात् । चरसि । चरसिमर्ह्वांश्चरस्योजसा । च्यौलः । भुवोनॄँश्च्यौलो विश्वस्मिन्भरेज्येष्ठश्च । चतुरः । रायःसमुद्रांश्चतुरः । चिकित्वान् । विद्वांश्चिकित्वान्हर्यश्ववर्धसे । दीर्घोपधइतिकिं । अहंवृत्रंनमुचिमुताहन् ।

अस्माँचमसा न्पशून्न ॥७४॥

अस्मान् । चमसान् । पशून् । नावनकारो विसर्जनीयवत्कार्यंलभते । अस्मांचतांश्चप्रहि । यदावाख्यच्चमसांचतुरः । पशूंचस्थातॄञ्चरथंचपाहि ।

तांस्ते सर्व्वाँस्तांदेवास्त्वं तांस्त्रायस्वावदंस्त्वंच ॥७५॥

एतेषांद्वेपदानां नकारोविसर्जनीयवद्भवति । ताँस्ते । तांस्तेअश्यामपुरुकृत्पुरुक्षो । सर्व्वांस्तान् । सर्वांस्तांइन्द्रगच्छसि । देवास्त्वम् । देवास्त्वंपरिभूरसि । तांस्त्रायस्व । तांस्त्रायस्वसहस्य । आवदंस्त्वम् । आवदंस्त्वंशकुनेभद्रं ।

विसर्जनीयं परेष्विति तेस्पर्शोष्मसंधयः ॥७६॥

येषुपरेषुसंधिषु विसर्जनीयंवयंवक्ष्यामः । येचएतेचरति चक्रेइत्यादयस्त उभयेपिस्पर्शोष्मसंधयो वेदितव्याः । एकत्रस्पर्श एकत्रोष्मेत्यन्वर्थसंज्ञा । एवमधस्तना अपिसंज्ञावेदितव्याः । दिङ्मात्रंत्वेतत् प्रदर्शितम् ।

नॄँःपतिभ्योनॄँःप्रणेत्रं नॄँःपात्रं स्वतवाँःपायुः । संधिविक्रांतएवैषः ॥७७॥

ऐवेत्यवधारणवचनम् । नावद्वितीयः पक्षः । नॄँःपतिभ्यः । नॄँःपतिभ्योयोनिंकृण्वाने । नॄँःप्रणेत्रम् । नाराशंसंनृशस्तंनॄँःप्रणेत्रं । नॄँःपात्रम् । कदित्थानॄँःपात्रंदे-

वयतां । स्वतवाँ:पायुः । भुवस्तस्यस्वतवाँ:पायुरग्ने ।

नॄँ:पाहिशृणुधीतिच ॥७८॥

नॄँ:पाहिशृणुधीगिर इत्ययंविक्रांतसंधिरेव । शृणुधीतिकिं । रक्षानॄन्पाह्यसुरत्वमस्मान् ।

नकारस्यलोपरेफोष्मभावे पूर्वस्तत्स्थानादनुनासिकस्वरः ॥७९॥

नकारविकारानुक्त्वाऽथेदानीं नकारसहचरिता न्स्वरविकारानाह । यत्रयत्रनकारस्य लोपभावउक्तः रेफभावऊष्मभावश्च तत्रतत्र पूर्वोनकारस्थानादनुनासिकःपूर्वः स्वरो वेदितव्यः ॥ स्वरग्रहणं व्यञ्जनानुनासिक्यपरिग्रहार्थं । लोपभावेनकारस्य । सर्गाँइवसृजतं । महाँइन्द्रोनृवत् । पीवोअन्नाँरयिवृधः । रेफभावः । रश्मीँरिवयच्छतम । रुद्रस्यसूनूँर्युवन्यूँरुदश्वाः । ऊष्मभावः । महांश्चरस्योजसा । ताँस्तेअश्याम । नॄँ:पतिभ्योयोनिम् ।

आदिस्वरश्चोत्तरेषांपदेपि ॥ ८० ॥

उत्तरेषांपदानामादिस्वरोनुनासिकोवेदितव्यः । पदेपीत्यपिशब्दप्रयोगः संहितायामेव तद्विधानमितिद्योतनार्थः ।

माँस्पचन्या माँश्चत्वेमँश्चतोश्च ॥८१॥

माँस्पचन्याः । माँश्चत्वे । मँश्चतोः । एतानिपदानि । माँस्पचन्याः । यन्नीक्षणंमाँस्पचन्याउखायाः । माँश्चत्वे । माँश्चत्वेवापृशनेवावधत्रे । मँश्चतोः । ब्रध्नंमंश्चतोर्वरुणस्यबभ्रुं ।

ईमित्यंतलोपएषूदयेषुगर्भंगावोवत्सम्मृजंतिपृच्यते। सखायोविव्याचपुनारिणंतिरथमित्यन्वक्षरसन्धिरेवसः ॥८२॥

इदानींवर्णलोपउच्यते । ईमित्यस्यांतलोपो भवति एषूदयेषु सत्सु । गर्भं । गावः । वत्सं । मृजंति । पृच्यते । सखायः । विव्याच । पुनः । रिणंति । रथं । इतिकरणः समाप्तिवचनः । अन्वक्षरसंधिरेव सोयं वेदितव्यः । योऽधस्तात् प्रतिपादितःएषस्य सचस्वराश्च पूर्वइत्यादिकः ॥ गर्भम् । अमीगर्भंश्चतावृधः । गावः । समीगावो मतयोयंति । वत्सम् । समीवत्संनमातृभिः । मृजन्ति । तमीमृजन्त्ययवः । पृच्यते । समीपृच्यतेसमनेव । सखायः । समीसखायो अस्वरन् । विव्याच । समीविव्याच सवनापुरूणि । पुनः । संवत्सरेवावृधे जग्धमीपुनः । रिणन्ति । एरिणंति बर्हिषि प्रियंगिरा । रथम् । समीरथं न भुरिजोरहेषत ।

पुरुपृथ्वधिपूर्वेषु श्चकारउपजायते । ह्रस्वेचपूर्वपदांते चंद्रशब्दे परेंतरा ॥८३॥

पुरु । पृथु । अधि । एतेषुपूर्वपदेषु सत्सु ह्रस्वेच पूर्वपदस्यांते सति चंद्रशब्देचपरे अंतराश्चकारागमउपजायते । पुरु । महित्वेनं पुरुश्चंद्रं विविद्वान् । पृथु । पृथुश्चंद्रमवसे चर्षणिप्राः । अधि । अधिश्चंद्रं बृहत्पृथु । ह्रस्वेचपूर्वपदांते-

हरिश्चंद्रो मरुद्गणाः । ह्रस्वग्रहणं विस्पष्टार्थम् । दीर्घान्तरस्य पदस्यचंद्रशब्दस्याभावात् । पूर्वपदांतइतिकस्मात् । अभिचंद्राभर्तवेनोहिरण्या ।

परीतिपदे कृपरे षकारः ॥ ८४ ॥

परीत्येतस्मिन्पूर्वपदे कृपरेसतिअंतराषकारागमउपजायते । परिष्कृण्वन्ननिष्कृतम् ।

वनेतिरेफःसदशब्दउत्तरे ॥ ८५ ॥

वनइत्येतस्मिन्पूर्वपदे सदशब्दउत्तरे अंतरारेफोजायते । तिष्ठद्रथं नषूर्षदं वनर्षदं ।

परिष्कृण्वन्ति वेधसः ॥ ८६ ॥

परिष्कृण्वंतीति निपात्यते षकारागमः । परिष्कृण्वंति वेधसअपदार्थं वचनं । वेधसइतिकिं । अन्यं प्रत्युदाहरणं ।

अस्कृतोषसं ॥ ८७ ॥

अस्कृतेति निपात्यते । सकारागमः । निरुस्वसारमस्कृतोषसं । उषसमितिकिं । युजंह्या १ न्यमकृत प्रवेपती ।

औद्वाचराः संधयएतउक्ताः ॥ ८८ ॥

यएते पुरुपृष्वादय स्तेऔद्वाचरसंज्ञा वेदितव्याः । औद्वाचरागमोपैतौ त्यादिसंज्ञाप्रयोजनं ।

मेधातिथौ वरुणांत व्रतान्तौ स्पर्शांतस्थाप्रत्ययौ निर्ह्रसेते ॥ ८९ ॥

मेधातिथावृषौ । अग्निन्दूतंवृणीमहे इत्यारभ्य कस्यनूनमितियावन्मेधातिथिः ॥ वरुणांते यस्यसमासस्यसवरुणांतः । एवमेवव्रतांतोपि गृह्यते स्पर्शप्रत्यये ऽंतस्थाप्रत्यये निर्ह्रसिते । ह्रस्वौभवतः । इंद्रावरुणानुवां । इंद्रावरुणायांहुवे । व्रतांतः । युवंदक्षं धृतव्रत मित्रावरुणादूळभं । मेधातिथाविति किं । इंद्रावरुणामदे ऽस्य । इंद्रावरुणा युवमध्वरायनः । स्पर्शांतस्थाप्रत्ययौइतिकिं । तामित्रावरुणाहुवे ।

आदित्या देवा वरुणा सुरेति येत्यादिषु ॥ ९० ॥

आदित्या । देवा । वरुणा । असुरा । एतानिपदानिह्रस्वानिभवंति । याइत्यादिपदेषुपरभूतेषु । तानितुउपरिष्टाद्वक्ष्यति । अतउपरिष्टा देवोदाहरिष्यामः ।

वयमित्यत्रमित्रा ॥ ९१ ॥

वयमित्येतस्मिन्पदे परभूते मित्राइत्येतत्पदं ह्रस्वोभवति । मित्रवयंच सूरयः ।

यासुप्रतीकं निष्कृतं पुरोहितिः त्वचं दाशति शवसा भिषज्यथः ९२

या । सुप्रतीकं । निष्कृतं । पुरोहितिः । त्वचं । दाशति । शवसा । भिषज्यथः । एते यादयोऽधस्तादुपदिष्टाः ॥ या । प्रसाक्षितिरसुर यामहिप्रिया ॥ सुप्रतीकम् । उद्वांचक्षुर्वरुण सुप्रतीकं ॥ निष्कृतम् । वलित्थादेव निष्कृतमादित्या ॥ पुरोहितिः । इयंदेव पुरोहितिः ॥ त्वचम् । युवं-

नोयेषु वरुणाश्चवं ॥ दाशति । इंद्रायोवां वरुणादाशतित्मन् ॥ शवसा । यश्चादित्यशवसान्नमस्वान् ॥ भिषज्यथः । यद्वादेव भिषज्यथः ॥

सोचिन्वगस्त्येदशमेचमण्डले ॥६८॥

सोचिदितिनिपात्यते ॥ ओ त्वंविसर्जनीयस्य ॥ अगस्त्येऋषौ दशमेचमंडले ॥ सोचिन्नुनमरातिनो वयमाराम ॥ सोचिन्नुसख्यानर्यं इनस्तुतः ॥ अगस्त्येदशमेच मंडलइतिकिं ॥ सचिन्न्वासां पतीरयीणां ॥ सचिद्विवेदनिहितं ॥

सान्वीयते ॥६९॥

सान्वीत्यस्य आत्वंनिपात्यते ॥ सचिकित्वां ईयतेसान्वीयते ॥ ईयतइतिकिं ॥ प्रत्युदाहरणं प्रत्येतव्यं ॥

सःपलिक्नीः ॥७०॥

विसर्जनीयस्यालोपोनिपातितः ॥ नता अगृम्नन्नजनिष्टहिषः पलिक्नीः ॥

हिषस्तव ॥७१॥

अत्रविसर्जनीयस्यालोपोनिपात्यते ॥ नहिषस्तवनोमम ॥ हीतिकिं ॥ सतवोती ॥ नहीत्येतत्पदे हीतियत्पदावयवग्रहणं तच्छन्दोभंगभयात् ॥

जुगुप्सतो दुदुक्ष न्गाश्चदुक्ष हृक्षन्वधे स्यदुक्षतानुदक्षि ॥ दक्षं न

पत्मन्दक्षुषो भिदक्ष त्कृष्णासो दक्षि ह्वियानस्यदक्षोः ॥७२॥

यथापठितान्येतानिनिपातितानि। जुगुक्षतः। सुमतिन्न जुगुक्षतः। दुदुक्षन्। सहस्रधारां बृहतींदुदुक्षन्। गामदुक्षत्। निर्ज्योतिषातमसो गामदुक्षत्। गाइतिकिं। अधुक्षत्पिप्युषीमिषं। दुक्षन्वृधे हरिंयत्तेमन्दिनं दुक्षन्वृधे। वृधइतिकिं। (१)प्रत्युदाहरणमृग्यं। विश्वाहाशुक्रंपयो अस्य दुक्षता। अनुदक्षि। त्वम्बिभास्य नुदक्षि। अन्वितिकिं नीचातंधक्ष्यतसं। दक्षंन। दक्षन्न त्रिभ्वन्तटषाणां। नेतिकिं। द्रविर्नद्रावयतिदारुधक्षत्। तस्यपत्मन्दक्षुषः। पत्मन्नितिकिं। प्रत्युदाहरणंमृग्यं। अभिदक्षत् मयोव्यस्यादभिदक्षदुर्वीम्। अभीतिकिं। मृग्यंप्रत्युदाहरणं। आदस्यते कृष्णासोदक्षि। कृष्णासइतिकिं। नीचातंधक्ष्यतसन्नशुष्कं ह्वि यानस्यदक्षोः॥ संहृष्टिरस्यहि यानस्यदक्षोः। ह्वियानस्येतिकिं। धक्षोर्नवाताः परिसन्त्यच्युताः।

इति श्रीपार्षदव्याख्यायां आनन्दपुरवास्तव्यवज्रटपुत्रोव्वटकृतौ प्रातिशाख्येचतुर्थं सन्धिपटलम् ।

अन्तः पादन्नाम्युपधः सकारः षकारमप्यूष्मपरैर्यथोक्तं ।

---

(१) निर्धुक्षन्वक्षणाभ्यः खपुस्तकेप्रत्युदाहरणन्दत्तम्।

अन्यैरेकारात् ॥ १ ॥

अन्तः पादमिति पादस्यमध्ये नामिनोयस्योपधाभूताः सतथोक्तः सकारः । ऋकारादयोदश नामिनः स्वराइत्युक्तं । सकारः षकारमापद्यते । इत्येतदधिकृतंवेदितव्यं । अनूष्मपरैर्नामिभिरुपहितः अप्यूष्मपरैरित्यपिशब्दः यथोक्तमित्यधिकारोपसंहारवचनं । अन्यैरेकारादितिनामिसामान्यप्रसक्तौ अस्यनिवृत्तिवचनं । यज्ञगोषुदुःस्वान्यम् । अन्तः पादमितिकिं । तन्नइन्द्रस्तद्वरुणस्तदग्निस्तत् । नाम्युपधइतिकिं । परः सोअस्तुतन्वा ३ तनाच । यथोक्तग्रहणंकिं । ताभिर्यातिस्वयुक्तिभिः । अन्यैरेकारादितिकिं । येस्यामनोर्यज्ञियाः ।

नतिरत्वपूर्वाततोव्यापतिर्भवतीतिविद्यात् ॥ २ ॥

एकस्मिन्विषयेयत्रकार्यद्वयंप्रवर्ततेतत्रावश्यंभावीक्रमः तत्रयथायोगंकार्यक्रमोभवतीत्येतद्दर्शनायाह । नतिरत्वपूर्वेतियदिहिव्यापत्तिः पूर्वंक्रियतेपश्चान्नतिः । तदा तमेवोष्माणमूष्मणीतिसकारोनाम्यस्यसकारस्यव्यवधायकः स्यान्नामिभिः सहततोनप्रवर्ततेनतिरतः पूर्वमेवनतिःक्रीयतेपश्चात्तमेवोष्माणमूष्मणीति ।

सूतीनकिः स्वैर्व्युरुनह्यभिवीनिहीतिसः ॥ ३ ॥

सु । ऊती । नकिः । स्वैः । वि । उरु । नहि । अभि । वी । नि । हि । इत्येतैर्नामिभिरुपहितः सकारः षका-

रमापद्यते । सु । प्रसुषविभ्योमरुतः । ऊती । ऊतीषट्छतोतिवः । नकिः । नकिः षोअस्त्यरणोजहुर्हितं । स्वैः । स्वैः षएवैरिरिषीष्टयुर्जनः । वि । रोदसीविषषावः । उरु । उरुषसरथंसारथयेकः । नहि । नहिषस्तवनोमम । अभि । अभिषद्युम्नैरुतवाजसातिभिः । नौ १ नौषपविवाहृद्यं १ तरादधे । नि । निषड्डीयतांतन्वातनाच । हि । यपादमुंचोअथमिष्टहिषः ।

स्वक्षरेणैवसत्स्थः ॥ ४ ॥

द्व्यक्षरेणैवपदेननाम्यन्तेनोपहितः सत्स्थइत्येतयोः सकारः षकारमापद्यते । सत् । दिविषद्भ्याददे । स्थः । यदिन्द्राग्नीदिविष्ठोयत् । द्व्यक्षरेणैवेतिकिं । सुवर्हिस्थः स्वर्पतौ ।

स्वबह्वक्षरेण ॥ ५ ॥

सुइत्येतत्पदंनम्यतेअबह्वक्षरेणनामिनोपहितंचेत् । मोष्व १ द्यदुहंणान् अभीष्व १ र्यः । अबह्वक्षरेणेतिकिं । सुदीतिभिः सुदीदिहि ।

पदादयश्चस्यितिस्कितिस्निति ॥ ६ ॥

पदानामादिभूताः सकाराः षकारानापद्यन्ते । यकारककारनकारपराः सन्तः इतिकरणः प्रकारार्थः स्यिति । गोभिः ष्यामसधमादः । स्किति । यजुष्कंनंप्रथमन्देवयानम् । स्निति । अधिष्णुनाधन्वसानोअव्ये । अबह्वक्षरेणैवेत्येव । तवप्रियासः सूरिषुस्याम । उपद्यांस्कम्भथुः स्कम्भनेन ।

अरेफस्यचस्मिति ॥ ७ ॥

अरेफस्य पदस्यस्मितिपदादिर्नम्यते । नष्किष्मातेशतंचन । अरेफस्येतिकिम् । प्रतिस्मरेथांतुजयद्भिरेवैः । अबह्वचरेणैवेत्येव । वह्वामिस्मपूषणमंतरेण ।

एकारेणापिस्वितिनः परंचेत् ॥८॥

एकारांतेनापिनाम्युपहितंस्मुइत्येतत्पदंनम्यतेनः पदंपरंचेद्भवति । तेषुणोमरुतोमृलयंतु । नः परमितिकिं । त्वेस्तुपुत्रशवसः । अप्राप्तप्राप्तिवचनोपिशब्दः ।

दीर्घोनस्यिति ॥ ९ ॥

दीर्घोनाम्युपधाभूतोपिस्यितिपदादिर्ननम्यते । वीरैः स्यामसधमादः । दीर्घग्रहणंकिं । गोभिः ष्यामसधमादः ।

उचनास्पर्शपूर्वं ॥ १० ॥

उइत्येतत्पदंपूर्वंस्यितिपदादिर्ननमते । स्पर्शपूर्वंयदिनभवति । एषउस्यपुरुव्रतः । अस्पर्शपूर्वमितिकिं । उदुष्यशरणोदिवः ।

तकारवर्गस्तु टकारवर्गमंतःपदस्थोपि षकारपूर्वः ॥११॥

तकारवर्गस्तु पुनष्टकारवर्गमापद्यते यथासंख्यं ॥ अंतःपदस्थोपिनानापदस्थोपिषकारपूर्वःसन् ॥ कःस्विद्वृक्षोनिष्ठितोमध्ये अर्णसः ॥ आपोहिष्ठा मयोभुवः ॥ षकारपूर्वंइति किं ॥ युवंहिस्थःस्वर्पती ॥

सितां सधस्थात्स्तनिहि स्तवाम स्तवे स्तुवंति स्तुहि सीं स्तुतः स्थ ॥ साहिस्तः स्तुप् सत्सि सत्सत् स्वनीति स्तोभेत्यादिश्चापि बह्वृचरांतैः ॥१२॥

सितां । सधस्थात् ॥ स्तनिहि ॥ स्तवाम ॥ स्तवे ॥ स्तुवंति ॥ स्तुहि ॥ सीं ॥ स्तुतः । स्थ ॥ साहि ॥ स्तः ॥ स्तुप् ॥ सत्सि ॥ सत्सत् ॥ स्वनि ॥ इत्येषां पदानामादि स्तोभेत्येतस्यचपदस्य सप्रदवास्यादिर्नम्यते ॥ अपिबह्वृचरांतैर्नामभि रुपहितोपि ॥ अबह्वृचरांतै रित्यर्थोपिशब्दः ॥ सितां ॥ पदिषिता ममुंचता यजत्राः ॥ सधस्थात् ॥ निष्षीमद्भ्योधमथोनि ष्षधस्थात् ॥ स्तनिहि ॥ निष्टनिहि दुरिताबाधमानः ॥ स्तवाम ॥ तमुष्टवाम यंगिरः ॥ स्तवे ॥ विष्णवायद्वामनु ष्टवे ॥ स्तुवंति ॥ अनुष्टुवन्तिपूर्वथा ॥ स्तुहि ॥ तमुष्टुहींद्रं योहसत्वां ॥ सीं ॥ निष्षीमद्भ्योधमथोनि ष्षधस्थात् ॥ स्तुतः । नूष्टुत इंद्रनूगृणानः ॥ स्थ ॥ आपोहिष्ठा ॥ साहि ॥ विषाह्यग्नेगृणते मनीषां ॥ स्तः ॥ नास्यते महिमानं परिष्टः ॥ स्तुप् ॥ सोमोविराजमनुराजतिष्टुप् ॥ सत्सि ॥ अग्नेनिषत्सि नमसाधिबर्हिषि ॥ सत्सत् ॥ नहिषत्सदन्तरः पूर्वोअस्मत् ॥ स्वनि ॥ यदिक्रोशमनुष्वणि ॥ स्तोभेत्यादि ॥ परिष्टोभंतुविंशतिः ॥ परिष्टोभंतुनोगिरः ॥

निपरीति स्वसीत्यादौचकारवर्गीयोदयौ ॥१३॥

नि परि ॥ इत्येतौनामिनौ स्वसिइत्थंभूतौ पदादौनमतः किमविशेषेणेत्याह ॥ चकारवर्गीयोदयौ चेत्स्यातां ॥ चकारवर्गपरावित्यर्थः ॥ नि ॥ महांतंकोशमुदचानिषिंच ॥ परि ॥ सहस्रधारः परिषिच्यतेहरिः ॥ परिष्वजध्वंदश ॥ परिष्वजंते ॥ चकारवर्गीयोदयाविति किं ॥ व्युच्छंतीपरिस्वसुः ॥

इकारेचोत्तरेपरान् सेससीतिस्वरोदये ॥१४॥

इकारेचउत्तरे चकारःसमुच्चयार्थोयोनिपरीति समुच्चिनोतिपरान् पदादौनमतः ॥ कथंभूतान्पदादीनित्यत आह ॥ सेससीइतिकरणाःप्रदर्शनार्थः ॥ स्वरोदये इकारस्यविशेषणमेतत् सेससीतिपदादौ न्इकारस्वरपरान्नमतइत्यर्थः ॥ से ॥ परियज्ञंनिषेदथुः ॥ स ॥ निषदापीतये मधु ॥ शुनंनरःपरिषदंनुषासं ॥ निषीदहोतमृतुथायजस्व ॥ निपरीतिकिं ॥ इमंयमप्रस्तर माहिसीद ॥ इकारइतिकिं ॥ विसमनाभूमिः ॥ स्वरोदयइतिकिं ॥ दिवश्चरंति परिसद्योश्चंतान् ॥

सेध स्वापय सस्वजे सस्वजाते ससादच ॥ १५ ॥

चकारोच्चारणादेतान्पदादीन्निपरीनमंतः ॥ सेध ॥

वाचस्पते निषेध ॥ स्वापय ॥ निष्वापयामिथूदृशा ॥ सस्वजे । तमिंद्रःपरिषस्वजे । सस्वजाते । समानंवृक्षंपरिषस्वजाते । ससाद । निषसादधृतव्रतः ।

संतंसंतःसंतिपूर्वीःस्युःस्थाःस्थादितिचोत्तरः ॥१६॥

इतिच पदादीन्सकारानुत्तरोनामीनमति । कास्योत्तरःपाठक्रमेण परीति । संतं । अग्मेवत्समम्यपरिषंतं । संतः । नाद्रयःपरिषंतोवरंत । संतिपूर्वीः । ताइंविश्वतः परिषंतिपूर्वीः । पूर्वीरितिकिं । धन्वानवाताः परिसंत्यच्युताः । स्युः । यद्वोनद्वेषो वृषतापरिष्ठुः । स्थाः । परिष्ठा इंद्र मायया । स्थात् । मानोमर्त्तस्य दुर्मतिःपरिष्ठात् ।

हिषिंच तूषिंच रजःसुषीदन्नितोषिञ्चता भिषतः किमुष्वित् ॥ सूरिभिष्याम दिविषंतु केष्ठप्रतिष्फुर वीषधस्था कमुष्वित ॥१७॥

हिषिंच । तूषिंच । रजःसुषीदन् । इतोषिंचत । अभिषतः । किमुष्वित् । सूरिभिष्याम । दिविषंतु । केष्ठ । प्रतिष्फुर । वीषधस्था । कमुष्वित् । एतानियथागृहीतानि निपात्यंते । अध्वर्यवातुहिषिंच । तूषिंच । आतूषिंचहरिमींद्रोरुपस्थे । रजःसुषीदन् । बुध्नेनदीनां रजःसुषीदन् । इतोषिंचत । परीतोषिंचत । सोत्वषत्वे निपात्येते ॥ अभिषतः ॥ महोविश्वांअभिषतः । अभीषत

स्तदाभर । नन्वभिषत इतिनिपातनं च यथाश्रुतमेव गृहीतुंन्याय्यं । अतोभीषतस्तदाभरेत्यत्र षत्वंनप्राप्नोति । अभिशब्दस्य दीर्घत्वात् सत्यमेवतत् । यदिनामाधस्तादेव परिभाषितं यथासामवशाः संधयो नियतविषया अपवादकाभवंति नतुसर्वत्र । सामवशादितिचैवापदांजानीयात् अनुलोमाना मन्वक्षरसंधीनां नान्येषांतदिति । तथाचार्थकं भवति । नुषप्रेति । असंनुषप्रपूर्व्यं इत्युदाहरणं । अत्रप्रेतियद्विशेषणं तदनूसमर्त्तः शवसेत्यस्यनिर्धारणार्थं । यदिनुशब्दो दीर्घोपिविघातं षत्वमनकुर्यात् । तदाप्रशब्दग्रहणं सार्थकं स्यादिति । तस्मात्सामवशाः संधयोपवादका अनुलोमान्यक्षरसंधीनां नान्यत्रेतिसिद्धं । किमुष्वित् । किमुष्विदस्मै निविदोभनंत । किमितिकिं । इंद्रंकउस्विदाचक्रे । सूरिभिःष्याम । त्वंतोत्वावाधि सूरिभिःष्याम । दिविषंतु । उतस्वानासो दिविषंत्वग्नेः । कोष्ठ । कोष्ठानरश्रेष्ठतमाः । प्रतिष्फुर । प्रतिष्फुरविरुज । वीषधस्था । वीषधस्था सिंधवस्त्वः । कमुष्वित् । कमुष्विदस्य सेनया । कमितिकिं । उवक्षेकउस्विदंतमः ।

उषुवाणो दिविषन्त्सूरिभिःष्या
मृच्छंतिष्मनूष्ठिरंवंसुषीदति । नुषप्रह्विष्ठोयशसामघोषा । विषाभूयामोषुयतिष्ठनेतिच ॥१८॥

उषुवाणः । दिविषन् । सूरिभिःष्यां । मृच्छंतिष्म । नु-

ष्ठिरं। वंसुषीदति। नुषद्म। हिष्ठोयशसा। महीषा। विषा भूयामोषु। यतिष्ठन। इतिचयथागृहीतानिपदानिभवंति। उषुवाणाः। सोमउषुवाणःसोतृभिः। दिविषन्। दिविषन् छुक्रआततः। सूरिभिःष्यां। आवांसुम्ने वरिमन्त्सूरिभिःष्यां। ऋच्छंतिष्म ऋच्छंतिष्मानिष्पदो मुद्गलानीं। नृष्ठिरं। नृष्ठिरंमरुतोवीरवंतं। वंसुषीदति। श्येनोन वंसुषीदति। नुषद्म। भसंनुष प्रपूर्व्यः। प्रेतिकिं। प्रनुसमर्त्तःशवसा। हिष्ठोयशसा। दूतेवहिष्ठो यशसाजनेषु। यशसेतिकिं। युवंहिस्थःस्वर्पती। महीषा। विदेहिमातामहो महीषा। विषाह्योबा विश्वमश्नोति। भूयामोषु भूयामोषुत्वावतः। यतिष्ठन। विश्वेदेवासो मनुषोयतिष्ठन।

वाजीस्तुतो वहंतिसींपतिस्यां
दित्ससिस्तुतः। अपोसुम्यक्ष श्रु-
धिसुत्रिस्म स्तुहिस्तुहीतिन ॥१९॥

इत्येतेषुपदेषु यथाप्राप्तं षत्वंप्रतिषिध्यते। वाजीस्तुतः। वाजीस्तुतोविदथे दातिवाजं। वहंतिसीं। वहन्तिसीमरुणासोरुशंतः। पतिःस्यां। अस्यपतिस्यांसुगवः सुवीरः। दित्ससिस्तुतः। यद्दित्ससिस्तुतोमघम्। अपोसुम्यक्ष। अपोसुम्यक्षवरुणभियसमत्। म्यक्षेतिकिं। अपोषुणइयं। श्रुधिसु। इन्द्रश्रुधिसुमेहवं। त्रिःस्म। त्रिस्ममाह्नश्नथ योवैतसेन। स्तुहि स्तुही स्तुहिस्तुहीदेते घाते।

युग्मान्तस्थादंतमूलीयपूर्वैरंतः पदंनम्यतेन्तः पदस्थैः ॥ २० ॥

युग्मांतस्था पूर्वैर्नामिभि रुपहितः सकारः रेफवकारपूर्वैरित्यर्थः। दन्तमूलीयपूर्वैश्च नामिभिरुपहितः सकारोनम्यते। दन्तमूलीयः सकारस्तवर्गश्च अन्तः पदमेकस्मिन्पदे अन्तः पदस्थैः पदान्तवर्त्तिभि र्युग्मांतस्थापूर्वैः। त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत। विषितस्तुकारा रोदसीनृमणाः। दन्तमूलीयपूर्वैः सुषाव सोममद्रिभिः। सुषुवुषोम नीषां। दुष्टरस्तरन्नरातीः। युग्मांतस्था दन्तमूलीयपूर्वैरितिकिं। त्वयंयुष्मेभिर्विसखाह्व। सनाज्योतिः सनाह्वः। अन्तः पदस्थैरितिकं। पुरुहूत पुरुवसोसुरघ्नः।

अन्यपूर्वैरपि पद्यादिभाक्सन् ॥२१॥

अन्यपूर्वैरपि नामिभिरुपहितः सकारोनम्यते युग्मांतस्थादंतमूलीयपूर्वै रित्यपिशब्दार्थः। पद्यादिंभजतेयदि। अन्यपूर्वैः। अमूषक्योनः शकुनः। येत्वामृजन्नृषिषाह्य। युग्मांतस्था दन्तमूलीयपूर्वैः। इन्द्रस्यत्विष्टुबिह। ससंस्तरोविष्टिरः। वेदिषदेप्रियधामाय।

एकाररेफपृतनोपधश्च ॥ २२ ॥

एकारोपधोरेफोपधः पृतनोपधः चशब्दान्नम्यते पद्यादिसकारः एकारोपधः। धियोरथेष्ठा मजरन्नवीयः। रेफोपधः। स्वर्षामप्सां वृजनस्य पृतनोपधः। पृतनाषाह्यायच।

रेफकारकारपरः प्रकृत्या ॥ २३ ॥

इदानीमपवादः । रेफपरः ऋकारपरः ऋकारपरश्च सकारः प्रकृत्यासम्भवति । पुनातितेपरिस्रुतं । इन्द्रस्ययन्तु प्रसवेविसृष्टाः । तिसृणांसप्ततीनाम् ।

संस्पृक् स्वसस्वंरेति चाक्षराणां ॥ २४ ॥

सं । स्पृक् । स्व । सर । स्वर । एतेषांचाक्षराणां सकाराः प्रकृत्याभवंति । पदादौअपदादौ वासतां । सं । सुसमिद्धो न आवह । स्पृक् । दिविस्पृग्यात्यरुणानि । स्व । तेदेवाः परिस्वतेष्वेषु लोकेषु । शाङ्खायनब्राह्मणमेतत् । ननुनैवैत दुदाहरणं ॥ ब्राह्मणंह्येतत् नच ब्राह्मणस्याप्येतल्लक्षणंस्मृतं । मन्त्रस्य विधानात् । एवंतर्हि यथाजलाहारस्य मत्स्याहरणं । पुष्पाहारस्यफलाहरणमविरुद्धं एवमेतदपि । सर् । विसर्माणंकृणुहि । स्वर । मेयंविप्रा अभिस्वरा ।

सेतिचास्य परिपन्नो पधाचेत् ॥ २५ ॥

सइतिइत्थंभूतस्य चाक्षरस्यादिसकारः प्रकृत्याभवति । यदितदक्षरं सकारादनुस्वारस्योपधाभूतंस्यात् । सुसंसन्मित्रो अतिथिः । परिपन्नोपधाचेदितिकिं । निषदापीतयेमधु ।

संयोगस्य चाप्यनुनासिकादेः ॥ २६ ॥

संयोगस्यचापि कथंभूतस्यानुनासिकोवर्ण आदिभूतोयस्य तस्य यःसकारलक्षणोक्षरविशेषः उपधाभूतः सप्रकृत्याभवति । सुसन्दृशं सुप्रतीकं । सुसङ्काशा मातृमृ-

ष्टेवसीषा । संयोगस्येतिकिं । अभिस्वरा निषदागाः । अनासिकादेरितिकिं वज्रगोषुदुष्वप्न्यम् ।

सहस्रं सनिता स्थात्रां सावित्रंसूवरीस्नुषे । समुद्रं सह्यासारे सायकः साधनीसह । सनितः स्पष्टः सह्यः सखायंसप्तैरेते सानुशब्दश्चपद्याः ॥२७॥

एतेपद्याः सानुशब्दश्चसप्रवादः प्रकृत्याभवंति । सहस्रं । चतुःसहस्रंगव्यस्य । सनिता । सनेमतत्सुसनिता ॥ स्थात्रां । भूरिस्थात्रां भूर्यावेशयंतीं । सावित्रं । असावित्रमासाधिषद्गतिप्रैषैकदेशे । सूवरी । सुषूमाबहुसूवरी । स्नुषे । सुपुत्र आदुसुस्नुषे । समुद्रं । चतुःसमुद्रं धरुणं । सह्या । विसह्याजीविताभिप्रचक्षे । सारे । हिरण्ययकेशोरजसोविसारे । सायकः । द्युम्नीसुशिप्रोहरिमन्युसायकः । साधनी । चाहणोपशुसाधनी । सह । यथावःसुसहसति ॥ सनितः । सनितःसुसनितरुग्र स्पष्टः । अनुस्पष्टोभवत्येषोअस्य । सह्यः । यमाद्भवसुसह्यः सुपेशसः । सखायं ॥ तीव्रंसोमंपिबतिगोसखायं । सप्तैः । त्रिसप्तैः शूरसत्वभिः । सानुशब्दः । पृदाकुसानुर्यजतोगवेषणः ॥ इदाह्वित उग्रोअद्रिसानो । शब्दग्रहणमुक्तप्रयोजनम् ।

सुतेसोमे वक्षणेप्रामिचर्षणि स्वभिष्टीत्येवमुपधाश्च सर्वे ॥२८॥

इत्येवंशब्दोपधाभूताःसर्वएवपदादिसकाराःप्रकृत्याभवंति । सुते । सुतेसुतेन्योकसे । सोमे । यत्सोमेसोमआभवः । वक्षणे । सुसंशितावक्ष्योवक्षणेस्थाः । अप्रामि । अप्रामिसत्यमघवन्तथा । चर्षणि । हर्यश्वंसत्पतिं चर्षणीसहं । स्वभिष्टि । तूतुजिमिंद्रःस्वभिष्टिसुम्नः ।

अभिसत्वारयिस्थानोयासिसीष्ठाः सिसक्षिच । तिस्तिरेतिस्तिराणाच सिसिचेसिसिचुश्चन ॥२९॥

चकारःसमुच्चयार्थः एतेषुयथाप्राप्तंषत्वं प्रतिषिध्यते । अभिसत्वा । अभिवीरो अभिसत्वासहोजाः । रयिस्थानः । रयिस्थानोरयिमस्मासुधेहि । यासिसीष्ठाः देवस्यहेळो अवयासिसीष्ठाः सिसक्षि । छायेवविश्वं भुवनं सिसक्षि । तिस्तिरे । तिस्तिरेबर्हिरानुषक् । तिस्तिराणा यतस्रुचाबर्हिरुतिस्तिराणा । सिसिचे सेक्तेवकोशं सिसिचेपिबध्यै । सिसिचुः । बहुसाकं सिसिचुरुत्समुद्रिणं ।

गोष्ठादिवगोषतमा उपष्टुत्सप्रवाटोनार्षदः पर्यषस्वजत् । स्वादुषंसदः पुरुषंतिशब्दः सुषंसदं सुषमिधानुसेषिधत् ॥ ३० ॥

एतेषुपदेषुषत्वंनिपात्यते । गोष्ठादिव । गावोगोष्ठादि-

वेरते। गोषतमाः। दक्षिण्यामपार्यैंगोषतमाः। उपष्टुत्। शिवाश्चो वस्तवताउपष्टुत्। सप्रवादोनार्षदः। सर्वविभक्त्यन्तः। यन्नार्षदायश्चवः। पुरुसन्तोनार्षदं। पर्यषस्वजत्। यन्तौग्न्योनाधितः पर्यषस्वजत्। स्वादुषंसदः स्वादुषंसदः पितरोवयोधाः। सेतिचास्य परिपन्नोपधाचेदित्यस्यनिषेधस्य प्रतिप्रसवः। पुरुषंतिशब्दः सर्वविभक्त्यन्तः। याभिर्ध्वंसंतिं पुरुषंतिमावतं। ध्वस्नयोःपुरुषन्त्योः। संयोगस्य चाप्यनुनासिकादेरित्यस्य प्रतिप्रसवः सुषंसदं। परिप्रयंतं वय्यंसुषंसदं। सेतिचास्यपरिपन्नोपधाचेदित्यस्य प्रतिषेधस्यप्रतिप्रसवः। सुषमिधा। अग्ने भवसुषमिधासमिद्धः। समित्यक्षरनिषेधस्य प्रतिप्रसवः। अनुसेषिधत्। पदादेः सकारस्य षत्वेप्राप्ते परस्यषत्वंनिपात्यते षड्युक्तांअनुसेषिधत्। गोष्ठादिवेत्यादिपंचस्वप्राप्तेषत्ववचनं।

तकारेपूर्वपदांतो व्यापन्नोरेफसंहिते। नामिपूर्वः॥ ३१॥

तकारेपरचावस्थिते पूर्वपदस्यांतः। कथंभूतः। व्यापन्नः सत्वंप्राप्तः। अरेफसंलग्नेतकारे। नामिपूर्वः इतिपूर्वपदांतव्यापन्नस्यविशेषणं। षकारमापद्यते। प्रयाकांशास्मि प्रदिशोविदुष्टरः। आविष्टो वर्द्धतेचाश्वरासु। तकारइतिकिं। सप्तांतइन्द्रनिश्रुतः पूर्वपदांतइतिकिं। त्वमग्ने प्रमतिस्त्वंपितासिनः। व्यापन्नोच्चारणं परेदृष्टस्यसकारस्यषत्वंयथा स्यात्। अरेफसंहितइतिकिं। चतुस्त्रिंशद्वाजि-

नः । नाभिपूर्वंग्रहणं पुनः क्रियमाणमेकारस्य सङ्ग्रहणंकरोति । अग्नेष्ट्वास्येनप्राश्नामि ।

विग्रहेतु त्वातइत्यनुदात्तयोः ॥३२॥

विग्रहेतु पुनः त्वा । ते । इत्येतयोः परभावस्थितयो रनुदात्तयोः व्यापन्नं षत्वमापद्यते । त्वा । हविष्ट्वासन्तं हविषायजाम । ते । अभिष्टे अद्यगीर्भिः । अनुदात्तयो रितिकिं । यइतद्विदुस्ते अमृतत्वं ।

अग्निरेकाक्षरस्यादौ ॥ ३३ ॥

अग्निरित्ययं विसर्जनीयोव्यापन्न स्तकारादेरेकाक्षरस्य पदस्यादौ वर्त्तमानोनम्यते । अग्निष्टंब्रह्मणासह । एकाक्षरस्यादावितिकिं । अग्निस्तुविश्रवस्तमः ।

नकिश्च ॥ ३४ ॥

नकिरित्ययं विसर्जनीयोनम्यते । चकाराद्व्यापन्न स्तकारादावेकाक्षरेपदे परभूते । नकिष्टंकर्मणानशत् ।

अथोतनूष्विति ॥ ३५ ॥

अपि च तनूष्वित्येतस्मिन्पदे परभूते नकिरित्ययं विसर्जनीयो व्यापन्नोनम्यते । नकिष्टनूषुयेतिरे ।

तत्ततन्यु स्ततक्षुस्तं तौग्र्यमित्युत्तरेषु निः ॥ ३६ ॥

इत्येतेषु उत्तरपदेषुसत्सु निरित्ययंविसर्जनीयो व्यापन्नोनम्यते । तत् । निष्टज्जभार चमसन्नवृक्षात् । त-

तन्वुः । मिहन्वसूरो अतिनिष्टतन्वुः । ततक्षुः । येनादेकंस्वधया निष्टतक्षुः ॥ तं ॥ निष्टमूह्युः सुयुजारथेन ॥ तौग्र्यं ॥ निष्टौग्र्यं पारयथः समुद्रात् ॥

पायुभिः पर्तृभिस्त्रिभि र्ददिर्वेरस्मयुः शुचिः ॥ उत्तरेत्वमिति

इत्येतेषांपदानांविसर्जनीयोव्यापन्नः त्वमित्येतस्मिन्पदेउत्तरेनम्यते । पायुभिः । अदब्धेभिःसवितः पायुभिष्ट्वं । पर्तृभिः । पाषितोकंतनयंपर्तृभिष्ट्वं । त्रिभिः । त्रिभिष्ट्वंदेवसवितः । ददिः । ददिष्ट्वमिंद्रापांसिवाजान् । हरिवोददिष्ट्वं । वेः । पावकशोचेवेष्ट्वंहियज्वा । अस्मयुः । एतंघं समिंद्रा अस्मयुष्ट्वं । शुचिः । शुचिष्ट्वमसि प्रियोनमित्रः ।

ईयुष्टे वावृधुष्टेसधिष्टव ॥३७॥ गोभिष्टरेम क्रतुष्टम्

एतेह्येपदाव्यापंनोष्मकृत षत्वानिपात्यंते ईयुष्टे । ईयुष्टेये पूर्वतरामपश्यन् । वावृधुष्टे । पुरुशंसेन वावृधुष्टइंद्रं । सधिष्टव । अःत्वग्नेसधिष्टव । गोभिष्टरेम ॥ गोभिष्टरेमामतिंदुरेवां । क्रतुष्टं । इंद्रक्रतुष्टमाभर ।

नाहुर्निषिषध्वरीःप्रभोः ॥ वन्दारुः षष्टि राविस्त्रिर्वाह्वोरित्यनुदात्तयोः ॥३८॥

यदुक्तं त्वातदूत्यनुदात्तयो स्तदेतेषांपदानां संबंधिनोविसर्जनीयस्य नभवति । आहुः । आहुस्तेत्रीणि दिविबंधनानि । निःषिध्वरीः । निष्षिध्वरीस्त्वओषधीः । प्रभोः । प्रभोस्तेसतःपरियंतिकेतवः । वंदारुः । वंदारुस्ते तन्वंवंदेअग्ने । षष्टिः । त्रिःषष्टिस्त्वा मरुतोवावृधानाः । आविः । आविस्तेयस्यो भवतुप्रियोमदः । विः । विस्ते अन्नंकृणवत् । बाह्वोः । बाह्वोस्ते बलंहितं ।

ऋकाररेफषकारानकारं समानपदेवग्रह्ये नमंति । अंतःपदस्थ मककारपूर्वा अपिसंध्याः॥३६॥

ऋकारश्वरेफश्चषकारश्च ऋकाररेफषकाराः नकारंनमंति । समानपदेएकपदे वर्त्तमाने नकारेणसह । कथंभूतेपदेअवगृह्येद्विखंडे । कथंभूतंनकारं । अंतःपदस्थं पदमध्ये वर्त्तमानं । अककारपूर्वाइति ऋकारादीनांविशेषणं । अपिसंध्यासंध्यायामपि । संध्याःप्राकृताः । ऋकारस्य । पंथामनुप्रविद्वान्पितृयाणं । रेफस्य । प्रयाणेजातवेदसः । तदारभस्वदुर्हणो । षकारस्य । विदुर्विषाणं परिपानमंतिते । समानपदइतिकिं । विरनुव्रतेजने । अवग्रह्यइतिकिं । उष्ट्रानां विंशतिंशता । अंतःपदस्थमितिकिं । जुहुराणश्चिन्मनसा परियन् । अककारपूर्वाइतिकिं । यमासाकृपनीलं । योअग्निः क्रव्यवाहनः । अक्षानह्योनह्यतनोतसोम्याः । अनुव्रतेजने इत्यत्रप्राप्नोति पूर्वोनंता नतिषु नम्यमुत्तरमितिवचनान्नभवति ।

संध्यउष्माप्यनिंग्ये ॥४०॥

सन्धौ भवःसंध्यः । संधिजऊष्माप्यनिंग्ये पदेवर्त्तमानोणकारंनमति । यदिक्षोधमनुष्यवि । संध्यइतिकिं । मक्षीमे पश्यन्नृषनाम ।

नमध्यमैः स्पर्शवर्गैर्व्यवेतम् ॥४१॥

ननमंतिनकारमकाररेफषकाराः मध्यमैः स्पर्शवर्गैर्व्यवहितं । चवर्गटवर्गतवर्गामध्यमाः । ऋजुनीतीनोवरुणः । आनिवर्त्त नवर्त्तय । अभिष्टनेते अद्रिवः ।

परिप्रऋषींद्रादिषु चोत्तमेन ॥४२॥

परि । प्र । ऋषि । इंद्र । इत्येवमादिषुपदेषु पद्यादिषु उत्तमेनापिस्पर्शवर्गेण पकारादिनाव्यवहितं नकारमकाररेफषकारान नमंति । परि । परिपानमंतिते । यमस्यमाता पर्युह्यमाना । प्र । प्रमिनती मनुष्या युगानि । ऋषि । ऋषिमनाय ऋषिकृत्स्वर्षाः । इंद्र । इदंत्यत्याव मिंद्रयानं । आदिग्रहणादिहनभवतिनिषेधः । सुप्रपाणांभवत्वघ्न्याऽध्यः ।

तथाशकार सकार व्यवेतंसर्वादिषु ॥ ४३ ॥

यथाधस्तनयोर्मध्यमोत्तमवर्गयोर्व्यवेतं नकारमकाररेफषकारान नमंति तथासकारशकारव्यवेतंन नमंतिसर्वादिषुपदेषु । अहन्नहिंपरिशयानमर्णः । इदाहितऊर्णो-

षद्रिसानो । सर्वादिग्भ्यः परिप्रक्षपौद्रादि निहत्यथं ।

पूर्वपदांतगंच ॥ ४४ ॥

पूर्वपदस्य चांतगतं नकारमृकाररेफषकारा ननमंति । कर्मन्कर्मन्कृतमूतिः सजंकरः ।

नाभिनिर्णिक्प्रवादादौ ॥ ४५ ॥

नाभिनिर्णिक्शब्दयो रादिभूतंनकारं ऋकाररेफषकारा ननमन्ति । नाभि । रथेन वृषनाभिना । निर्णिक् । अतःसहस्रनिर्णिजा । पतरेवचचराचंद्र निर्णिक् । आदिशब्दोच्चारणं निर्णिक्शब्दस्योच्चारणस्य णत्वंसाधयति ।

यकार स्पर्शसंहितम् ॥ ४६ ॥

यकारसंलग्नं स्पर्शसंलग्नं नकारमृकाररेफषकारा ननमंति । यकारसंहितं । द्युम्नीसुशिप्रो हरिमन्युसायकः । स्पर्शसंहितं । हवन्ने परिषिच्यसे । सुषुम्णेषितत्वता यजामसि । यकारस्पर्शसंहितमितिकिं । प्रातर्याव्णः सहस्कृत ।

कर्मनिष्ठां दीर्घनीथे ॥ ४७ ॥

इत्येतयोः पदयो र्नकारमृकाररेफषकारा ननमंति । अग्निर्वीरं श्रुत्यं कर्मनिष्ठां ॥ दीर्घनीथेदमूनसि ।

भानुशब्दे ॥

भानुशब्दस्य नकारं ऋकारादयो यथासंभवं ननमंति ॥ स्वर्भानोरध ॥

हिनोमिच ॥ ४८ ॥

हिनोमिइतिच नकारमृकारादयो ननमंति । यांचांहोवां परिहिनोमि मेधया ।

ह्रस्वोदयंत्वेषपूर्वे वमादिषु ॥ ४९ ॥

ह्रस्वउदयमस्य नकारस्य सतथोक्तः । तद्ध्रस्वोदयं । त्वेषपुरुइत्येवमादिषुवर्त्तमानं नकारं रेफषकारौ ननमतः । त्वेष । यतोजज्ञ उग्रस्त्वेषनृम्णः । पुरु । पुरुनृम्णाय सत्वने । ह्रस्वोदयइतिकिं । पुरुणीथा जातवेदः ।

विशुभ्रयष्मादिषु चोभयोदयं ॥ ५० ॥

वि । शुभ्र । युष्माइत्येवमादिषुपदेषु । उभयोदयं ह्रस्वोदयं दीर्घोदयं चनकारं रेफषकारौ ननमतः । वि । विनाकिंचिद्विवेदिवः । विनाभिचक्रमजरमित्यस्य तु नाभिनिर्णिक्प्रावदेत्यनेन सिद्धः नप्रतिषेधः । शुभ्र । वहेथेशुभ्रयावाना । युष्मा । युष्मानीतो अभयं ।

अहकारेष्वधिक चाक्षरेषु पुरः पुनर्दुश्चतुर्ज्योतिरादिषु ॥ ५१ ॥

हकारवर्जितेष्वधिकाक्षरेषुच पदेषुचतुरक्षरादिषु चेत्यर्थः । उभयविशेषणविशिष्टानि पदानिगृह्यंते । पुरः । पुनः । दुः । चतुः । ज्योतिः । इत्यादिषुच नकारोवर्त्तमानोरेफारेफनिमित्तात् नतिंनलभते । पुरः । पुरोयावान-

माजिषु । पुनः । पुनरागाः पुनर्नव । दुः । दुर्भियंतुः परिप्रीतोनमित्र । चतुः । सजिह्वया चतुरनीकऋञ्जते । ज्योतिः । शंनोअग्निर्ज्योतिरनीकोअस्तु । अह्कारेष्वितिकिं । कुमारदेष्णा जयतः पुनर्हणः । अधिकव्यक्षरेष्वितिकिं । दुर्णामा योनिमाशये ।

उस्रयाम्णे नुस्रयाम्णे सुषाम्णे
वृषमण्यवो धिषवण्या प्रण्यः ॥५२॥

एतेषुषट्सुपदेषु णत्वंनिपात्यते । यकारस्पर्शसंहितमित्यनेन निषिद्धंसत् । उस्रयाम्णे । अरंम उस्रयाम्णे । अनुस्रयाम्णे । अरमनुस्रयाम्णे । सुषाम्णे । युवंवरो सुषाम्णे । स्पर्शसंहितानि चोदाहरणानि । वृषमण्यवः । समानमेकं वृषमण्यवः पृथक् । अधिषवण्या । जघनाधिषवण्याकृता । इमाउतेप्रण्यो ३ वर्धमानाः । एतानिचौभि यकारसंहितानि ।

दूढा दूणाश दूडभ प्रवादादु-
र्भूतमक्षरंतेषुनंत्व ॥ ५३ ॥

दूढ्य । दूणाश । दूडभ । एतेप्रवादाः कृतदंत्यमूर्धन्यभावा निपातिताः । नचाप्यत्र ऋकाररेफषकाराणामन्यतमोपि विद्यते । अतः कारणमपि दर्शयंति । दुरित्येतदक्षरं मात्रिकं । तद्भूतंद्विमात्रिकंसत् एतेषुनंढधकारनकारदकारेषु । दूढ्यं । नदूढ्ये ३ अनुददासि वामं । मन्युजनस्यदूढ्यः । दूणाशं । दूणाशंसख्यंतव चिकित्तमादूणाशा । दूडभ । दूडभेमित्रं-

वरूथोदूलभासः । परितेदूडभः ।

अव्यवेतंविग्रहे विघ्नकाश्चौरेफोष्माणौ सर्वपूर्वौयथोक्तं ॥ ५४ ॥

अव्यवेतंअव्यवहितं नकारंविग्रहे नानापदेवर्त्तमानं नकारमेवविघ्नकृद्भिः । विघ्नकर्त्तारस्त्रयो मध्यमवर्गाः । तैरव्यवेतं । नकारमेवरेफोष्माणौ रेफषकारौ नकारंनमतः । सर्वपूर्वौ ककारपूर्वावपि । यथोक्तं येनप्रकारेणोक्तमेतदधिकृतं वेदितव्यं । वक्ष्यति नयत्यर्थंच प्रपरीतिपूर्वाविति । अध्वरेषुप्रणीयते । वाजीसन्परिणीयते । अव्यवेतमितिकिं । इहश्रवो वीरवत्तत्ततानः । प्लुताकारांतं मषकारमितिप्राप्तिः । सर्वपूर्वाविति किं । शिक्षाणो अस्मिन्पुरुहूत । विग्रहग्रहणं समानपदाधिकार निवृत्यर्थं । रेफोष्मग्रहणं मकारनिवृत्यर्थं । यथोक्तग्रहणादिहनभवति । बलंधेहितनूषुनः ।

आनीन्नुत्यं नोनुवुर्नोनुमश्च नयत्यर्थंच प्रपरीतिपूर्वौ ॥ ५५ ॥

आनीत् । नुत्यं । नोनुवुः । नोनुमः । इत्येतानि च पदानि नयत्यर्थंच अर्थग्रहणा न्नयतेः सर्वाणि रूपाणि गृह्यंते । प्र । परि । इत्येतौपूर्वौ नमतः । आनीत् । अघेदुप्राणी दममन्निमद्दा । नुत्यं । प्रणुत्यंविप्रमध्वरेषु साधुं । त्यमितिकिं । प्रनूसमर्त्तः । नोनुवुः । अभिप्रणोनुवुर्गिरः । नोनुमः । इमाअभिप्रणोनुमः । नयत्यर्थंच । परि । वाजीसन्परिणीयते । अध्वरेषुप्रणीयते । पूर्वावि-

तिवचनात् व्यवहितस्यनभवति । प्रयंराये निनीषसि ।

पुरुप्रिया ब्रह्मसुतेषु नेषिप्लुताकारांतं सषकारमिंद्र। नतेसुस्मेतिसवनेषु पर्षिस्वरर्यमाप्रोरुपरीतितैर्नः ॥ ५६ ॥

पुरुप्रिया । ब्रह्म । सुतेसु । नेषि । प्लुताकारांतंसषकारं । मात्रिकोयोकारः सतद्वयावधाद्विमात्रिकः सन्प्लुत उच्यते प्लुतोकारोन्तेयस्य पदस्यतत्तथोक्तं । सहषकारेण वर्त्ततइतिसषकारंपदं । इन्द्र नतेसुस्मेति नतिंप्राप्तेसुस्म इत्येतेपदे । सवनेषु । पर्षि । स्वः । अर्यमा । प्र । उरु । परि । इत्येतैः पदैरुपहितंसत् नः इत्येतत्पदं नम्यते । पुरुप्रिया । पुरुप्रियाण ऊतये । ब्रह्म । ब्रह्माणइन्द्रोपयाहि । सुतेषु । शक्रोयथा सुतेषुणः । नेषि । नेषिणो यथापुरा । प्लुताकारांतंसषकारं । भराणोअभिवार्यं । अर्षाणः सोमशङ्गवे । प्लुताकारांतमितिकिं । तेनसोमाभिरक्षनः । सषकारमितिकिं । यत्रानश्चक्रा जरसंतनूनां । प्लुतग्रहणादिहनभवति । पूषानोयथावेदसां । इन्द्र । समिन्द्रणो मनसानेषि गोभिः । नतेसुस्मेति अभीषुणः सखीनां । मोषुणः परापरा । तऊषुणोमहो यजत्राः । आसुष्माणोमघवन् । नतेइतिकिं । प्रसूनआयुर्जीवसेतिरेतन । इन्द्रसूरीन्कृणुहि स्मानोअर्द्धम् । रारन्धिसवनेषुणः । पर्षि पर्षिणः पारमंहसः । स्वः । ईशानासोयेदधतेस्वर्णः । अर्यमा । अर्यमाणो अदितिः । प्र । प्रणस्पा-

ह्रीभि ह्नतिभिस्तिरेत । उरु । उरुणवाजसातये । परि । परिणःशर्म यन्त्या ।

हेडोमुंचतं मित्रायराया पूषागध्यविषच्छुक्कारवत् नव्येभिस्त्मनेवाजान्कृणोत ह्वनयप्रतरंपरेषुन॥

हेड: । मुंचतं । मित्राय । राया । पूषा । गधि । अविषत् । छुक्कारवत् । छुकारसंयुक्तंपदं । नव्येभि: । त्मने । वाजान् । कृणोत । ह्वे पदेनयप्रतरमित्येतेषु पदेषु परभूतेषु नद्वृत्येतस्यपदस्ययदुक्तं पुरुप्रियादिभि रूपपदैर्णत्वंतन्नभवति । हेड: । परिनोहेडो वरुणस्यवृज्या । मुंचतं । प्रनोमुञ्चतंवरुणस्य । मित्राय । प्रनोमित्राय वरुणायवोचः । राया । प्रनोराया परीणसा । पूषा । प्रनः पूषाचरथं । गधि । एन्द्रनोगधिप्रियः । अविषत् । सवाजेषु प्रनोविषत् । छुक्कारवत् । प्रनोयच्छत्वर्यमा । नव्येभि: । प्रनोनव्येभि स्तिरतंदे । त्मने । नूमित्रोवरुणो अर्यमानस्त्मने । वाजान् । प्रनोवाजान्रथ्यो २ अश्वबुध्यात् । कृणोत । देवी:षडुर्वी रुरुनःकृणोत । उर्वीतिणत्वेप्राप्ते प्रतिषेधः । ह्वनयप्रतरं । प्रनोनय प्रतरं वस्योअच्छ । ह्वइतिकिं । प्रणोनयवस्योअच्छ ।

गोरोहेणनिर्गमाणी न्द्रएणाद्रुन्द्रएणांस्वर्णंपराणुदस्व । अग्नेरवेणावार्णांशक्रएणाम् ।

इत्येतेषु नकारःसंधिजैरपि पूर्वपदस्थै र्निमित्तैर्नम्यते । गौरोहेण गौरोहेणतौग्रो नजिव्रिः । निर्ग माणि । तिरश्चतापार्श्वी निर्गमाणि । इन्द्रएणाः । इंद्रएणानियच्छतु । इन्द्रएणां इंद्रएणां प्रथमोअध्यतिष्ठत् । स्व १ र्णां ॥ स्व १ र्णंवस्तोरुषसामरोचि । परावृदस्व परावृदस्व मघवन्नमित्रान् । अग्नेरवेण मरुतां । वार्णं । वार्णंपथारथ्येवस्वानीत् । शक्रएणां । शक्रएणांपीपयद्विश्वयाधिया ।

एषानतिर्दंत्यमूर्धन्यभावः ॥५७॥

अंतःपदंनाम्युधः सकारइत्येवमादि यदुक्तंतन्नति रितिवेदितव्यं । दंत्यानांवर्णानां मूर्धन्यभावो नतिरित्युच्यते । नतिसंज्ञायाःप्रयोजनं । नति प्लुतोपाचरितधृति ।

इति श्रीपार्षदव्याख्याया मानंदपुरवास्तव्य वज्रटपुत्रोव्वटकृतौ प्रातिशाख्ये नतिपटलंपञ्चमम् ॥

स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः सक्रमोविक्रमेसन् ॥ १ ॥

स्वरेणानुस्वारेणच उपहितःसंयोगादिर्वर्णः अविक्रमेवर्त्तमानःसन् द्विरुच्यतेसएषविधिः क्रमसंज्ञोवेदितव्यः । आत्त्वारथं यथोतये । सोमानंस्वरणं । स्वरानुस्वारोपहित इतिकस्मात् । त्वावतःपुरूवसो । संयोगादिरिति कस्मात् । आतेपितर्मरुतां । अयंसयस्यशर्मन् ।(१)प-

---

(१) अविक्रम इति विषयसप्तम्यभिप्रायात्प्रथमोत्तमवर्गीयेस्पर्शेवेतितत्स्थानमूष्माणमापन्ने प्यनापन्नेपिजिह्वामूलीयोपध्मानीययोर्विसर्जनीयस्य द्वित्वन्नभवति । इतिवृत्तिः ।

यिक्रमइति कस्मात् । यःप्राणतोनिमिषतो महित्वा ।

सोष्मातुपूर्व्येण सहोच्यते सक्तत्वेन ॥ २ ॥

सोष्मातुवर्णः स्वेनपूर्व्येणास्ववर्गीयेण पूर्व्येणसह सक्तदुच्यते । विह्यक्तंमनसावस्य इच्छन् । चब्भाते वपुंसः

असंयोगादिरपि छकारः ॥३॥

संयोगं विनापि क्रामति । उपच्छायामिव घृणेः । स्वरानुस्वार इत्यनेन क्रमस्तुच्छ्येनेत्यत्र । तुच्छ्येनाऽभ्वपिहितंयदासीत् ।

परं रेफात् ॥४॥

रेफात्परं क्रामति । पर्वंवीरस्य । परं रेफादित्यविशेषोक्तत्वात् । रागादित्यत्र आकारस्य प्राप्नोति । स्वरोपहिताधिकारान्न । एवमपि पुरोहितमित्योकारस्यप्राप्नोति । संयोगाधिकारान्न सिद्धं स्वरोपहिता त्संयोगाद्रेफात्परमिति ।

स्पर्शएवं लकारात् ॥५॥

यथारेफात्परंव्यञ्जनं क्रामति एवंलकारात्परःस्पर्शः क्रामति । महत्तदुल्वं स्थविरं । स्वरोपहितात्संयोगादेरित्येव पलक्लाभवंतीः स्पर्शइति किं शतवल्शः ।

ऊष्मणोवा ॥६॥

ऊष्मणः परस्पर्शोवा क्रामति । प्रास्तौत् प्रास्तौदृष्वौजाः । आपोहिष्ठा मयोभुवः । प्रयस्यलक्षन् । आंगिरसां-

सामभि स्तूयमाना: । ऊष्मण:परेषां प्रथमद्वितीयानामेवस्पर्शानां द्विर्वचनमिष्यते न सर्वेषां । तस्मात्त्रि:ष्वइति ऊष्मण एवद्विर्वचनं भवति न परस्य । ईदृशानामिष्टमिति । कथमध्यवसीयतइतिचेत् । ऊष्मण्यघोषोदये लुप्यत इति भवानेनलघुनास्पर्शग्रहणेन सिद्धे अघोषस्पर्शोदयइति । त्विष्माक्रइत्यत्रमकारस्य द्विर्वचनप्रतिषेधार्थं यदघोषग्रहणंकरोति । तज्ज्ञापयति नसर्वेषांस्पर्शानां द्विर्वचनं भवतीति शाखान्तरेष्वपि दृश्यते । शपूर्वा: खयइतिशर: परेषांखयांद्विर्वचनं भवति । हकारात्सर्वेषांविभाषाद्विर्वचनमिष्यते ब्रह्मब्रह्म । स्पर्शइतिकस्मात् अश्व: । वह्व: । मह्य: । प्रस्व: । ह्वयुष्व ।

नावसितम् ॥७॥

न खलुपदावसाने वर्त्तमानंरेफात्परंव्यञ्जनंक्रामति । दर्त् । वर्क् ।

नरेफः ॥८॥

रेफश्च नक्रामति । अर्हंवीरस्य । नैतदुदाहरणं । नपरक्रमोपधेष्वनेनैवसिद्धत्वात् इदन्तर्हियुक्तं यत्रपरक्रमः प्रतिषिध्यते । दर्त् । वर्क् । अप्राप्तप्राप्त्यर्थं ।

वोष्मासंयुक्तो नुपधः ॥९॥

अनुपधः संयुक्तः ऊष्मणावाक्रामति । ह्वयाम्यग्निम् । स्वांतन्तिकोशा: अनुपधइतिकस्मात् मुहुगाक्रादुनीष्टत: वर्ष्यी ३ अह ।

नतूष्मास्वरोष्मपरः ॥१०॥

नतुखलुऊष्मास्वरपरोवाऊष्मपरोवाक्रामति । प्रत्युष्टर्षिं । पर्षिं । ऊष्मपरः यः सोमसख्येतव । किमर्थमिदमुच्यते । वयः सकारामाभूवन्(१) ।

न परक्रमोपधा ॥ ११ ॥

नतुखलुपरक्रमस्य उपधाक्रामति । मह्यत्तद्दुलवं । प्रास्तौत् ।

सहातिहाय पवमानयस्य ह्वेतनेचेत्युपहितः पदादिः छकारः ॥१२॥

सह । अतिहाय । पवमान । यस्य । ह्वेतनेच । इत्येतैः पदैरुपहितः पदादिश्छकारोनक्रामति । सह । सहस्तोमाः सहछन्दसः । अतिहाय छिद्रागात्राणि । पवमान । यत्पवमानछन्दस्यां । यस्यछायामृतं । ह्वेतनेच । अथस्माय छतन्वे २ तनेचछर्दिः । पदादिग्रहणमुत्तरार्थं । ह्विइतिकस्मात् । उतोतदस्मै मध्विच्छद्यात् ।

दीर्घाच्च मेतिवर्जं ॥ १३ ॥

दीर्घाच्चउपहितः पदादिश्छकारो नक्रामति । मा इत्येतद्दीर्घं वर्जयित्वा । मर्माणिते वर्मणा छादयामि । दीर्घेणेतिकस्मात् । उपच्छायामिव मेतिवर्जमितिकस्मात् । माच्छेरश्मौरिति । परादिरिति किं ऐच्छामत्त्वा ।

संयुक्तं तु व्यंजनं शाकलेन ॥ १४ ॥

---

(१) स्वरोष्मपरइतिकस्मात् । अदर्श्यायती तिखपुस्तकेदृश्यते

म्नः । तंव्वोदस्म मृतीषहं । तमर्वंतं । स्वेस्वेचेतिकिं । सिनीवाल्यै ।

लकारऊष्मस्वपिशाकलेन ॥ २० ॥

लेकारोभिनिधीयते । ऊष्मस्वपिप्रत्ययेषु । शाकलेनविधानेन । नारायासोनजल्हवः । वनस्पते शतवल्शः । शाकलेनेति कस्मात् । नजल्हवः । शतवल्शः ।

खकारेचैवमुदये ककारः ख्यातेर्धातोः ॥ २१ ॥

खकारेचोदये ख्यातेर्धातोः ककारः । अक्ख्यद्देवी । शाकलेनेतिकिं । अख्यद्देवः । एवंकथंशाकलेनाभिधीयते ।

रप्शतेर्वा पकारः ॥ २२ ॥

रप्शतेश्च पकारःशकारे एवं शाकलेनाभिधीयते । विरप्शी गोमती । शाकलेनेति कस्मात् । विरप्शीगोमती ।

पदांतीया यरवोष्मोदयाश्च स्पर्शाःपदादिष्ववरेवकारात् ॥ २३ ॥

पदातीयाःस्पर्शाः मकारंवर्जयित्वा यरवाऊष्मा इत्येतेषुच पदादिषुवर्त्तमानेषु उदयेषुशा कलेनाभिधीयंते । यद्द्यामि तदाभर । तद्रासभो नासत्या । यान्वोनरः । ऊष्मा । दध्यङ् ह ते । अर्वाक् छफाविव । शर्मन्स्याम । स्पर्शग्रहणं अंतस्थाधिकार निवृत्त्यर्थं । पदांतीयाइतिकस्मात् । त्वन्तान्संचेत्यत्र अंतःपातलक्षणस्य तका-

रस्यनभवतीतिषपदांतत्वात् पदादिष्वितिइतिकस्मात् । उद्धेतिसुभग इत्यत्रउकारस्य पदादित्वात् पूर्वस्यनभवति । षवरेमकारादितिकस्मात् । समाज्ञी श्वशुरेभव ।

असंयुक्तं शाकलम् ॥ २४ ॥

लकारऊष्मस्वपि शाकलेनेत्येव मादि यदनुक्रांतं शाकलंतदसंयुक्तं भवतीति शाकलमताभिधानंत्वसंयुक्तस्यभवतीति वेदितव्यं । उक्तान्येवो दाहरणानि ।

तन्नपद्येस्वित्युत्तरे ॥ २५ ॥

नखलुशाकलं वेदितव्यं । सुइत्येतस्मिन्नुत्तरे पद्ये । अप्स्वग्नेसधिष्टव । स्वित्युत्तर इतिकस्मात् । यद्यक्षामि ।

वाल्वनेकाक्षरान्त्याः ॥ २६ ॥

अनेकाक्षरांत्या स्तुस्पर्शाः वाशाकलमापद्यन्ते पद्येस्वित्युत्तरे । वाजमर्वत्सुपय उस्रियासु । अनेकाक्षरांत्याइतिकस्मात् हत्सुक्रतुंवरुणो अप्स्व १ ग्निं ।

सर्वत्रैकेकरणस्थान भेदेवाशाकलम् ॥ २७ ॥

सर्वत्रपद्येचापद्येच एकेआचार्याः करणभेदे स्थानभेदेच विभाषाशाकलमिच्छन्ति करणभेदे क्रियतइतिकरणं प्रयत्नतः वर्णात्मगुणतत्वतातस्यभेदे सत्करसुनः ।

स्थानभेदे ।(१)षड्भ्याः । यड्विंश । उभयोर्भेदे । अस्थेक्षे । वृषदरसत् । करणस्थानभेदइतिकस्मात् । नत्तदग्निः यत्तेयमं । वास्वनेत्वावरांत्वाइति । प्रकृतेकग्रहणेपुनर्वाग्रहणं अनेकाक्षराधिकारनिवृत्त्यर्थं ।

प्रथमेस्पर्शवर्गे ॥२८॥

प्रथमस्पर्शवर्गस्य एकेषाचार्याः शाकलमिच्छंति । ख व्यक्स्रवंति । अर्भग्रयं । प्रत्यङ्विवस्वंतः ।

स्पर्शायमा ननुनासिकाः स्वान्परेषु स्पर्शेष्वनुनासिकेषु ॥२९॥

अननुनासिकास्पर्शाः स्वान्यमानापद्यन्ते । अनुनासिकेषु स्पर्शेषु परेषु । पलिक्नीरित् । परिग्मन् । छवर्णं परिषिच्यसे । परिक्ष्मान्निव । आक्नातेवातः । यस्त्वनादन्यंपरि । वघ्नासूनो । दाहृणादघ्नमि । आत्मनंतीर्थं । गृभ्णामिति । स्पर्शाइति कस्मात् । अत्र । दधिक्राव्णः । अननुनासिकाइतिकस्मात् । अर्वाङ्नरा । समन्यायंति । स्वानितिकिमर्थमुच्यते । संज्ञाप्रकरणेचतस्रोलिस्थाः अष्टाउष्माणाइतिवर्णाः कृतसंख्या निर्दिश्यंते । नतथायमाः । तस्मादिदं स्पर्शायमाननुनासिका स्वानिति इत्युच्यमानेविंशतित्वात्स्थानिनोस्वादेशानामपियमानांविंशतित्वप्रसंगःसमाभूत् । चतुर्णामेवयमानां प्रथमा प्रथमं द्वितीया द्वितीयंएवमापंचमा दापद्येरन्नित्युच्यते

---

(१) अस्मात्प्रभृत्युदाहरणं खपुस्तके ।

स्पर्शेष्विति कस्मात्। उपस्थाएका। अनुनासिकेष्विति कस्मात्। बर्हिष्ठ।

न स्पर्शस्योष्मप्रकृतेः प्रतीयाद्यमापत्तिम् ॥३०॥

न खलु स्पर्शस्योष्मप्रकृते र्यमापत्तिं विजानीयात्। प्रश्नोध्रुवच्छ्मश्रुषु।

नाभिनिधानभावं ॥३१॥

अभिनिधानभावं चोष्मप्रकृतेः स्पर्शस्य न प्रतीयात्। घनेव वष्विन्छुथि श्वि।

यमः प्रकृत्यैव सदृक् ॥३२॥

यमः प्रकृत्या एव सदृक् भवति यस्य यमापत्तिरुच्यते तत्स्वरूपो वेदितव्यः। प्रकृत्यर्थं किमुक्तं भवति। यमः प्रकृत्याश्रयाणि कार्याणि लभत इत्यर्थः। तस्मात् उपध्मातेवदृत्यत्र सोष्मानुरूपो भवतीत्यर्थः। पलिक्नीरित्यत्र ककाररूपो यमो वेदितव्यः। अग्मन्निति गकाररूपो वेदितव्यः। जघ्नुरित्यत्र घकाररूपः। परिज्मानमिति जकाररूपः। अप्नस्वतीरिति पकाररूपः।

श्रुतिर्वा यमेन मुख्यास्ति समानकाला ॥३३॥

अथवा यमोच्चारणेन समानकाला मुख्येभवा श्रुति-

रस्ति । यथा यमस्तद्रूपो लक्ष्यते । पलिक्नीः यक्ष्मं गृभ्णामि । यस्माद्यमा अनुनासिकास्थानाश्चत्वारः संतो विंशतिस्थानिनां तद्रूपा लक्ष्यन्ते तस्मादिदमुच्यते ।

अनन्यास्तु प्रकृतेः प्रत्ययार्थे ॥३४॥

अनन्यास्तुप्रकृतेः प्रत्ययार्थेयमावेदितव्याः प्रकृत्यर्थे । किमुक्तंभवति यमःप्रकृत्याश्रयाणि कार्याणिलभतइत्यर्थः । तस्मात्उपध्मातेव इत्यत्रसोष्मात्तु पूर्व्येणसहोच्यते सकृदिति दकारेणसहोच्यते यमः ।

नसंयोगं स्वरभक्ति विंहंति ॥३५॥

न खलु संयोगकार्याणि स्वरभक्तिर्विंहंति । यासुजूर्णिः श्रेणिः सुम्नआपिर्हृदेचक्षुः । स्वरमंत्याक्षरमिति स्वरभक्ति व्यवायेपिपरं रेफादितिक्रामति ।

यमान्नासिक्या स्वरभक्तिरुत्तरा गार्ग्यस्य ॥३६॥

यमादुत्तरा नासिकस्थाना स्वरभक्तिरागमोभवति । गार्ग्यस्य भगवतोभि प्रायेण । पलिक्नीरित् परिज्मानमिव ।

ऊष्मासोष्माणः ॥३७॥

तस्यैवाभिप्रायेण सोष्मणो यमादुत्तरोनासिकास्थान ऊष्मा आगमोभवति । अस्मान्नादन्यंपरि ।

वर्जयेत्तम् ॥३८॥

तमूष्माणं वर्जयेत् । अमश्नादन्यं ।

नादःपरोभिनिधानाद्ध्रुवं तत्तत्कालस्थानम् ॥३९॥

घोषवतः अभिधानात्परो नादआगमोभवति । ध्रुवसंज्ञंच तद्भवति । तत्कालस्थानमभि निधानकालस्थानमित्यर्थः । अर्वाग्देवाः । यद्वाअदः । तत्रैकआङ्गः । ध्रुवकालमनिर्दिश्य मल्पत्वात्कवयोविदुः । यद्विप्रागणुमावायाः कालभेदेपितत्समं । नादोह्यभिनिधानेन पीड्यमानेननश्यति । तस्मादुच्चार्यतेयस्य यावद्वर्णात्मनःपरं । एकांतलोपं कवयोवर्णयंति ध्रुवस्यच । नासिकास्थानं रक्तस्य यथाह्रपाणिनिर्दिशेत् । सप्तमीकालनिर्दिष्टे पूर्वस्यविधि रिष्यते । पंचम्यास्तूत्तरस्याङ्गः तस्मात् कृच्छ्रस्त्वणुर्भवेत् । इति । ध्रुवसंज्ञायाः प्रयोजनं । सवर्णपूर्वस्यसहध्रुवस्येति ।

अश्रुति त्वघोषात् ॥ ४० ॥

अघोषात् अभिनिधानात्तु ध्रुवंअश्रुतिर्भवति । गायत्याम यत्ते ।

नासिकास्थान मनुनासिकाच्चेत् ॥ ४१ ॥

नासिकास्थानं ध्रुवंवेदितव्यं । अनुनासिकादभि निधानात् यदिपरं भवति । अर्वाङ्नरा । तन्मेजुषस्व ।

अन्तस्थायाः पूर्वस्वरूपमेव ॥ ४२ ॥

अन्तस्थायाः ध्रुवंपूर्वस्वरूपमेव भवति । यंयंयुजं वयं वयंते । तंवोदस्मं । पर्वतश्चित् । इमंस्तोमं ।

व्याडेः सर्वत्राभिनिधानलोपः ॥४३॥

व्याडेराचार्यस्य सर्वत्राभिनिधानस्य लोपोभवति । उपध्मातेव धमति । अर्वाग्देवाः सर्वत्रगृहण मन्तस्थाधिकार निवृत्त्यर्थं ।

परक्रमे स्वररेफोपधेन ॥ ४४ ॥

व्याडेराचार्यस्य परक्रमेच स्वरोपधेचरेफोपधेच लोपो भवति अभिनिधानस्य । परक्रमे [illegible] । स्वरोपधे अर्वाग्देवाः ॥ कथमिद मुभयत्र उदाह्रियते । लोपेच अलोपेच द्वयोर्गकारयो रुत्तरस्मिन्नभिनिधानलोपः । पूर्वस्मिन्नलोपः । तस्मा दुभयत्रो दाह्रियते । रेफोपधे । परावम्भीरभृत् ।

सवर्णपूर्वस्य सहध्रुवस्य विपर्ययोध्रु वशिष्टे परेषां ॥ ४५ ॥

एतस्मिन्ध्रुवशिष्टे विधाने अपरेषामाचार्याणां सवर्णपूर्वस्य ध्रुवसहितस्य विधानस्यविपर्ययो वेदितव्यः । कश्चविपर्ययः अलोपइति प्रकृतं तस्यविपर्ययोलोपः ।

यद्देवाः । व्याडेः सर्वत्राभिनिधानलोपइति एवंविधे नियमार्थमिदमुच्यते । तत्रपूर्वस्यैव स्यात् । इह मा भूत् । अर्वाग्देवा इतिपरक्रमस्वररेफोपधेन इत्येवानुवर्त्तते । सच ध्रुवस्येति कस्मात् यत्तेयमं ।

रेफात्स्वरोपहिताद्व्यञ्जनोदयाऋकारवर्णा स्वरभक्तिरुत्तरा ॥४६॥

रेफात्स्वरोपहिताद्व्यञ्जनोदया ऋकारवर्णा स्वरभक्तिरुत्तरा उपजायते । यदद्यकर्हिकर्हिचित् । पर्चन्त्यर्कमर्किणः । स्वरोपहितादिति कस्मात् । पाद्रांपदंकृणुते । व्यंजनोदयादिति कस्मात् । सुह्रपकृत्तुं ।

विच्छेदात्स्पर्शोष्मपराच्चघोषिणः ॥ ४७ ॥

विच्छेदात्घोषिण अभिनिधाना त्स्पर्शपराच्च ऊष्मपराच्च स्वरभक्तिरुत्तरा उपजायते । अर्वाग्देवाः । शतवत्शः स्पर्शोष्मपरादिति कस्मात् । यद्वद्यामि तदाभर । घोषिण इति कस्मात् । सम्यक् स्रवंति ।

द्राघीयसीतूष्मपरा ॥ ४८ ॥

ऊष्मपरात्तु या स्वरभक्तिः द्राघीयसी वेदितव्या । यदद्य कर्हि कर्हिचित् । ऊष्मपरेति कस्मात् । पर्चन्त्यर्कमर्किणः ।

ह्रतराक्रमे ॥ ४९ ॥

हृतराच स्वरभक्तिः । धृतराकतरा याऽनूष्मपरा सा तुद्राघीयसीतस्या अपेक्षयाहृतराहृस्वा । अर्चंत्यर्कं । अनूष्मपरेति कस्मात् । वर्ष्यां २ अह । अदर्श्यायती ।

सर्वत्रैकेस्वरभक्तेर भावं ॥ ५० ॥

सर्वत्रांत:पदेच नानापदेरेफाच्च विच्छेदाच्च स्वरभक्तेरभावं एकेआचार्या मन्यंते । वर्ष्यान् अग्निर्हत्यं । अर्वाग्देवाः ।

रेफोपधामपरे विद्यामानां ॥ ५१ ॥

रेफोपधांस्वरभक्तिं अपरेआचार्या विद्यमानांमन्यंते । बर्हि । अर्चंति । रेफोपधामितिकस्मात् अर्वाग्देवाः ।

अक्रांतोष्मप्रत्ययाभाव मेके ॥ ५२ ॥

अक्रांतउष्माप्रत्ययः यस्याः स्वरभक्तेः तस्याः अभावंएके आचार्यामन्यंते । वर्षं । अदर्शि । जलहवः । अक्रांतइति कस्मात् । वर्ष्यान् । अदर्श्यायती ।

पूर्वोत्तरस्वर सरूपतांच ॥ ५३ ॥

पूर्वोत्तरस्वर स्वरूपतां उत्तरस्वरस्वरूपतांच स्वरभक्तेरेके आचार्यामन्यन्ते । नकेवलमृकाररूपास्वरभक्तिर्भवतीत्यर्थः । धूर्षदमितिउकार रूपास्वरभक्तिः बर्हिषदइति इकाररूपास्वरभक्तिः ।

ऊष्मोदयंप्रथमं स्पर्शमेके द्वितीयमाहु रपदांतभाजं ॥ ५४ ॥

उष्मोदयं प्रथमं स्पर्शमपदांतभाजं एकेआचार्याद्वितीयमाहुः । अश्वः पुरं प्रत्यं चंजगार । प्रत्यङ्स्वमसुंयन् । शतक्रतुःत्सरत् । विरप्शीगोमती । अपदांतभाजमिति कस्मात् । ऋक्सामाभ्यां । विराट् सम्राट् । आप्स्वग्ने ।

(१)कश्यातौ खकारयकारा उएके॥५५॥

कश्यातेर्धातोः ककारशकारयोः स्थानेखकारयकारौ कर्तव्यौ एकेआचार्यामन्यन्ते । चख्यहे वः ।

तावेवख्याति सदृशेषु नामसु ॥५६॥

तावेवखकारयकारौ ख्यातिसदृशेषुनामसुकर्तव्यौ मन्यन्तेएके आचार्याः । सख्ये सखायस्तन्वे तनूभिरिति ।

इति श्रीपार्षदव्याख्यायां आनंदपुरवास्तव्य वज्रटपुत्रोव्वटकृतौप्रातिशाख्यभाष्ये षष्ठंपटलं समाप्तम् ॥

इति प्रथमोध्यायः ॥ ओं

---

(१) ख्याताविति खपुस्तकपाठः ।

दीर्घं ह्रस्वोव्यंजने न्यस्त्वृकारा
द्यथादिष्टं सामवशःससंधिः ॥१॥

ऋकारादन्योह्रस्वःदीर्घत्वमापद्यते । व्यञ्जनेप्रत्यये इत्येतदधिकृतंवेदितव्यं । इतउत्तरं यचयत्वक्ष्यामः तत्र तत्रोदाहरिष्यामः । सामवशोनाम ससंधिर्वेदितव्यः । व्यञ्जनग्रहणं स्वरेदीर्घत्व प्रतिषेधार्थं । नैतदस्ति प्रयोजनं स्वरेषुहि सर्वेषु सन्धयोविधीयंते । तेऽस्यबाधका भविष्यंति । लृकारोभकारस्य नकिंचिद्विधीयते तत्रस्यात् नैव लृकारादिपदमस्ति तस्मादंतरेणापि व्यञ्जन ग्रहणं व्यञ्जनएव भविष्यति । नसिध्यति । कथंमह्नित्वेत्यत्र प्रतिपदविधाना दीर्घत्वंप्रसज्यते । अस्तु कृतेपि दीर्घत्वे समानाक्षरस्याविघाता दंतस्यापत्ति र्भविष्यति । तथा सति परेहृष्टेष्विति वचनान्नप्राप्नोति । तस्मा द्व्यञ्जनग्रहणंक्रियते । एवमपि नकर्त्तव्यं । प्रतिपदविधानस्य व्यञ्जनेसावकाशत्वात् । इहमह्नित्वेत्यत्र उभयप्रसङ्गे शास्त्रानुपूर्व्येण संधयोभवंतीति पूर्वमेवांतस्यापत्तौकृतायां उकाराभावादेव नदीर्घत्वं भविष्यति । तस्मान्नार्थो व्यञ्जनग्रहणेन इहतर्हि अच्छऋषेमारुतमित्यत्र ऋकारउदये कंठ्या वकारमितिकृतेपि परेहृष्टोह्रस्वोपि विद्यतइति दीर्घत्वंप्राप्नोति तत्प्रतिषेधार्थं व्यञ्जनग्रहणं क्रियते । नैकमुदाहरणंव्यञ्जनग्रहणंप्रयोजयतीति । यद्येतावत्प्रयोजनं स्यात् । नास्येति व्यञ्जनोपध इत्येतस्मिन्प्रकरण एवास्यनिपातनं कुर्यात् । अच्छऋषइति तस्मात्सर्वस्मिन्दीर्घभावे व्यञ्जनएवप्लुतिःस्यात् स्वरेमाभूदित्येव-

मर्थं व्यञ्जनग्रहणं कृतंद्रष्टव्यम् । यदुक्तमधस्ता त्प्रतिपदविधानस्य व्यञ्जनेसावकाशत्वात् मध्वित्येत्यत्र उभयप्रसङ्गे शास्त्रानुपूर्व्येणैव पूर्वमेवातस्यापत्तौ कृतायामुकाराभावादेव प्लुतरप्राप्ते व्यञ्जनग्रहणानर्थक्यमिति । तदेतदसम्यगुक्तं कथं । येनैकस्मिन्नुभे तुल्यबले युगपत्प्राप्नुतः तत्र शास्त्रानुपूर्व्येणसंधिर्भवति । यथा तवेमे इत्यत्रइत्यस्यपदावस्थायामेव उदात्तपूर्वंस्वरितमनुदात्तमित्यनुदात्तत्वे कृतेउत्तरेणसंधौ क्रियमाणे उदात्तपूर्वंनियतं विहत्याव्यञ्जनेनवा । स्वर्यते न्तर्हितमिति स्वरितस्य प्राप्नोति । इकारोदयं एकारमकार इतिचसंधिः । तयोःशास्त्रानुपूर्व्येण पूर्वसंधिर्भवति । अतोन्यत्र पूर्वानुत्सर्गा न्बाधित्वाउतरे ह्यपवादाभवंति । यथा भूतंदेवानामवमे अवोभिरित्यत्र अवीरतेवां स्यवोरथा इति । प्रतिपदविधानमपि अभिनिहितं संधित्वं बाधित्वाअपवादान्तरं कस्येतिकरणादौप्रकृत्यास्वरेषु चाप्यीमिति प्रकृतेर्भावोभवति । एवमध्वित्येत्येव मादिष्वप्यपवादत्वात् दीर्घत्वं प्रसज्यते । तस्माद्व्यंजनग्रहणं क्रियते । अन्यस्त्वृकारादित्यनर्थकं । कथं । पदान्तादिष्वेव विकारशास्त्रं विधीयते नहि ऋकारांतं पदमस्तिक्कवा प्रयोजयतिइति । सर्वत्र पूर्वपदांताः प्लवंते वसुमघयोःपरयोरित्यत्र प्रयोजयति । यद्यस्ति पितृवसु मातृवसुरितिवा यथादिष्टंग्रहणं अनादिष्टानां यज्ञस्यदेवमादीनां(१)प्रतिविशेषणार्थं । यदि सर्वेषांह्रस्वानां सामान्येनैवदीर्घत्वंस्यात् । उत्तरेषा मनुक्रमणामनर्थक्यं स्यात् । नानर्थकं नियमार्थमेव तत्स्यात् यथा अमुष्यामसुष्मिन्नवेति ।

---

(१) प्रतिषेधार्थमितिख पुस्तकपाठः ।

सैवाप्लुतिः ॥२॥

साएवप्लुतिरिति वेदितव्या । याह्रस्वस्य दीर्घता । प्लुतिसंज्ञायाः प्रयोजनं । प्लुतोपाचरिते नतिरिति ।

यास्वरेषूपदिष्टा ॥३॥

याच स्वरसंधिषूपदिष्टा एवांपन्निमविषु साचप्लुतोपधेति ह्रस्वस्यदीर्घता वेदितव्या ।

योनिमारैगादिषु चोदयादेः ॥४॥

योनिमारैगित्येवमादिषुच उदयादेर्ह्रस्वस्यदीर्घतानिपातिता साचप्लु ति रित्यववेदितव्या । तस्मा त्प्लुतादीनी त्युच्यन्ते ।

मध्विवत्युकारः प्लवतेसर्वत्राप्य पदांतभाक् ॥५॥

मध्विवत्यवोकारःप्लवतेसर्वत्राप्यपदांतभाक् । किंपुनः पदांतभाक् । मधूदेववतः । मधूमधूकबाहि । मधूयुभिर्नरा । उकारग्रहणमकारस्याप्रसङ्गार्थं । नैतत्प्रयोजनं । पदांतादिष्वेवविकारशास्त्रविधिः । अथापदांतभागितिप्राप्नोतितन्निवृत्त्यर्थमुकारग्रहणं । सर्वत्रग्रहणं क्रियते सर्वत्रपूर्वपदांताः प्लवंतेवसुमघयोरितिनियमादिति । मधूमधूकबाहीत्यत्रपूर्वपदस्यदीर्घत्वंनस्यादिति । अंतः पादाधिकारनिवृत्तिस्थापनार्थंवा । तस्मात् प्रनव्यसासहसः सूनुमच्छायज्ञेन । वैश्वानरंमनसाग्निंनिचाय्याहविष्मंतः । अच्छावोपत्निमवसहत्येवमादिषुदीर्घत्वंसिद्धंभवति ।

सुतायाह्वीत्यतोन्येषुपदेष्वक्षेतिविग्रहे ॥६॥

सुताःयाह्वीत्येताभ्यामन्येषुअक्षइत्येतत्पदंविग्रहेवर्त्तमानंप्लवते । अक्षावदतवर्स । सुतायाह्वीत्यतोन्येष्वितिकस्मात् । इन्द्रमक्षसुताइमे । अक्ष्याह्यावह । विग्रहग्रहणमपदांतभाग्रहणादिनिवृत्त्यर्थम् । अधिकारार्थंचनिवृत्त्यर्थत्वात् । गोकामामेअक्षदयन्नितिनभवतिअधिकारार्थत्वात् । पुरुहूतंपुरुष्टुतमित्यत्रसाधंमद्यादिभिः प्लुतैः पादांदावितिनभवति यथा । यद्वापुरूपुरुभुजेतिषष्ठ-चाष्टाक्षरेक्षरमितिनभवति । यद्ययंविग्रहाधिकारस्तथाप्यनुवर्तते । अंतः पादंविग्रहएवप्लुतइतिकिमर्थम् । तस्यप्रयोजनंतत्रैववक्ष्यामः ।

अनाकारोपधस्यांत्योयेत्युत्तरपदस्ययः । उदात्तादेर्द्व्यक्षरस्य ॥७॥

अनाकारोपधइतिउदात्तादेर्द्व्यक्षरस्योत्तरस्यपदस्ययोन्त्यः सचप्लवते । आपूयाधृष्णोअभिगूर्यात्वं । अनाकारोपधइतिकस्मात् । परिदायरसंदुहे । अनाकारोपधस्यांत्योयेत्युत्तरइतिकस्मात् वैश्वानरंमनसाग्निंनिचाय्याहविष्मंतः इत्यत्रांतोयोयकारः आकारोपधोनभवति । अंत्यइतिकस्मात् । इमांसमेतपश्यत । उत्तरपदस्येतिकस्मात् । मर्यश्रीस्पृहयद्वर्णः । उदात्तादेरितिकस्मात् । अप्रामिसत्यमघवन् । द्व्यक्षरस्येतिकस्मात् । सुवीर्यस्यपतयः स्याम । नैतदुदाहरणंयुक्तं । नास्येतिव्यं-

जनोपधइत्येवंसिद्धत्वात् । प्रतिबिम्बस्यवीरानितियथा । तस्मात् आमूरजप्रत्यावर्त्तयेत्येवंविधमन्यद्व्यंजनोदयंमृग्यं ।

नास्येतिव्यंजनोपधः ॥८॥

नखलुपस्येत्ययमंतः प्लवतेव्यंजनोपधः सन् । राजाभिकुष्टेहृपंमस्ययत्नैः । तेजिष्ठयातितिथिम्बस्यवर्त्तनी । व्यंजनोपधइतिकस्मात् । अवास्याग्निशुमतीरदीदेः ।

नियूयपिष्टतमयाभिपद्यप्रास्यसंगत्यानुदृश्याभिहृत्य । आरभ्यसंमील्यमक्षूंगमाभिरभिव्लग्ययचनिषद्यवीतिच ॥९॥

इत्येतानिपूर्वलक्षणप्राप्तानिनप्लवंते । नियूयपिष्टतमय । वनस्पतेरशनयानियूयपिष्टतमयावयुनानिविद्वान् । पिष्टतमयेतिकस्मात् । वनस्परतरशनयानियूयादेवानां । अभिपद्य । तएतेवाचमभिपद्यापायया । प्रास्य । प्रास्यपारंनवतिम् । संगत्य । सर्वाः संगत्यवीरुधः । अनुदृश्य । पूर्वेषांपंथामनुदृश्यधीराः । अभिहृत्य । अभिहृत्यमपत्नान् । आरभ्य । येत्वारभ्यचरामसि । संमील्य । संमील्ययद्भुवना मक्षूंगमाभिः मक्षूंगमाभिरूतिभिः । अभिव्लग्यय । अभिव्लग्ययत्कृताः । यत्रेतिकस्मात् । अभिव्लग्याचित् । निषद्यावि । पिबा निषद्याविमुचा । वीतिकस्मात् । सध्र्यंचानिषद्या हृष्णाः । चकार एवैकस्य समुच्चयार्थः ।

नहि जह्यभिवीर्येण कृधीति कृणुथेतिच । एतान्येकाक्षरे पदे क्षैप्रोभाव्ये ॥१०॥

नहि । जहि । अभि वीर्येण । कृधीति । कृणुथ । इत्येतानिच पदानिच प्लवंते । एकाक्षरेपदे परे क्षैप्रसन्धीभूते प्रत्यये । नहि । नहीन्वस्यप्रतिमानं । जहि । जहीन्य १ त्रिणं । अभि अभीष्व १ र्यः पौंस्यैः । इन्द्रमाता वीर्येणान्पृष्टं । कृधीष्व १ स्मांअदितेः । कृणुथ । अच्छे चिदस्मै कृणुथान्यंचनं । एतानीति कस्मात् । उतोनोअस्या उषसोजुषेतह्य १ र्कस्य एकाक्षरइति कस्मात् । तमर्यमाभिरक्षति । क्षैप्रीभाव्यइति कस्मात् । नहिनुते महिमनः समस्य ।

पराणि च ॥११॥

पराणि च यानि वक्ष्यामः तानिचप्लवंते क्षैप्रीभाव्ये । तान्युत्तरत्रोदाहरिष्यामः । क्षैप्रीभाव्यइति कस्मात् । मनोवाताअधनुधर्मणिग्मन् ।

युक्ष्वमंदस्व विद्मेतिहीति ॥१२॥

युक्ष्व । मंदस्व । विद्म । इत्येतानि प्लवंते । हीत्येतस्मिन्प्रत्यये । युक्ष्व युक्ष्वाह्यरुषीः । सार्धंमद्यादिभिः प्लुतैरिति सिद्धेसंयोगपरार्थग्रहणं । समंदस्वाह्यंधसः । विद्माह्यस्यवीरस्य । संयोग परार्थमेव ग्रहणं ।

विड्ढिपिबत्विति ॥१३॥

विड्ढि । पिब । इत्येते प्लवेते । तुइत्येतस्मिन्प्रत्यये । विड्ढीत्व १ स्यनोवसो । पिबात्व १ स्यगिर्वणः । संयोगपरार्थं ग्रहणं ।

जुहोत यज धासथशिश्रीतभरेतिस्विति ॥१४॥

जुहोत । यज । धासथ । शिश्रीत । भर । इत्येतानिसुइत्येतस्मिन्प्रत्यये प्लवेते आजुहोतास्वध्वरंजनं । संयोगपरार्थं ग्रहणं । तन्नः शद्धधासथास्विंद्रियं । तंशिश्रीता स्वध्वरं । यथोदयानितिसिद्धे संयोगपरार्थं ग्रहणं । भर । त्वंपुरूण्याभरास्वश्व्या ।

सुनुहीत्येतेषु परेष्वघेति ॥१५॥

सु । नु । हि । इत्येतेषुपरेषु अघइत्येतत्पदंप्लवते । सु । रुद्रस्यमर्या अघास्वश्वाः । नु । अघान्वस्य सदृशंजगन्वान् । हि अघाह्यग्नेक्रतोः । संयोगपरार्थं ग्रहणं ।

दृंपर्त्तेनमुंचताद्येतिवीति ॥१६॥

दृंप । ऋतेन । मुंचत । अद्य । इत्येतानिविइत्येतस्मिन्प्रत्यये प्लवंते । तृंपाव्यस्तुहीमदं । दृढशुषौस्त्तहते नाव्यायन् । एवोष्व १ स्मन्मुंचताव्यंहः । संवत्सर इदमद्याव्यख्यत ।

सुन्वित्यनर्थपरयोरुकारः पदं ॥१७॥

सु । नु इत्येतयोरनर्थंपरयोः उकारः पदंप्लवते । सु । इमामूष्वा सुरस्य स्तुतस्य । नु । कदून्व १ स्याहतं । अनर्थ-परयो रितिकस्मात् । यस्माद्दूरस्य सीदुन्व १ योवा । संयोगपरार्थं ग्रहणं । पदमितिकस्मात् । वहस्यासुष्वश्व्यं ।

तयोरुत्तरयोजघेति ॥ १८ ॥

तयोः सुनु इत्येतयोः उत्तरे इत्येतस्मिन्प्रत्यये । योज । घ । इत्येते प्लवेते । योज । योजान्विंद्र तेहरी । घ । प्रघा-न्वस्य महतः । यथोदयेतिसिद्धे संयोगपरार्थं ग्रहणं । एतावान्दैर्घीभाव्याधिकारः ।

मृलयद्भ्यां वसुवित्तमं यत्सोमजातवेदसं । भरतेत्येतेषु ॥ १९ ॥

मृलयद्भ्यां । वसुवित्तमं । यत् । सोमं । जातवेदसं । इत्येतेषुभरतेत्येतत् प्लवते । मृलयद्भ्यां । हव्यंमतिभ्भरताम्मृलयद्भ्यां । वसुवित्तमं । भरता वसुवित्तमं । यत् । भरता यज्जुजोषति । सोमं । अपावप भरता सोममस्मै । जातवेदसं । प्रदेवंदेव्याधिया भरताजातवेदसं ।

अपादांतः ॥ २० ॥

अपादांत इत्येतदधिकृतंवेदितव्यं । इतउत्तरं यक्ष्यामः । वक्ष्यति चिन्महित्वं गीर्गृणानः सतेपरन्वितीति । प्रनुमहित्वं वृषभस्य वोचं । अपदांत इतिकस्मात् । महांइंद्रः परश्चनुमहित्वं ।

अद्येति करणादिषु ॥ २१ ॥

अद्येत्येतत्प्लवतेकरणादिषुप्रत्यये करणादीन्युत्तरत्रोदाहरिष्यामः ।

करणंच चित्करते वृणीमहे भवतंकृणोतुभवतस्वस्तये ॥ २२ ॥

तेइमेकरणादयः । येपूर्वसूत्रेनिर्दिष्टाः । करणं । च । चित् । करते । वृणीमहे । भवतं । कृणोतु । भवतः । स्वस्तये । इत्येतेषुअद्येत्येतत्प्लवते । करणं । प्रतत्ते अद्याकरणंकृतं । च । अद्याचनोमृळयत । नैतदुदाहरणं । सार्धमद्यादिभिः प्लुतैः पादादावितिसिद्धत्वात् । एवंतर्हि । अधीइव मद्याचमृळय । एवमन्यान्यपि पादमध्यस्थान्युदाहरणानि । चित् । तदद्याचित्तउक्थिनः । करते । कोवामद्याकरतेरातहव्यः । वृणीमहे । सूक्तैरद्यावृणीमहे । भवतं । विश्विन्नोअद्याभवतं । कृणोतु । भद्रंसोमः सुवानोअद्याकृणोतुनः । भवत अर्वाञ्चोअद्याभवतायजत्राः । स्वस्तये विश्वदेवानोअद्यास्वस्तये ।

पूर्वितिचित्पुरुहूतो नृषूतः सहस्राणि पुरुभुजा धियायते ॥ २३ ॥

पुरुइत्येतत्प्लवते । चित् । पुरुहूतः । नृषूतः । सहस्राणि । पुरुभुजा । धियायते । इत्येतेषु प्रत्ययेषु । चित् । तिरः पुरूचिदर्णवंजगन्वान् । पुरुहूतः इंद्रः पुरु पुरुहू-

तः । दृष्टूतः । सिमापुरू नृषूतोऽस्यानवे । सहस्राणि । त्वं पुरू सहस्राणि । यद्वा पुरुभुजा । पुरूपुरुभुजा । धियायते । एषपुरूधियायते ।

वहेति त्वंदुहित दैव्यमुतरं ॥ २४ ॥

वहइत्येतत्प्लवते । त्वं । दुहितः । दैव्यं । इत्येवमुत्तरं । त्वं । आदाशुषे जातवेदो वहात्वं । दुहितः । आवहादुहितर्दिवः । दैव्यम् । आवहादैव्यञ्जनं ।

द्युम्नं रुद्रंनव्यमेतेषु वर्धय ॥ २५ ॥

द्युम्नं । रुद्रं । नव्यं । इत्येतेषु प्रत्ययेषु वर्धयइत्येतत्प्लवते । द्युम्नं । आयंसहो वर्धयाद्युम्नमिंद्र । रुद्रं । रुद्रं दिवावर्धयारुद्रं । नव्यम् । बृहस्पतिं वर्धयानव्यमर्कैः ।

चिन्महित्वं गोर्गृणानःसतेपरं न्वित्यंत्येचे न्मर्त्तशब्दाद्रिवः परे ॥ २६ ॥

चित् । महित्वं । गीः । गृणानः । सः । ते । इत्येवंपरं नुइत्येतत्प्लवते । अंत्येचेत्पदे मर्त्तशब्दे परेवा अद्रिवः परेवा भवतः । चित् । मह्याचिन्नूचित् । महित्वं । प्रनूमहित्वं । गीः । इंद्र वेपीव कारीयस्यनूगीः । गृणानः । नूष्टुतइंद्रनूगृणानः । सः । प्रनूसमर्त्तः शवसा । ते । येचा

कनंतचा कनंतनूतेमर्त्ताः । उतो अभूमन हिनूतेषद्रिवः । अन्त्येचेन्मस्त्तंयब्द्वाद्रिवः परेइतिकस्मात् । भसन्नुषप्रपूर्व्यः । नहिनुते महिमनः ।

तूतुजानोमतिभि र्भोजनानि नोदद्धिस्तोमं भूरियोनिं त्वमेषु । भरेत्येत् ॥ २७ ॥

तूतुजानः । मतिभिः । भोजनानि । नः । दद्धि । स्तोमं । भूरि । योनिं । त्वं । इत्येतेषु प्रत्ययेषु भरइत्येतत्प्लवते । तूतुजानः । अस्मादृदुप्रभरातूतुजानः । मतिभिः । भूर्तिंनभरामतिभिः । भोजनानि । यन्नूयतामाभराभोजनानि । नः । सुपेशसं वाजमाभरानः । दद्धि । मानोमर्द्धीरा भरादद्धि । स्तोमम् भूषन्निव प्रभरा स्तोममस्मै । भूरि । संगृभ्यान आभरा भूरिपश्वः । योनिं । धासिमिव प्रभरायोनिमग्नये । त्वं । विश्वावसून्याभरात्वंनः ।

न नुचिद्यः ॥ २८ ॥

नुइत्येतच्चिद्य इत्येवमुत्तरं नप्लवते । उतोनुचिद्यो ओजसा । यइतिकस्मात् । अद्याचिन्नूचित् ।

भवेति स्तोतृभ्यो द्युम्नीशतमेपरेषु ॥ २९ ॥

भवइत्येतत्प्लवते । स्तोतृभ्यः । द्युम्नी । शत । मे । इत्ये-

तेषुपरेषु । स्तोतृभ्यः । भवास्तोतृभ्यो अंतमः । स्वस्तये । भवाद्युम्नी वावृधस्व । शत । पूर्भवाशतभुजिः । मे । अभिप्रेहिदक्षिणतोभवामे ।

शोचायविष्ठ्यैवायथाकर्ता यत्
सादयासप्त । अर्चामरुद्भ्यस्तिष्ठानः
सनास्वः पारयानव्यः ॥३०॥

शोचायविष्ठ्य । एवायथा । कर्त्तायत् । सादयासप्त । अर्चामरुद्भ्यः । तिष्ठानः । सनास्वः । पारयानव्यः । इत्येतेषां द्वैपदानां पूर्वपदांताः प्लवंते । शोचायविष्ठ्य । इहशोचायविष्ठ्य । एवायथा । नकिरेवा यथात्वं । कर्त्तायत् । ज्योतिष्कर्त्तायदुश्मसि । सादयासप्त । देवांईळेसादयासप्तहोतॄन् । अर्चामरुद्भ्यः । दिवोअर्चामरुद्भ्यः । तिष्ठानः । ऊर्ध्वस्तिष्ठानऊतये । सनास्वः । सनाज्योतिः सनास्वः पारयानव्यः । अग्नेत्वं पारयानव्यः ।

बोधास्तोत्रे चकृमा ब्रह्मवाहः
शंसागोषूक्षादुहितर्वदातना ॥
अजानष्टं जंभयाता अधामहोगंतामायुक्ष्वाहि
सुजावनस्पते॥३१॥

बोधास्तोत्रे । चकृमाब्रह्मवाहः । शंसागोषु । उक्षादुहित्तः । वदातना । अजानष्टं । जंभयाताः । अधामः । गंत्तामा । युक्ष्वाहि । सुजावनस्पते । इत्येतेषांच प्ल-

वंते पूर्वपदांताः । बोधास्तोत्रे । बोधास्तोत्रे वयोदधत् । चकृमा ब्रह्मवाहः । त्वयाहवि श्चकृमा ब्रह्मवाहः । शंसागोषु । प्रशंसा गोष्वघ्न्यं । उच्छादुहितः । व्युच्छादुहितर्दिवः । वदातना । अच्छावदातनागिरा । अजानष्टं । अजानष्टं यथापशुं । जंभयाताः । अभिसति जंभयाता अनह्वसः । अधामहः । मह्नामधामहः । गंतामा । आगंतामारिषण्यत । युक्ष्वाहि । अग्नेयुक्ष्वाहियेतव । सृजावनस्पते । अवसृजावनस्पते ।

अग्नेरक्षाणस्तिष्ठा हिरण्ययं सोतावरेण्यंशोचामरुद्वृधः ॥ शिक्षास्तोतृभ्यो भूमाविवंधुरः पिबामधूनां सोतापरीतिच ॥३२॥

इत्येतेषां पूर्वपदांताः प्लवंते । अग्नेरक्षाणः । अग्नेरक्षाणो अंहसः ॥ अग्नइतिकस्मात् ॥ तेनसोमाभिरक्षनः ॥ तिष्ठाहिरण्ययं रथंतिष्ठा हिरण्ययं ॥ सोतावरेण्यं ॥ सोमं सोतावरेण्यं ॥ शोचा मरुद्वृधः ॥ शम्नशोचामरुद्वृधः ॥ शिक्षास्तोतृभ्यः । शिक्षास्तोतृभ्यो मातिधग्भगोनः ॥ भूमाविवंधुरः ॥ सपप्रथानो अभिपंचभूमाविवंधुरः । आव्यभूमेति सिद्धे संयोगपरार्थं ग्रहणं । पिबामधूनां । अग्रं पिबामधूनां । सोतापरि । आसोता परिषिंचत ॥

सच्त्वमिमिच्त्व दधिष्व वसिष्व श्रोतसुनोत ह्निनोतं प्रुनात ॥ विह्म जगृभ्म ररम्म ववन्म च्ताम सुपप्तनि,मन्थ तमत्स्व। सररद,रगा जिन्वधारयार्षच्तर यजयच्छदभ्रस्य साधसेध । तपऋज मृलवर्द्धयावयाचश्रवय नमस्यविदाष्ट क्षपवजोष । शृणुधि शृणुतयंतयच्छ तस्तवसिम गृह्त कुत्रमोषथ । दिधृतपचतद्दश्वविध्यताथ मदथात्तय दीतपाथन। उपागत्या क्वलीक्षत्यवभ्राजा विष्टनो रुष्य । दूष्कर्तेलिष्वंमर्मृज्म बिभये यर्त्तंतच्छतं । साधंमद्यादिभिः प्लुतैः पादादौ व्यंजनोदयं । न्वेववर्जं नसंयोगे शेषेचा पठितेसति ॥ ३३ ॥

सश्व । मिमिक्ष्व । दधिष्व । वसिष्व । श्रोत । सुनोत । हिनोत । पुनात । विद्म । जगृभ्म । ररभ्म । ववन्म । चाम । सुपप्तनि । मंथत । मत्स्व । सर । रद । रथ । जिन्व । धारय । अर्ष चर । यज । यच्छ । दशस्य । साध । सेध । तप । भज । मृळ । वर्ध । यावय । अव । अवय । नमस्य । विद । अष्ट । कृष्व ओष । शृणुधि । शृणुत । यंत । यच्छत । स्तव । सिम । गूहत । कुव । मोषथ । दिधृत । पचत । हृष । विध्यत । अथ । मदथ । अत्त । यदि । इत । पायन । उपागत्य । अक्खलीकृत्य । वव्राज । अविष्टन । उरुष्य । इष्कर्त्त । ईळिष्व । मर्हयम । विभय । इयर्त्त । इत्यंतं एकोनसप्ततिसंख्यं पदं यदनुक्रान्तम् अद्य इत्येवमादिभिः प्लुतैः भव, बोध, शिक्षेत्यादिभिरनुक्रांतैः अहेतिशेषः अपादार्थं मनुक्रांतैः पादादौच संयोगपरार्थं । सोच । तिष्ठ सोत इत्येतैस्त्रिभिः पुनरुक्तै विनाएकत्रिंशतासार्धं तच्छतंपादादौ प्लवते । व्यंजनेप्रत्यये । व्यंजनाधिकारेतुपुनर्व्यंजनगृहणस्यप्रयोजनमुक्तं । नूष्टुतइंद्रगृणानः । रक्षाणो ब्रह्मणस्पते इत्येवमादिषुषत्वणत्वयोः कृतयोः पदेहृष्टेपि व्यंजनमावेस्यादिति । सच्व । सच्वादेव प्रयास्पुरः । मिमिक्ष्व । मिमिक्ष्वा समिलाभरा । दधिष्व । दधिष्वा जठरेसुतं । वसिष्व । वसिष्वा हिमियेध्य । श्रोत । श्रोता हवंजरितुरेव यामरुत् । सुनोत । सुनोता सोमपाव्ने । हिनोता नोअध्वरं देवयज्या । पुनात । पुनाता दक्षसाधनं । विद्म । विद्मातेअग्नेत्रेधा जगृभ्म । जगृभ्माते दक्षिणं । ररभ्म । ररभ्मा शवसस्पते । ववन्म । ववन्मानुते युज्याभिरूती । चाम । चामाये विश्वधा-

यसः । सुपप्तनि सुपप्तनीये दधुः श्वोदसः । मंथत । मथता नरः कविमद्वयंतं । मत्स्व । मत्स्वा सुशिप्रमन्दिभिः । सर । सरा रसेव विष्टपं । रद । रदापूषेवनः सनिं रक्ष । रक्षा योअस्यधर्मभिः । जिन्व । जिन्वाधियोवसुविदः । धारय । धारया चमसां इवविवक्षसे । अर्ष । अर्षासोमद्युमत्तमः । चर चराणोअभिवार्यं । यज । यजानो मित्रावरुणा । यच्छ । यच्छा नः शर्म सप्रथः । दशस्य दशस्या नः पुर्वणीकहोतः । साध । प्रनिव्रवोदितये तुराय साधा दिवः । सेध । द्युमत्तमं दक्षंधेह्यस्मे सेधाजनानां । तप । तपातपिष्ठ तपसा । रुज । रुजादृळ्हा चिद्रक्षसः । मृल । मृलानो रुद्रोतनः । वर्ध । वर्धानो अमवच्छवः । यावय । यावया वृक्यं १ वृकं । अव । अवातिदृप मुत्तममपश्यं । श्रावय श्रावया वाचंकुविदंग । नमस्य । नमस्या कल्मलीकिनं । विद विदा चिन्नुमहांतः । अष्ट । अष्टापरः सहस्रा । कृण्वाकृत्नो अकृतं । जोष । जोषा सवितर्यस्यतेहरः शतं । शृणुधि । शृणुधी जरितुर्हवं । शृणुत । शृणुता मह्मंहवं यंत । यंता नोऽवृकंछर्दिः । यच्छत । यच्छता नोदुष्परिहंतुशर्म । स्तव । स्तवा नुद्रूहपूर्व्या । सिम । सिमा पुरुनृषूतः । गूहत । गूहता गुह्यंतमः । कुच । कुचा चिद्यस्यसमृतौ । मोषथ । मोषथा वृक्षंक पनेव दिद्युत । दिद्युता यच्चदुष्टरं । पचत । पचता पक्तीरवसेकृणुध्वमित् । इष । इषा मध्यंप्रत्यग्रं । विध्यत । विध्यता विद्युतारक्षः । अथ अथा तेअंगिरस्तम । मदथ । मदथा वृक्तबर्हिषः । अत्त अत्ता हवींषि । यदी । यदीगोभिर्वसायते । इत । इतामरुतो अश्विना । पाथन । पाथना शंसात्तनयस्य । उपागत्य । उपागत्येत्युदाहरणं संहितायांनदृष्टंतत्ताविदमुदाहरणं

हुष्टं । उपागच्छ्या सोम्यासोम्या स पक्वलीकृत्य । पक्वलीकृत्यापितरं नपुत्रः । सव्राज । सव्राजासीमनदतौरदब्धाः । श्रविष्टन श्रविष्टना पैजवनस्य केतु । उरुष्य । उरुष्या णो अघायतः । इष्कर्त्त । इष्कर्त्ता विह्रुतं पुनः । ईळिष्व । ईळिष्वा हि प्रतीव्यं । मर्मृज्म । मर्मृज्मा ते तन्वं । बिभय । बिभया हि त्वावतः । वृयक्त । वृयक्ता मरुतो दिवः । इमे सन्त्यादय उदाहृताः । (१)न्वेववर्जंनसंयोग

---

(१) अथादीनीदानीमुदाहरिष्यामः । अथ । अथादेवासः पिपृत । पुरु । पुरुचवृत्राहनति । वह । वहानोहव्यंप्रथमः । वर्द्धय । वर्द्धयावाचंजनयापुरंधिं । नु । नूचपुराचसदनं । भर । भरापिबनर्याय । भव । भवामित्रोनशेव्यः । शोच । शोचाशोचिष्ठदीदिहि । एव । एवाहितेविभूतयः । कर्त्त । कर्त्तानःस्वस्तिमतः । सादय । सादययोनिषुत्रिषु । अर्च । अर्चादेवायाग्नये । तिष्ठ । तिष्ठाहरीरथआयुज्यमाना । सन । सनाचसोमजेषिच । पारय । पारयातुर्वशंयदुंस्वस्ति । बोध । बोधासुमेमघवन् । चक्रम । चक्रमासत्यराधसे । शंस । शंसामहामिन्द्रंयस्मिन् । उच्छ । उच्छादिवोदुहितः । वद । मृग्यमुदाहरणं । अजा । अजावृतइन्द्रशूरपत्नीः । जंभय । जंभयाकृकदाश्वं । अध । अधातेविष्णोविदुषा । गंत । गंतानोयज्ञंयज्ञियाः । युक्ष्व । युक्ष्वारथंनभुज्यवद्भिरश्वैः । सृज । सृजावत्संनदाम्नः । रक्ष । रक्षाणोब्रह्मणस्पते । सोत । सोताहिसोममद्रिभिः । शिक्ष । शिक्षाणोअस्मिन्पुरुहूत । भूम । भूमापृष्ठेवरुरुहुः । पिब । पिबासोममिन्द्रमंदतु । पादादावितिकस्मात् । द्यावानोअद्यपृथिवीअनागसः । अत्रैववोपिबामि । नूचिद्दधिष्वमेगिरः । न्वेववर्जंनसंयोगइतिकस्मात् । नु एवइत्येतेपदेवर्जयित्वायच्छतंतत्संयोगेनप्लवते । अधत्वावन्वत्सुरेकणः । पुरुत्वादाश्वान्वोचे । अधत्वमिन्द्रान्वसूय १ स्मान् । पिबस्वधैनवानां । न्वेववर्जमितिकस्मात् । नूष्टुतइन्द्र । एवात्वामिन्द्रवज्रिन् । शेषेचापठितेसति । शेषेचदीर्घप्लावविधाने । असंयोगइत्यधिकृतंवेदितव्यं । न्वेववर्जमितिचानिवृत्तंवेदितव्यं । किमविशेषेणासंयोगाधिकारः । नेत्याह अपठितेसति । स्वस्तयउत्तरापि । नवास्त्वच्छिद्रइत्येवंयत्रपाठोनास्तितत्राधिकारोद्रष्टव्यः । वक्ष्यतियथोदयानीति । तत्संयोगेनभवति । सपिस्पृशातितन्विश्रुतस्य । प्रतुद्रवपरि । यथावाअव्यस्तिपकादशिक्षादशिवोर्लक्षणमिति । तत्संयोगेनभवति । अत्रदेवाअमृतमुपप्रभूषन् । तिरःपवित्रंपरियन्नुरुज्रयः । इहेन्द्राग्नीउपह्वये । अपठितइतिकस्मात् । त्यंसुमेषंमहयास्वर्विदांतौ आदित्याँअनुमदास्वस्तये । नवास्त्वच्छिद्रमवेति । त्वांहिष्माच्यावयन्नच्युतानि ।

हूतिकिं । नृष्टुतहूंद्र । एवात्वामिंद्र बज्रिन् नसंयो गहूतिकिं । अधस्मा नो मघवन्नकृतादित् । शेषिचापठितेसतीतिकिं । अधात्वंहि नस्करः । अधत्वामिंद्र विध्य १ स्मान् ।

वर्धंशुभ्रे ऋजयः सेधराजन् वह्निह्व्यानि यदिमे ऽधयामनि । विश्वदातार मधधारया ऽधतेविश्वं पुरुवार्चगाय । वह्नवायोपिबमध्वः पुरुविद्वान्पुरुविश्वान्यधवायुं पुरुमस्त । यदिमृत्यो रधजिह्वा पुरुविश्वा पिबशुभ्रं पिबराये वह्नकुत्सं । भरद्वाजेर्चदेवाय यदिवापुरुदाशुषे । वह्निशुष्णायाधबह्वधयत्पुरुह्वीतिन ३४॥

वर्धंशुभ्रे । ऋजयः । सेधराजन् । बह्निह्व्यानि । यदिमे । अधयामनि । विश्वदातारं । अधधारया । अधतेविश्वं । पुरुवा । अर्चगाय । बह्नवायो । पिबमध्वः । पुरुविद्वान् । पुरुविश्वानिअश्ववायुम् । पुरुमस्त । यदिमृत्योः । अधजिह्वा । पुरुविश्वा । पिबशुभ्रं । पिबराये । वह्नकुत्सं । भरद्वाजे

र्चद्देवाय । यद्दिवा । पुरुदाशुषे । वहभुण्याय । अधवद्रु अधयत् । पुरुहीति । इत्येतेषु यथाप्राप्ताप्लुतिर्नभवति । वर्धंशुभे । वर्धंशुभेस्तुवते । रुजन्नः । रुजयस्त्वापृतन्यति । सेधराजन् । सेधराजन्नयस्विधः । वहहव्यानि । वहहव्यानि सुमनस्यमानः । यद्दिमे । यद्दिमे सख्यमावरः । अध्वयामनि । अधयामनि प्रसितस्यतद्वेः विद्मदातारम् । विद्मदातारमिषम् । अधधारया । अधधारया मध्वापृचानः । अधतेविश्वं । अधतेविश्व मनुहासदिष्टये । विश्वमितिकस्मात् । अधातेविष्णो विदुषाचित् । पुरुवा । पुरुवारं पुरुत्मना । अर्चंगाय । अर्चंगाय चवेधसे । वहवायो । वहवायो नियुतोयाहि । पिबमध्वः । पिबमध्वस्तृपदिंद्राहृषस्व । पुरुविद्वान् । पुरुविद्वां अच्चीषम । पुरुविश्वानि । पुरुविश्वानि जूर्वन् । अधवायुं । अधवायुन्नियुतःसश्चतस्वाः । पुरुशस्त । पुरुशस्त मधत्तये । यद्दिमृत्योः । यद्दिमृत्यो रंतिकन्नीतएव । अधजिह्वा । अधजिह्वा पायतीति । पुरुविश्वा । पुरुविश्वा जनिम मानुषाणां । पिबशुष्हं । पिबशुष्व स्तुदकमाचरंती । पिबराये । पिबराये शवसेहूयमानः । वहकुत्सं । वहकुत्स मिंद्रयस्मिन्नाकन् । भरद्वाजेर्चं देवा य । अर्चंदेवायवरुणायसप्रथः भरद्वाजइतिकस्मात् । अर्चादेवायाग्नये । यद्दिवा । यद्दिवा दधेयद्दिवान । पुरुदाशुषे । पुरुदाशुषे विधयिष्ठोअंहः । वहभुण्याय । वहभुण्याय वध ङ्कुरसम् । अधवद्रु । अधवद्रु वित्तमः । अधयत् । अधय देषान्नियुतः । पुरुहि । पुरुहि वापुरुभुजादेष्णम् ।

कृधीति परेषु सहस्रसांधियं जरित्रे न इति ॥३५॥

कृधीतिपदं प्लवते । सहस्रसां । धियं । जरित्रे । नः । इत्येतेषु परेषु । सहस्रसां । कृधी सहस्रसामृषिं । धियं । कृधीधियं जरित्रेवाजरत्नां । जरित्रे । कृधीजरित्रे मघवन्नवः । नः । कृधीन ऊर्ध्वांचरथाय जीवसे ।

तत्रेतिचांत्ये ॥३६॥

तेषांप्रत्ययानां अंत्ये नइत्येतस्मिन् प्रत्ययेतत्र इत्येतत्पदंप्लवते । तत्रानो ह ब्रह्मणस्पतिः ।

सहस्रेन सुश्रवसं पवस्व ह्वेनोषधी त्येषुपरेषुतेन ॥३७॥

सहस्रेन । सुश्रवसं । पवस्व । ह्वेनोषधि । इत्येतेषुपरेषु तेनइत्येत त्प्लवते । सहस्रेन । तेनासहस्रेनावयं । सुश्रवसं । तेनासुश्रवसं जनं । पवस्व । तेनापवस्वां धसा । ह्वेनोषधि । तेनानोषधिवोचत । ह्व इतिकस्मात् । तेननो मृळजीवसे ।

देवंवेनं केतमित्त्युत्तरेषु दधातेति ॥३८॥

देवं । वेनं । केतं । इत्येतेषुपरेषु दधातेति प्लवते । देवं । दधातादेव मृत्विजं । वेनं । दधातावेन मादिशे । केतं । दधाताकेत मादिशे ।

श्रुधि वंस्वेति नः परे ॥३९॥

श्रुधि वंस्वइत्येते नः प्रत्यये परेप्लवेते । श्रुधि श्रुधीन इन्द्रह्वयामसि । वंस्व । वंस्वानो वार्यापुरु ।

वेदेति विश्वस्य भूमं म उत्तरं ॥४०

वेदइत्येतत्प्लवते । विश्वस्य । भूमं । मे इत्येवमुत्तरं । विश्वस्य । वेदाविश्वस्यमेधिरः । भूमं । वेदाभूमंचित् इंद्रह्वयामसि । मे । वेदामे देवऋतुपाऋतूनाम् ।

शुनःशेपेचाप्लवते यकारे ॥४१॥

शुनःशेपेच ऋषौवेदइत्येत त्प्लवते यकारेप्रत्यये । वेदायोवीनांपदं शुनःशेपइतिकस्मात् । वेदयस्त्रीणि विदथान्येषां । यकारइति । कस्मात् वेदनावः ।

ब्रह्मेति नो हेचगिरः कृणोतिते कृणोत तूतो दितिचोत्तरेषु ॥४२॥

ब्रह्मइत्येतत्प्लवते । नः । हेचगिरः । कृणोति । ते । कृणोत । तूतोत् । इत्येतेषुपरेषु । नः । ब्रह्माणा इंद्रोपयाहि । हेचगिरः । ब्रह्माचगिरो दधिरे । हेइतिकस्मात् । ब्रह्मचतेजातवेदः । कृणोति । ब्रह्माकृणोति वरुणः । ते । ब्रह्मात इंद्रगिर्वणः । कृणोत । ब्रह्माकृणोत पन्यइत् । तूतोत् । ब्रह्मातूतो दिंद्रोगातुं ।

अभीतिनोनुनवंतेसतोनरंद्वासत्स्विति ॥४३॥

अभीत्येतत्प्लवते । नः । नु । नवंते । सतः नरं । द्वा । सत् । सु । इत्येतेषुपरेषु । नः । अभीन आववृत्स्व । नु । अभीनु माहृषभ चक्रमीथाः । नवंते । अभीनवंते अद्रुहः । सतः । अभीषत स्तदाभर । नरं । अभीनरं धीजवनं । द्वा । अभीद्वा किमुव यः करंति । सत् । अभीषदप दुच्छ्वत् । सु । अभीषु णः सखीनां ।

आग्नेऽर्षंपरेतु मुख्ये ॥४४॥

इत्येतेषां प्रत्ययानां मुख्ये नइत्येतस्मिन्प्रत्यये । आ । अग्ने । अर्ष । इत्येवंपरे एवअभीतिपदं प्लवते । आ । अभीनआ ववृत्स्व । अग्ने । अभीनोअग्न उक्थमिज्जुगुर्याः । अर्ष । अभीनोअर्ष दिव्या । आग्नेर्षंपरइति कस्मात् । अभिनो वाजसातमं ।

चक्रु वंदेते दमस्यन्समुद्रो रथेन-नः समक्तषी न्मदंति । ते वो भयंते नियुद्भिः कृपीटं रथस्य सोमस्य मतीरणांति ॥४५॥

चक्रुः । वदेते । दमस्यन् । समुद्रः । रथेन । नः । समक्तषीन् । मदंति । ते । वः भयंते । नियुद्भिः । कृपीटं । रथस्य । सोमस्य । मतिः । रणांति । इत्येते चक्रुराद-

य: । वक्ष्यति । यथेतिचक्रुरादिषु नर: सुपर्णा इत्युक्तं यथेत्येतत्प्लवते । चक्रुरादिषु । नर: सुपर्णा इत्येतयोश्च । चक्रु: । यथाचक्रुरमृतागातुं । वदेते । यथावदेतेऽवर: पर: । दशस्यन् । यथादशस्यन्नुषस: । समुद्र: । यथासमुद्र स्कभित: । रथेन । यथारथेन गच्छथ: । न: । यथान श्चक्राजरसं तनूनां । सप्तऋषीन् । यथासप्तऋषीन्पर: । मदंति । यथामदंति धूतय: । ते । यथातस्थास्थु: परमं । व: । यथावोदिद्युद्दति । भयंते । यथाभयंते भुवना । नियुद्भि: । यथानियुद्भि: सचसेशिवाभि: । कृपीटं । यथाकृपीट मनुतद्दहंति । रथस्य । यथारथस्य बृहतो: सोमस्य । यथासोमस्य तृंपसि । मति: । यथामति विँद्यते । रणांति । यथारणांति धूतय: । नर: । यथानर: संचविच द्रवंति । सुपर्णा: यथासुपर्णा अमृतस्य ।

समुद्रं ह्रस्वर्णा नवग्वशब्दो दशग्वं-
दंसिष्ठ वसूनिनो वसु । इत्थं निहं-
नु यतिभ्य: सहंत: पृथिव्यां नि-
हँसि समत्सु पावक ॥ ४६ ॥

समुद्रं । ह्रस्वर्णा नवग्वशब्द: । दशग्वं । दंसिष्ठ । वसूनि । न: । वसु इत्थंनिहँनु यतिभ्य: । सहंत: । पृथिव्यां । नि: । हंसि । समत्सु । पावकइत्येतेसमुद्रादय: । वक्ष्यति । समुद्रादिषु येनेति ।

येनइत्येतत्प्लवते । समुद्रादिषु प्रत्ययेषु । समुद्रं । येनासमुद्र मसृजोमही: ह्रस्वर्णा । येनास्व १ र्णं ततनाम ।

बनारस संस्कृतसीरीज़

अर्थात्

वाराणसीसंस्कृतपुस्तकावली।

तत्र मुद्रिता ग्रन्थाः।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेज़ीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १०	१०	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं खण्डानि ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ८	८	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यं खण्डानि ३	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डे २	२	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्यव्याख्यानम्) खण्डे २	२	०
न्यायलीलावती (यन्त्रस्था)	०	०

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस।

विज्ञापनम् ।

बनारससंस्कृतसीरीजनाम्नी
वाराणसेयसंस्कृतपुस्तकावली ।

—:०:—

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

ब्रजभूषणदास और कम्पनी
चांदनीचौक के उत्तर नई सड़क
बनारस ।

BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS;
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
No. 64.

महर्षिशौनकप्रणीतम् ऋक्प्रातिशाख्यम् ।

उव्वटकृतभाष्ययुतम् ॥

[illegible] काशीवासिना [illegible] संस्थापित [illegible] पाठशाला
प्रधानाध्यापकेन श्रीमन्नारायण [illegible] शिष्याध्यापकेन च [illegible]
[illegible] शर्मणा संशोध्य प्रकाशितम् ।

SAUNAKA'S PRATIŚAKHYA OF THE RIGVEDA,

WITH THE COMMENTARY OF UVVAṬA.

EDITED AND ANNOTATED BY THE LATE PANDIT
YUGALAKIŚORA VYÂSA,
A SCHOLAR OF THE BENARES SANSKRIT COLLEGE
And His Esteemed Pupil Pandit
PRABHUDATTA ŚARMÂ.
Fasciculus III.

BENARES.
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya vilas Press,
BENARES.

1902.

ह्वेद्दूतिकस्मात् । येन स्तम्भितं येन नाकः । नवग्वशब्दः । येनानवग्वो दध्यङ् । येनानवग्वे । दशग्वं । येनादशग्वं । दंसिष्ठ । येनादंसिष्ठक्रत्वने । वसूनि । येनावसून्याभृता । नः । येनानः पूर्वेपितरः पदज्ञाः । वसु । येनावसु प्रयच्छसि । इत्त्रंनिर्द्धैं । येनाइत्त्रंनिरद्ध्यः । ह्वेद्दूतिकस्मात् । येनइत्त्रंचिकेतथः । नु । येनानु सद्यओजसा । यतिभ्यः । येनायतिभ्यो भृगवे । सहंतः । येनासहंत ऋञ्जत । पृथिव्यां । येनापृथिव्यां निक्रिविं । निः । येनानि रंहसोयूयं । हंसि । येनाहंसि न्य १ त्रिणं । समत्सु । येनासमत्सु सासहः । पावक । येनापावक चक्षसा । यत्रेतिचक्रुरादिषु नरः सुपर्णाद्दूतिच समुद्रादिषुयेनेति ।

तवेतिमेसदोरथं ॥४७॥

तवइत्येतत्प्लवते । मे । सदः । रथं । इत्येतेषुपरेषु । मे । तवामेनाभिरातता । सदः । तवासदःकृणावसे । रथं । तवारथ सुपशर्म्मं सदेम ।

अवेति नो नु कल्पेषु नूनं वाजेषु पृत्सुषु ॥४८॥

अवेत्येतत्प्लवते । नः । नु । कल्पेषु । नूनं । वाजेषु । पृत्सुषु इत्येतेषु । नः । अवानो वाजयुं । नु । अवानु कंज्यायान् । कल्पेषु । अवाकल्पेषु नःपुमः । नूनं । अवानूनं यथापुरा । वाजेषु । अवावाजेषु वाजिनि । पृत्सुषु । अवापृत्सुषु कासुचित् ।

आद्येचेद्वाजयुंपार्यें कमग्नेमघवन्परे ॥४९॥

एषां प्रत्ययानामाद्ये। नः। नु। इत्येते। वाजयुं। पार्यें। कं। अग्ने। मघवन्। इत्येवंपरेयदिभवतः तर्हिअवेत्येतत्प्लवते। वाजयुं। अवानोवाजयुंरथं। पार्यें। अवानःपार्येधने। कं। अवानुकंज्यायान्यज्ञवनसः। अग्ने। अवानोअग्नऊतिभिः। मघवन्। अवानोमघवन्वाजसातौ। आद्येचेद्वाजयुंपार्येंकमग्नेमघवन्परइतिकस्मात्। अवानोवृजिनाशिशीहि।

रास्वापितःशतेनानोवर्धस्वासुश्रुधीहवं। मंदस्वासुवहस्वासुवनेमातेनहीनुवः ॥५०॥

इत्येतेषां पूर्वपदांताःप्लवन्ते। रास्वापितः। रास्वापितर्मरुतां। शतेनानः। शतेनानो अभिष्टिभिः। वर्धस्वासु। वर्धस्वासुपुरुष्टुत। श्रुधीहवम्। श्रुधीहव मिंद्रमारिषण्यः। मंदस्वासु। मंदस्वासुस्वर्णरे। वहस्वासु। वहस्वासु स्वश्व्यम्। वनेमाते। वनेमाते अभिष्टिभिः। नहीनुवः। नहीनुवो मरुतोअंत्यस्मे वइतिकस्मात्। नहिनुते महिमनः।

पाथादिवोधातारयिं सृजतागय-

साधनं । रास्वाचोरुहनमघोनः
सृजतामधुमत्तमं ॥ ५१ ॥

इत्येतेषांपूर्वपदांताःप्लवंते । पाथादिवः । पाथादिवोविमहसः । धातारयिं । धातारयिंसहवीरंतुरासः । सृजतागयसाधनं । समीवत्सन्नमातृभिःसृजतागयसाधनं । रास्वाच । रास्वाचनोअमृतमर्त्यभोजनं । उरुहन । उरुहनराधःसवनापुरूणि । मघोनः । मघोनइंद्रयत्वा । सृजतामधुमत्तमं । आनःसोमंपवित्रआसृजतामधुमत्तमं ।

जहीचिकित्वोवेत्थाहिरत्नथान-
हतामखम् । युयोताशरुंस्वेना-
हिवनेमाररिमावयं ॥ ५२ ॥

जहीचिकित्वः । वेत्थाहि । रत्नथान । हतामखं । युयोताशरुं । स्वेनाहि । वनेमाररिमावयं । इत्येतेषांचपूर्वपदांताःप्लवंते । जहीचिकित्वः । जहीचिकित्वोअभिशस्तिमेतां । वेत्थाहि । वेत्थाहिवेधोअध्वनः । रत्नथान । रत्नथानेमघन्नशत् । हतामखं । हतामखंनभृगवः । युयोताशरुं । युयोताशरुमस्मत् । स्वेनाहि । स्वेनाहिवृत्रंशवसाजघंथ । वनेमाररिमावयं । स्तोमंयज्ञंचादरं वनेमाररिमावयं ।

प्रप्रावोअस्मेधामाह सनाज्यो-
तिरपावृधि । ऋध्यामातेवाम-

देवे जुह्वोतामधुमत्तमं ॥ ५३ ॥

प्रप्रावोऽस्मे । धामाह । सनाज्योतिः । अपावृधि । ऋध्यामातेवामदेवे । जुह्वोतामधुमत्तमम् । एतेषांच पूर्वपदांताः प्लवन्ते । प्रप्रावो अस्मे । प्रप्रावो अस्मे स्वयशोभिः । अस्मेइतिकिं । प्रप्रवस्त्रिष्टुभमिषं । धामाह । धामाहयत्तेअजर । सनाज्योतिः । सनाज्योतिः सनास्वः । अपावृधि । अपावृधि परिवृतन्नराधः । ऋध्यामाते वामदेवे ऋषौ । ऋध्यामातओहैः । वामदेवइतिकस्मात् । ऋध्यामातेवरुणखामृतस्य । जुह्वोतामधुमत्तमं । तस्माइदास्येहविर्जुह्वोतामधुमत्तमं ।

यत्त्वामहे धिष्वाशवो जनिष्वा-
देववीतये । अधात्वं ह्यद्याद्या-
श्वःश्वः सचस्वानः स्वस्तये ॥ ५४ ॥

इत्येतेषांच पूर्वपदांताः प्लवंते । यत्त्वामहे । यत्त्वामहे सौमनसाय । धिष्वाशवः । धिष्वाशवः शूरयेन । जनिष्वा देववीतये । जनिष्वादेववीतये सर्वतातास्वस्तये । अधात्वंहि । अधात्वंहिनस्करः । हीतिकस्मात् । अधत्वमिन्द्रविद्धि । अद्याद्याश्वःश्वः । अद्याद्याश्वःश्वइन्द्र । सचस्वानःस्वस्तये । अग्नेसूपायनोभव सचस्वानःस्वस्तये । स्वस्तयइतिकस्मात् सचस्वनः पराकआ ।

इति श्रीपार्षदव्याख्यायामानंदपुरवास्तव्यवजटपुत्रोव्वटकृतौ

प्रातिशाख्यभाष्येसप्तमंपटलम् ।

अंतः पादं विग्रहएष्वपृक्तउकारो व्रजस्य सु धानमोभिः । शुचिं पवित्रं तु मही र्नुचाप्लुतं सुतस्येति ॥ १ ॥

अंतः पादं विग्रिर्भविष्यति । यदितऊर्ध्वमनुक्रमिष्यामः विग्रहेच भविष्यति । अपृक्तः अव्यञ्जन उकारः प्लवते । व्रजस्य सु धाःनमोभिः । शुचिं । पवित्रं । तु । महीः । नुचाप्लुतं । सुतस्य । इ येतेषु परेषु । व्रजस्य । व्युव्रजस्य तमसः । सु । अस्याऊषुणाउपसातये । धाः । शंसात्युक्थयजतेव्यूधाः । नमोभिः । होतातमूनमोभिः । शुचिं । तमूशुचिंशुचयः । पवित्रं । अत्यूपवित्र मक्रमीत् । तु । मायामूतु यज्ञियानां । महीः कदूमहीरधृष्टा अस्य । नुचाप्लुतं । समूनुपत्नी वृषभिर्जगम्यु । सुतस्य तऊसुतस्य सौम्यस्य अप्लुतमितिकस्मात् । किंस्विदच्यामिकिमुनूमनिष्ये । अंतःपादमितिकस्मात् । किंनोदुदुहर्षसेदातवाउ येदेवासो दिव्येकादशस्थ अच्छेतिविग्रहइतिप्रकृतेविग्रहाधिकारे पुनर्विग्रहग्रहणमुदयविशेषणार्थं क्रियते तस्मात्सुपुव आदुसुस्तुष इत्यत्रउकारस्य दीर्घत्वंनभवति यद्युदयविशेषणार्थं विग्रहग्रहणं । इयं सुमेषं महयाश्वविंदमित्येव मादिषु नसिध्यति । अत्रापिवचनप्रामाण्यात् सिद्धं । यथापिक्वचिदपि वचनस्यावकाशान्नसिद्धमिति तथापिनदोषः । उदयविशेषणार्थं ग्रह-

निवृत्तमिति व्याख्या स्याम: ॥ एष्वितिकस्मात् । अस्माइदुमग्निमिव । अपृक्ताइतिकस्मात् । सखीन: सोमपृत्सुधा: ।

यद्युदयोदयान । सोमसुतिं चर्किराम स्तवाम स्तवाना गृभायरथं श्रुधीति ॥ २ ॥

यदिव्रजस्त्येवमादीनामेते उदयानभवंति । अथउकार: प्लवते । एषुप्रत्ययेषुनप्लवते । सोमसुतिं । इमासुषुसोमसुतिं । चर्किराम । दधिक्राव्ण इदनुचर्किराम । स्तवाम । आशुंदधिक्रांत मनुष्टवाम । स्तवाना । इन्द्राविष्णूनृवदुषुस्तवाना । गृभाय । अवर्षीर्वर्षमुदुषु गृभाय । रथं । युवोरुषुरथंहुवे । श्रुधि । इमाउषुश्रुधीगिर: ।

तेअस्ति तेमहिमन: प्रवोचत प्रवोचं न:सुमना द्वैपदाश्च ॥ ३ ॥

इतीमेद्वैपदा उदयोदयायदि चेन्नभवंति अथउकार: प्लवते । तेअस्ति इन्द्रयउनुतेअस्ति । अस्तीति कस्मात् । आदूनुतेअनुक्रतुं । तेमहिमन: । कउनुते महिमन: समस्य । प्रवोचत । नतस्यविद्मतदुषु प्रवोचत । वोचतेतिकस्मात् । पर्यूषुप्रधन्ववाजसातये । प्रवोचं । अभीयोधर्मस्तदुषुप्रवोचं । न: सुमना: । उशन्नुषुण: सुमना: । सुमनाइति कस्मात् । अस्याऊषुणउप ।

महेदधिध्वेतिरमुश्चनो मृध स्वर-

नमध्वं नमते नयंत स्वित्येतेषु ॥ ४ ॥

इत्येतेषु प्रत्ययेषु सु इत्येतत्प्लवते । महे । प्रसूमहे-सुशरणाय । दधिध्व । निषूदधिध्वमस्वनंतउत्सं । तिर । प्रसूतिराशचीभिः । मुंच । विषूमुंचसुषुवुषः । नः । अधप्रसूनउपयंतु । मृधः । विषूमृधः शिश्नथः । चर । विषूचरस्वधाअनु । नमध्वं । निषूनमध्वंभवतासुपाराः । नम । निषूनमातिमति । ते । प्रसूतइन्द्रप्रवता परिभ्यां । नयंत । प्रसूनयंतगृभयंतः ।

एकाक्षरयोः पराणिचे दुपेंद्राग्नेत्राध्वरमायुरेत्विति ॥ ५ ॥

एषुप्रत्ययेषु यावेकाक्षरौ । नः तेइति तयोः पराणि । उप इन्द्र अग्ने अत्र । अध्वरं । आयुः । एतु । इति यदामानि भवंति सु इत्येतत्प्लवते । उप । अधप्रसून उपयंतु । इंद्र । मोषूणइन्द्रात्र । प्रसूतइंद्रप्रवता । अग्ने । नू षूणोअग्ने शृणुहित्वमी । अत्र । मोषूणोअत्र जुहुरंतर । अध्वरं । जुषस्वसूनो अध्वरं । आयुः । प्रसून आयुर्जीवसे । एतु । प्रसून एत्वध्वरं । एकाक्षरयोःपराणिचेतिकस्मात् । मोषुणः परापरा । तांसुतेकीर्तिं ।

सदे त्येतद्योनिषु पीतयेपरं ॥ ६ ॥

सदइत्येतत्प्लवते । योनिषु । पीतये ॥ इत्येवं पर-

सत् । योनिषु । निषदायोनिषुत्रिषु । पीतये । निषदापीतये मधु ।

धन्वेत्येतत्सोमराट्पूयमानः ॥ ७ ॥

धन्वेत्येतत्प्लवते सोम राट् पूयमानः । इत्येतेषुपरेषु । सोम । प्रधन्वासोमजागृविः । राट् । ऋत्वोनतायुरतिधन्वाराट् । पूयमानः । अभिस्वरधन्वापूयमानः ।

यदीति क्रथो मनसःकवीनां सबंधवो गोःसरमेति तेषु ॥ ८ ॥

यदीत्येतत्प्लवते । क्रथः । मनसःकवीनां । सबंधवः । गोः । सरमा । इत्येतेषुपरेषु । कृथ । युवायदीकृथः पुनः । मनसः । तच्चद्यदी मनसः । कवीनां । गुहायदीकवीनां । सबंधवः । गिरायदी सबंधवः । गोः । स्वादृग्देवस्या मृतंयदी गोः । सरमा । विदद्यदी सरमा रुग्णमद्रेः ।

चरेति पुष्टिं सोम चर्षणिप्राः ॥ ९ ॥

चरइत्येतत्प्लवते । पुष्टिं । सोम । चर्षणिप्राः । इत्येतेषुपरेषु । पुष्टिं । रेवांइवप्रचरा पुष्टिमच्छ । सोम । अवीरहा प्रचरासोमदुर्यान् । चर्षणिप्राः । विशःपूर्वीः प्रचराचर्षणिप्राः ।

जनिमेति हंति सं जातवेदाः ॥१०॥

जनिमेति प्लवते । हंति । सं । जातवेदाः । इत्ये-

तेषु परेषु । इंति । विश्वावेदजनिमाहंति । सं । विश्वेदेते जनिमासं विविक्तः । जातवेदाः । विश्वावेद जनिमा जातवेदाः ।

रंधयेति येषु कंशासदुत्तरं ॥ ११ ॥

रंधय । इत्येतत्प्लवते । येषु । कं । शासत् । इत्येवमुत्तरं । येषु । एभ्योनृभ्यो रंधयायेष्वस्मि । कं । सुन्वद्भ्यो रंधयाकंचिदव्रतं । शासत् । बर्हिष्मते रंधयाशासदव्रतान् ।

न नः कारेस्वित्युपसातयेपरे ॥ १२ ॥

नखलुसु इत्येतत्प्लवते नः कारेप्रत्यये उपसातयइत्येवं परे सति । उपसातये । अस्माजषुणा उपसातये । सातइतिकिं । अधप्रसून उपयंतु ।

मह्याव जयकाव्येन गूर्धयभरेतिचस्वरितिप्रत्ययेषट् ॥ १३ ॥

महय । अव । जय । काव्येन । गूर्धय । भर । इतिषडेतानिप्लवंते । स्वः इत्येतस्मिन्प्रत्यये महय । त्वंसुमेषंमहयास्वर्विदं । अव । अस्माकेभिर्नृभिरत्रास्वर्जय । जय । इनोहत्वंजयास्वः । काव्येन । विप्रः कविः काव्येनास्वर्चनाः । गूर्धय । तंगूर्धयास्वर्णरे । भर । द्युमंतंशुष्ममाभरास्वर्विदं ।

मदपर्षपिपृतधन्वयक्षतक्षेमेति स्वस्तय उत्तराणि ॥ १४ ॥

मंद । पर्ष । पिपृत । धन्व । यच्छत । रुहेम । इत्येतानिप्लवंते । स्वस्तयइत्येवमुत्तराणि । मंद । तां आदित्याँ अनुमदास्वस्तये । पर्ष । सनः सिंधुमिवनावयातिपर्षास्वस्तये । पिपृत अद्यादेवासः पिपृतास्वस्तये । धन्व । परिसोमप्रधन्वास्वस्तये । यच्छत । उरुष्याः शर्मयच्छतास्वस्तये । रुहेम । अरिष्यन्तमारुहेमास्वस्तये ।

दधिममदततन्विसिंचतस्तववदतानजरक्षतोक्षत । पिपृतपृणातपृच्छतप्रुषस्थघहिनवायजुहोतपश्यत ॥ चकृमाकुवभूमस्मशिशीतस्तोतपप्तत । यथोदयानिसर्वाणि ॥ १५ ॥

दधिम । मदत । तन्वि । सिञ्चत । स्तव । वदत । अनज । रक्षत । उक्षत । पिपृत । पृणात । पृच्छत । प्रुष । स्थः । घ । हिनव । अय । जुहोत । पश्यत । चकृम । अकुव । भूम । स्म । शिशीत । स्तोत । पप्तत । इत्येतानिसर्वाणियथोदयानिप्लवंते । दधिम । यस्मिन्वयंदधिमाशंसमिंद्रे । मदत । इंद्रंगीर्भिर्मदतावस्वः । तन्वि । नच्चस्मानस्तन्वी ३ रेपषा । सिञ्चत । आमत्रेभिः सिंचतमद्यमंधः । स्तव । इंद्रंस्तवान्नृतमंयस्य । वदत । रोदसीआवदतागणश्रियः । अनज । इमांवाचमनजापर्वतच्युते । रक्षत पूर्भी रक्षतामरुतोयमावत ।

उक्षत । घृतमुक्षतोमधुवर्णमर्चते । पिपृत । निरंहसः पिपृतानिरवद्यात् । पृणत । स्तोमेभिरीपृणताभोजमिंद्रं । पृच्छत । तंपृच्छतासजगामासवेद । प्रुष । अभ्रप्रुषोनवाचाप्रुषावसु । स्थ । केष्ठानरःश्रेष्ठतमाः । घ । नघासमामपजोषं । हिनव । प्रतत्तेहिनवायत्तेअस्मे । अद्य । नाहमतोनिरयादुर्गहैतत् । जुहोत । आजुहोतादुवस्यत । पश्यत । तदस्येदम्पश्यताभूरिपुष्टं । अहंकविदक्षुनापश्यतामा । चकृम । वयंहितेचकृमाभूरिदावने । अकुव । माकुवानोगृहेभ्यः । भूम । द्यावाचभूमाजनुषः । स्म । उतस्मासद्यइत्परि । शिशीत । तंशिशीतास्वध्वरं । स्तोत । इंद्रंस्तोतानव्यंगीर्भिः । पप्तत । वयोनपप्ततासुमायाः ।

त्वितिचैकाक्षरोपधम् ॥१६॥

तुइत्येतच्चैकाक्षरोपधं प्लवते । तु । आतून उपगंतन । एकाक्षरोपध मिति कस्मात् । पिबातु सोमं गोऋजीकमिंद्र ।

कदा हरिवो वरुणास्य चक्रतुः
सूर्यस्य निष्ठ्याइव भूमतेषुम ॥ १७ ॥

कदा । हरिवः । वरुणास्य । चक्रतुः सूर्यस्य । निष्ठ्याइव । इत्येतेषु भूमइत्येतन्नप्लवते । कदा । ऊने भूमकदाचन । हरिवः । अद्याय भूमहरिवः परादै । वरुणस्य । माहेयेभुमवरुणस्य । चक्रतुः । स्वरेतसापितरा

भूमचक्रतुः । सूर्यस्य । माघूनेभूमसूर्यस्यसन्दृशि । निष्ट्या । इव । माभूमनिष्ट्याइवेंद्रत्वत् ।

वस्नाणि द्विबाबधेयज्ञियानां तेदंसोद्वेनः सव प्रकृतेषु तु ॥ १८ ॥

वस्नाणि । द्वि । बाबधे यज्ञियानां । तेदंसोद्वे । नः सव । प्रकृइत्येतेषु प्रत्ययेषु तुइत्येतन्नप्लवते । वस्नाणि । स्तु वस्नाण्यधपेशनानि । द्वि । पश्चयंवातुद्विषिंच । बाबधे । वितुबाबधेरोदसी । यज्ञियानां । मायामूतुयज्ञियानां । तेदंसोद्वे । तत्तुतेदंसोयदहन् । द्वेइतिकस्मात् । तातूतइंद्र महतोमहानि । नः सव । पादूनः सवयतिगव्यं । नः सवेतिद्वे इतिकस्मात् । उक्तं । पा । तूनइंद्र इन्वकन्नस्माकं । प्रक । स्तोर्णंबर्हिरातुप्रकप्रयाहि ।

चक्रमेति द्वैपदे भूरिदुष्कृतं वर्धतां विप्रवचसो जिह्वयेति ॥ १९ ॥

चक्रमेत्येतन्नप्लवते द्वैपदे भूरिदुष्कृतं वर्द्धतां । विप्रवचसः । जिह्वया । इत्येतेषुपरेषु भूरिदुष्कृतं । नवो गुहा चक्रमभूरिदुष्कृतम् । दुष्कृतमिति कस्मात् वयंहिते चक्रमाभूरि दावने । वर्धतां । प्राचंयज्ञं चक्रमवर्द्धताम् । विप्रवचसः । आपुरंदरं चक्रम विप्रवचसः । जिह्वया । यद्वोदेवा श्चक्रमजिह्वया ।

काण्वायना निष्कृतीरेतयोः स्य ॥ २० ॥

काण्वायनाः निष्कृतीः । एतयोः स्य इत्येतत्पदन्नप्लव-

ते ' काण्वायनाः । सुदेवास्थ काण्वायनाः । निष्कृतीः । अथोयूयंस्थ निष्कृतीः ।

जाताः सुरथाहवनश्रुतश्च ॥ २१ ॥

जाताः । सुरथाः । हवनश्रुतः एतेषु च प्रत्ययेषु स्थइत्येतन्नप्लवते । जाताः । येस्थ जातापदितेः । सुरथाः । स्वश्वास्थसुरथाः । हवनश्रुतः । कद्रुस्थहवनश्रुतः ।

सवा परंघेतिन कौत्सवैमदं ॥ २२ ॥

सवा । इत्येवंपरं घइत्येतत्पदं कुत्सस्यवाविमदस्यवा ऋषेर्वर्तमानं नप्लवते । सः । अयंघसतुरोमदः । वा घावा याभिररुणीः । कौत्सवैमदमितिकस्मात् । सुनीथोघासमर्त्यः । प्रकृतेपि प्रतिषेधे नकारः श्लोकपूरणार्थो द्रष्टव्यः ।

स्मराधिमित्यादिषु न ॥ २३ ॥

स्मइत्येतन्नप्लवते । राधिमित्येवमादिषु प्रत्ययेषु । राधिमादीनुत्तरत्रोदाहरिष्यामः ।

प्रतिष्मच ॥ २४ ॥

प्रतिपूर्वं च स्म इत्येतन्नप्लवते । प्रतिष्म । प्रतिष्मरिषतोदह । प्रतीतिकस्मात् । नहिष्माते शतंचन ।

स्मतेपरेषु व्रजनंवनस्पतेशुभे पक्षच्छायाम् ॥ २५ ॥

स्मतेइत्येतस्मिन्द्वे पदेपूर्वेनप्लुवते। व्रजनं वनस्पते। शुभे। पर्षण्यां इत्येतेषुपरेषु। व्रजनं। अधस्मतेव्रजनं वनस्पते। उतस्मतेवनस्पते। शुभे। उतस्मतेशुभेनरः। पर्षण्यां। उतस्मतेपर्षण्याम् व्रजनमित्यादिपरेष्वितिकस्मात्। नहिष्मातेअतंचन।

स्म पुरावृषाकपौ ॥ २६ ॥

स्मपुराइत्येतन्नप्लुवते वृषाकपौ स्मपुरा। संहोत्रं स्मपुरानारी। वृषाकपाविति कस्मात्। येस्मापुरा गातूयंतीव।

राधिंवाजेषु मेसद्मपूषणांते तृह धायि मादुर्हणायतः। यस्मै यद्वृत्रहत्येषु मावतेवातीयं यस्यमादुर्गृभीयसे ॥ २७ ॥

तहूमे राधिमादयः पूर्वसूत्रेनिर्दिष्टाः। राधिं। उतस्मराधिं परियासिगोनां। वाजेषु। प्रस्मवाजेषुनोव। मे। उतस्ममेव्यथ्यै। सद्म। उतस्मसद्मइर्यतस्यपस्त्योः। पूषणां। वहामिस्मपूषणमंतरेण। तं। अपस्मतंपथोजहि। तृंहत्। कूटंस्मतृंहत्। धायि। उतस्मधायिदर्शतः। मा। त्रिः स्ममाह्नः। दुर्हणायतः। अवस्मदुर्हणायतः। यस्मै। शुचिष्मयस्माअत्रिवत्। यत्। नहिष्मयद्धवःपुरा। वृत्रहत्येषु। मघोनस्मवृत्रहत्येषुचोदय। मावते।

मिष्ममाकृते । वातः । उत्स्मवातोवहति । यं । उतस्मयंयिशुम् । यस्य । अधस्मयस्यार्चयः । मत् । उपस्ममन्तरसंतौ । दुर्गभीयसे । एतदूर्ध्वमेकादशिद्वादशिनो रेत्येतत्त्रयंतद्वैपदग्रहणांकृतं द्रष्टव्यं । तेषां द्वैपदानां पूर्वपदान्ताः प्लवंते ।

पृक्षाविपश्चितमवापुरंध्याघात्व-
द्रिग्वीरान्वनुयामात्वोताः । ज-
नयादैव्यं भुजेमातनूभि र्ह्रावह-
तो वासयामन्मनाच ॥ २८ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । पृक्षाविपश्चितं इंद्र पृक्षाविपश्चितं । अवापुरंध्या । रथमवापुरंध्या । घात्वद्रिक् । नघात्वद्रिगपवेतिमेमनः । वीरान्वनुयामात्वोताः । वोरैर्वी रान्वनुयामात्वोताः । वीरानितिकस्मात् वयमग्ने वनुयामत्वोताः । जनयादैव्यं । मनुर्भव जनयादैव्यं जनं । भुजेमातनूभिः । यद्वं भुजेमातनूभिः । ह्रावहतः । आह्रावहतो मर्त्यायद्वयत् : वासयामन्मना । वस्त्रेणेव वासयामन्मना शुचिं ।

वेदावसुधितिं रोमापृथिव्या वो-
चासुतेषु धावतासुहस्त्यः । मुं-
चासुपुषुषः स्वाह्वापितूना मि-
ह्वाह्वणीव बोधयापुरंधिं ॥ २९ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । वेदा वसुधितिं । सहि वेदावसुधितिं । रोमापृथिव्याः । अग्निर्ईदाति रोमापृथिव्याः । वोचासुतेषु । प्रनुवोचासुतेषु वां । धावतासुहस्त्यः । आधावतासु हस्त्यः मुंचासुषुवुषः । विषूमुंचासुषुवुषः । स्वाद्मापितूनां । ऊधर्नगोनां स्वाद्मापितूनां । इडाहवीष्व । अस्मां इडाहवीष्व । बोधयापुरंधिं । प्रबोधयापुरंधिम् ।

अवथासः कृणुथासुप्रतीकं तिराशचीभिः कृणुतासुरत्नान् । ग्मंतानहुषो नयताविर्यंतः स्माच्यावयं नीरयावृष्टिमंतं ॥ ३० ॥

इत्येतेषांपूर्वपदांताः प्लवंते । अवथासः । यंदेवासोऽवथासविचर्षणिः । कृणुथासुप्रतीकं । अश्वीरंचित्कृणुथासुप्रतीकं । तिराशचीभिः । प्रमूतिराशचीभिर्येत उक्थिनः कृणुतासुरत्नान् । सुभगान्नोदेवाः कृणुतासुरत्नान् । ग्मंतानहुषः । अधग्मंता नहुषः । अनयाविर्यंतः । येवाजाँअनयताविर्यंतः । स्माच्यावयन् । त्वंहिस्माच्यावयन्नच्युतानि ईरयावृष्टिमंतं । प्रपर्जन्य मीरया वृष्टिमंतं ।

असृजतामातरं सूरथंहुवे नयताबद्धं स्वापयामिथूदृशा । इताजयता गतासर्वतातय इरयथामरुतोनेषथासुगं ॥ ३१ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । असृजतामातरं । सं अत्येनासृजता मातरंपुनः । सुरथंहुवे । युवोरु षुरथंहुवे । हुवइतिकिं । अस्माकंसुरथंपुरः । नयताबद्धं । नजानीमो नयताबद्धं । स्वापयामिथूदृशा । निष्वापयामिथूदृशा । इताजयत । प्रेताजयतानरः । आगता सर्वतातये । तस्मादित्वागता सर्वतातये । ईरयथामरुतः । उदीरयथा मरुतःसमुद्रतः । नेषथासुगं । चक्षुरिववंतमनुनेषथासुगम् ।

अन्यत्राचि त्पिबतामुंजनेजनं
घास्या वोचेमाविदथेष्विताधि
यं । इतानि यत्रावि दशस्यथा
क्रिविंचाबोधातिद्रावयात्वं क्रि-
रावसु ॥ ३२ ॥

इत्येतेषां पूर्वपदांताः प्लवंति । अन्यत्राचित् । नूअन्यत्राचिदद्रिवः । पिबतामुंजनेजनं । इदंद्यावा पिबता मुंजनेजनं । घास्याः । त्वंत्वंवा घास्या अहं । वोचेमाविदथेषु । तमिद्वोचेमाविदथेषु शंभुवं । इताधियं । एताघियं कृणवामः । इतानि । आत्वेतानि षीदत । यत्रावि । मनोयत्रावितद्दधु र्विचेतसः । दशस्यथा क्रिविं । याभिर्दशस्यथाक्रिविं । चाबोधाति । सचाबोधाति मनसायजाति । द्रावयात्वं । अध्वर्यो द्रावयात्वं । क्रिरावसु । आनः सोमपवमानः क्रिरावसु ।

द्वापदेव कर्त्तनाश्रुष्टिं योधयाच्च जग्रभावाचं । पाययाच्च तर्पयाकामं गातुयाच्च मंदयागोमिः ॥ ३३ ॥

इत्येतेषांपूर्वपदांताः प्लवंते । द्वापदेव । आद्वापदेवगच्छसि । कर्त्तनाश्रुष्टिं । अध्वर्यवः कर्त्तनाश्रुष्टिं । योधयाच । सयोधयाच क्षययाच जनान् । जग्रभावाचं । प्रतीचींजग्रभावाचम् । पाययाच । असादव पाययाच्चामधूनि । तर्पयाकामं । अस्मेहि तर्पयाकामं । गातुयाच । दशस्याच गातुयाच । मंदयागोभिः । इमंकामंमंदयागोभिः ।

घास्यालादेनासुमतिं वोचानुव्यथया मन्युं । नेथाचचक्राजरसं भवता मृलयंतश्च ॥ ३४ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । घास्यालात् । विजामातुरुतवाघास्यालात् । एनासुमतिं । विद्मां एनासुमतिं यात्यच्छ । वोचानु । अधिवोचानु सुन्वते । व्यथयामन्युं । अमित्रस्य व्यथयामन्युमिन्द्र । नेथाच । पाथनेथाच मर्त्यँ । चक्राजरसं । यत्रानश्चक्राजरसं तनूनां । भवतामृलयंतः आदित्यासोभवता मृलयंतः ।

एवाचन भजाराये ररिमाते भ-

जाभूरि । श्रुधीनउभयवाते भजात्वं मूलयानश्च ॥ ३५ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । एवाचन । मोतसूरो अहएवाचन । भजाराये । अभक्तेचिदाभजाराये अस्मान् । ररिमाते । पिब सोमंररिमाते । भजाभूरि । विभजाभूरितेवसु । श्रुधीनः । अवमँह इन्द्रदाहृहि श्रुधीनः । उभयवाते । इन्द्रभ्रातरुभयवाते । भजात्वं । आगोमति व्रजेभजात्वं । मूलयानः । सोमराजन्मूलयानःस्वस्ति ।

एकादशिद्वादशिनो लंघावष्टम मक्षरं । उदये संहिताकाले ॥३६॥

एकादशाक्षरद्वादशाक्षरयोःपादयो रष्टममक्षरं प्लवते । संहिताकाले लघावुदये सति । एकादशिनः । तादीत्नाशत्रुंन किलाविवित्से । द्वादशिनः । अग्नेसख्ये मारिषामा वयंतव । एकादशिद्वादशिनो रितिकस्मात् । भद्रंवोअपि वातयमनः । लघावितिकस्मात् । दृषासमत्सुदासस्य नामचित् । प्रसुश्रूष्यो दूतमिव वाचमिष्ये । संहिताकाल इतिकस्मात् । आदित्यासस्ते अक्रानवा दृधुः । इदंत एकं परऊत(१)एनां ।

नःकारे च गुरावपि ॥ ३७ ॥

नःकारेउदये गुरावपिच एकादशिद्वादशिनो रष्टममक्षरं प्लवते । द्युभिर्हितो जरिमासूनो अस्तु ।

---

(१) एकमित्यपिपाठः ।

दशमं चैतयोरेवं ॥ ३८ ॥

दशमंचाक्षरंप्लवते एतयोरेकादशिद्वादशिनोः लघावुदये संहिताकाले नःकारे च गुरावपि । यज्ञाविश्वा सुमनादीदिही नः । यवरुद्रा यशसो हंतनावधः । एकादशिद्वादशिनो रितिकस्मात् । प्रसुवानासो बृहद्दिवेषु हरयः । लघाविति कस्मात् । रायएषे वसेदधीतधीः । तन्मत्सत मिंद्र ष्नूरचिवपातु । नःकारे च गुरौ । नूदेवासो वरिवःकर्तनानो भूतनः ।

षष्ठं चाष्टाक्षरे क्षरं ॥ ३९ ॥

अष्टाक्षरेषु पादे षष्ठमक्षरं प्लवते । एवंकथं यथा एकादशि द्वादशिनो रष्टममक्षरं दशमञ्च । ईशानोयवयावधं । अष्टाक्षरमिति कस्मात् । पिबासोम मभियमुग्रतर्दः । लघाविति कस्मात् आपवस्व देवसोम । संहिताकालइतिकस्मात् । नेमिंतिष्टे वसुहं ।

व्यूहैः संपत्समीक्ष्यो ने क्षैप्र वर्णैकभाविनाम् ॥ ४० ॥

ऊनेपादे क्षैप्रवर्णानांच संयोगानामेकीभाविनांच व्यूहैःपादस्य संपत्समीक्षितव्या । उदृत्यसरा अक्रणोत नाव्यां इतिक्षैप्रसंधिः । व्यूहात् द्वादशाक्षरस्यपादस्यदशममक्षरंप्लवते क्षैप्रैकभाविनामित्येव सिद्धेवर्णग्रहणा सामर्थ्यात् । गोनंपथं विरदा तिरश्च इतिवर्णव्यूहात् एकादशाक्षरस्याष्टममक्षरं प्लवते । प्रेता जयतानरइति एकीभावव्यूहादष्टाक्षरस्यषष्ठमक्षरंप्लवते एवंसंपत्सर्वत्र-

सामीच्च्या जनइतिवचनात् पूर्णोव्यूहोनभवति । प्रत्ययभीष्म नृतमस्य नृणां ।

नवावृधंत वातस्यावघानि जिघांससि । सासह्या मववृत्याम-
दीदिह्यष्टममूर्णु हि ॥ ४१ ॥

नतुखलु षष्ठएकादशिद्वादशिनोरष्टाक्षरेव एवमादीनि प्लवंते यानिवक्ष्यामः । वावृधंत । वातस्य । अवघानि । जिघांससि । सासह्याम । ववृत्याम । दीदिह्यष्टमं । ऊर्णु हि इति । वावृधंत । द्युतद्यामानं वावृधंतनृणां । वातस्य । युञ्जानो अश्वावातस्यधुनी । प्रतिषेधाधिकारे वातस्येति ग्रहणमनर्थकं दशाक्षरत्वात् पादस्य । नानर्थकं व्यूहेनद्वादशाक्षरं लिङ्गंभवति । नास्यव्यूह दृष्यते । कस्मात् । सर्वानुक्रमण्यामनुष्टुभस्ताः स्वराज इत्युक्तत्वात् । व्यूहेनपता विराजो दृश्यः । तस्मादुभयोरपि दशाक्षर एवाद्यपादोभवतिअतएव वातस्येति ग्रहणमनर्थकंभवतीति मर्तस्येति तस्यस्थाने पठंति यन्नोमर्तस्यरिपोः । अवघानि । संतोवघानि पुनानाः । जिघांससि । यत्स्तोतारं जिघांससि सखायं । सासह्याम । इन्द्रत्वोताःसासह्याम पृतन्यतः । ववृत्याम । आतेमनो ववृत्याम मघाय । दीदिह्यष्टमं । शोचाशोचिष्ठ दीदिहिविशेमयः । अष्टममिति कस्मात् । अद्याविश्वा सुमना दीदिहि । ऊर्णु हि । पुनानइन्द्र ऊर्णु हिविवाजान् ।

पुरुप्रजातस्या नभिनः कृणुहि

द्व्यक्षरोपधम् । हर्यश्वोतभवंत्विंद्र सदनायास्ति नामचित् ॥४२॥

इत्येतानिच एकादशिद्वादशिनो ऽष्टाक्षरेचनप्लवते । पुरुप्रजातस्य । विदत्पुरुप्रजा तस्य गुहायत् । अभिनः । पतिरिवजाया मभिनोन्येतु । नइतिकस्मात् तंदुरोषमभीनरः । तंनोअग्नेअभीनरः । कृणुहि द्व्यक्षरोपधं । वर्षीयोवयः कृणुहि शचीभिः । द्व्यक्षरोपध मितिकस्मात् । नहिष्टण्यानि कृणुहीपराचः । हर्यश्व । सनःप्रजायै हर्यश्वमृळय । उत । अदिते मित्रवरुणोतमृळय । भवंतु । स्वस्तयआदित्यासो भवंतुनः । इन्द्र । यथाचितेच्छंद इन्द्रजुजोषसि । सदनाय । सूर्यामासासदनाय सधन्या । अस्ति । रायस्पूर्धिस्वधावोस्तिहिते । नामचित् । अधासमत्सु दासस्यनामचित् । चिदितिकस्मात् । दिवेदिवे अधिनामादधाना ।

चमसांइवाद्रि वसवानद्वादशिनः सृजास्यविमदस्य । सुमखायधारय ददातुरक्षधिया दधातु दधिषेय ॥ ४३ ॥

इत्येतानिच एकादशिद्वादशिनो ऽष्टाक्षरेच नप्लवंते । चमसांइव । धारयाचमसांइवविवक्षसे । अद्रि । देवस्यवातुरद्रिभगस्य । वसवान । मारिषण्यो वसवानवसुः सन् । द्वादशिनःसृज । संरायाभूयसासृजमयोभुना । द्वादशिनइति कस्मात् । स्वादोःस्वादीय स्वादुनासृजा-

से । मख । संवारंनकिरस्य मघानि । विमदस्यच । तवचेन्द्रविमदस्य चक्षषेः । सुमखाय । कद्रुद्राय सुमखाय हविर्दे । धारय । अस्मेरयिं निधारय विमामदे । ददातु । अग्निरिषां सख्ये ददातुनः । रक्षधिया । ज्योतिष्मतः पथोरक्षधियाकृतान् ।(१)धियेतिकस्मात् । दधातु । स्वस्तिपूषा असुरोदधातुनः । दिधिषीय । स्तोतारमिद्दिधिषीय रदावसो ।

अङ्गसरस्वति पंचचरंति ग्नाभिरिहेन्व सिरण्यसिधाव। विद्विषुणोभिषतः सुवितायत्वा समिधानदधीमहि देव ॥ ४४ ॥

(२)अंग । इन्द्रासोमायुव मंगनवत्रं । सरस्वति । अयमुते सरस्वति वसिष्ठः । पञ्च । विश्वेदेवा अदितिः पंचजनाः । इत्ताग्मायबलीय स्त्वान्नैतदुदाहरणं । इदंतर्हिउदाहरणं ये यज्ञाय पंचशनास्समयु । चरंति । समश्वपर्णाश्चरंति नोनरः । ग्नाभिरिह । ग्नास्त्वष्टाग्नाभि रिहश्रृणोतु । ग्नाभिरितिकस्मात् । अधाते अग्नेकिमिहावदन्ति । इन्वसि इषा यज्ञायमिन्वसि इषाइव्रः । रण्यसि । उक्थेवा यस्यरण्यसि समिंदुभिः । धाव । अव्योवारेपरिधावमधुप्रियं । वि-

---

(१) रक्षाणोअग्ने ।

(२) इत्येतानिच षष्ठं अष्टमदशमं अष्टाक्षरेचएकादशद्वादशेचनप्लुयंते ।

ह्विषुणः । वर्यंते वयइन्द्रविह्विषुणः । विह्वीतिकस्मात् । द्युभिर्हितो जरिमासूनो अस्तु । अभिषतः । मह्नोविश्वाँ अभिषतः । सतइतिकस्मात् । तंदुरोषमभीनरः सुविताय । इन्द्रायाहि सुविताय महेनः । त्वासमिधान । मर्त्तासस्त्वासमिधा नहवामहे । दधीमहि । प्रतिस्तोमं दधीमहि तुराणां । देव । कृधीनोअह्नयो देवसवितः ।

जामिषुजासुचिकेत किरासि स्मस्युपपात्यसि सोमशतस्य । आयुषिचेतति विष्टपि मास्वप्रोष्मसि मूर्धनि स ह्म वरंत ॥४५॥

जामिषु । जासु । चिकेत् । किरासि । स्मसि । उप । पाति । असि । सोम शतस्य । आयुषि । चेतति । विष्टपि । मास्व । प्र । उष्मसि । सह्म । वरंत । इत्येतानिचएकादशिद्वादशिनो रष्टकेचन प्लवंते । जामिषु । गर्भंदधासि जामिषु विवक्षसे । जासु । अनमीवोरुद्रजासुनोभव । चि केत । अयंभुवोरयीणां चिकेतयत् । किरासि । आयथामंदसानः किरासनः । स्मसि । युष्मेइद्वो अपिष्मसि सजात्ये । उप । इमामुषु सोमसुतिमुपनः । पाति जातोबृहन्नभि पातितृतीयं । असि । पुह्वयोदग्धासिवना । सोम । अनुहिचा सुतं सोमममदामसि । शतस्य । अधि निधेहिशतस्यनृणां । आयुषि । पिप्रीषति स्वआयुषिदुरोणे । चेतति । सोमोजैत्रस्य चेतति यथाविदे । विष्टपि । समुद्रस्याधि-

विष्टपि मनीषिणः । मास्व । नूनोरयि सुपमास्वन्तवंतं । प्र । अभिसव्येन प्रमृष । उश्मसि । तावांवास्तून्युश्मसि गमध्यै । मूर्द्धनि । निपर्वतस्य मूर्द्धनि सदंता । अद्य । नचद्योता परिसद्ममितायन् । वरंत । माद्भिः अरद्भिर्दुरोवरंतव: ।

प्रदिविवरुणातमसि तिरसि घृतमिवदिवि ममहिनुविश्र: । उषसि पृथिविरजसि वहसि हनति पितरि विविहिनि मधु ॥४६॥

इत्येतानिच एकादशिद्वादशिनो दृष्टाचरेच नश्लवंते । प्रदिवि । इन्द्र सोमासः प्रदिविसुतासः । वरुणा । अवतेहेलो वरुणनमोभि: । तमसि । योअपाचीनेतमसिमदंती: । तिरसि । प्रवेधस त्रिभिरसिमनीषां । घृतमिव । मधुसुसंघृतमिवसुपूतम् । दिवि । श्येनाइवेदधिदिविनिषेद । मम । यथाकामा इमेममविवोमदे । हि । यूपादमुंचोअग्रमिष्टहिष: । नुविश्र: । वृणास्कंदस्य नुविश्र: । विश्वइतिकस्मात् । दूर्वन्नयामग्ने तमस्यनूरणे । उषसि । तमिद्दोषा तमुषसि यविष्ठ । पृथिवि । तद्धृतंपृथिवि इहत् । रजसि । असूतंसूतं रजसिनिषत्ते । वहसि । अतंद्रो हव्यावहसि हविष्कृत: । हनति । पुरुहचक्रनाहनति निदस्पून् । पितरि । कामंकृण्वानेपितरि युवत्यां । वि । उभेअप्रा रोदसी विषयाक: । विहि । यजस्वीर प्रविहि मनायत: ।

नि । पराजितासो अपनिलयंताम् । मधु । आग्नीवायो मधुपिब ।

सहस्राणि श्रोमतेना सनामच्छायामिवेषण्यसि सस्तुपाहि । गोपीथ्याय पवमानोवसंतान्त्सख्यायवोचेमहि मानुषस्य ॥ ४७ ॥

इत्येतानि च एकादशिद्वादशिनोऽष्टाक्षरे च न प्लवंते । सहस्राणि । त्वंपुरुसहस्राणि शतानि च । श्रोमतेन । येनोनुकं श्रोमतेन नशुश्रुवे । असनाम । रथंयुक्त मसनाम सुषामणि । छायामिव । उपच्छायामिवघृणेः । इषण्यसि । कंनश्चित्रमिषण्यसिचिकित्वात् । सस्तु । सस्तुमाता सस्तुपिता । पाहि।पाहिइन्द्रत्वंरथिरः पाहिनोरिषः । गोपीथ्याय । अग्निषइत्या गोपीथ्यायहि । पवमानः । सोमजहिपवमानदुराध्यः । उवसंतान् । शतमुवसंतान् । वसंतानिति कस्मात् । परजतएकं । सख्याय । मरुत्वन्तं सख्याय हवामहे । वोचेमहि । वयं घ्वोवोचेमहि समर्ये । मानुषस्य । अपद्रुहो मानुषस्य दुरोवः ।

आव्यभूमेतिपादांतौ व्यंजनेषु ॥ ४८ ॥

आव्य । भूम । इत्येतौपादांतौ व्यंजनेषुप्लवेते । आव्य । अयाधियामनवे श्रुष्टिमाव्यासाकं । भूम । संविव्यइंद्रोवृजनन्न भूमाभर्ति । तपंति शत्रुंस्व १ र्णभूमा

महासेनासः। व्यंजनाधिकारेषु पुनर्व्यंजनग्रहणं लघावित्यधिकारनिवृत्त्यर्थं।

श्रुधी हवं ॥ ४९ ॥

श्रुधीत्ययंपादांतो हवमित्येतस्मिन्प्लवते। श्रुधीहवं। इमम्मेवरुणाश्रुधीहवं। हवमितिकस्मात्। उत्तरेष्वप्येवं योजना।

सद्माहोता स्मासनेमिधर्मासंभूषतारथः ॥ ५० ॥

इत्येतेच पादांताः यथागृहीतं प्लवंते।। सद्माहोता। सदूतोविश्वेदभिवष्टि सद्माहोता। स्मासनेमि। क्रतंचिद्धि स्मासनेमि। धर्मासं। समिध्यमानः प्रथमानु धर्मासं। भूषतारथः। अभूदिदंवयुनमोषु भूषतारथः।

इतिश्री पार्षदव्याख्याया मानं-
दपुरवास्तव्यवज्रटपुत्रोव्वटकृ-
ते प्रातिशाख्यभाष्ये
अष्टमंपटलं समाप्तम्।

सर्वत्रपूर्वपदांताः प्लवंते वसुमघयोः परयोः ॥ १ ॥

इत्येतयोः परयोः सतोः । वसु । पुरूवसुर्हिमघवन् । वसुं । विश्वावसुं सोमगंधर्वमापः । अश्वामघागोमघावांहुवेम । तुविदेष्णांतुवीमघं । सर्वत्रग्रहणं पादांताधिकारनिवृत्त्यर्थं । नैतदस्ति प्रयोजनं । पूर्वपदांता इत्येव सिद्धं । नहि पूर्वपदांतस्य पादांतेसंभवोस्ति । वक्ष्यतिहि । पदाभेदेन पादानां विभागइति । तत्स्थानार्थः सर्वत्रग्रहणेन यदिक्रियेतपादांतेवर्त्तमानयोरेववसुमघवोः पूर्वपदांताः भवंते । इतिविज्ञायेततदा इहैवस्यात् । त्वावतः पुरूवसो । तुविदेष्णांतुवीमघमिति । इहनस्यात् । पुरूवसुर्हि मघवन् । अश्वामघागोमघेति । नैषदोषः । नैवंहिशक्यंविज्ञातुं प्रथमानिर्दिष्टत्वात् पादांतग्रहणस्य अंतःपादाधिकारनिवृत्त्यर्थं तर्हिसर्वत्रग्रहणं क्रियते । ननुचएतदपि पूर्वपदांतइत्येवसिद्धं । नहिपूर्वपदांता अंतःपादंसंभवंति । नसिध्यति । नहिपादादिस्थस्य अंतःपादकार्याणिदृश्यंते । कस्मात् । यदयं दधिमादिषु यथोदयेषु स्तवशब्दस्य पाठेसति । शृणुधि शृणुत यंत यच्छंतस्तवेतिपादादिस्थत्वर्थं यतेचपठतितत् ज्ञापयति नपादादिस्थस्य अंतःपादकार्याणि भवंतीति । यद्येतत् ज्ञाप्यते । पूर्वस्मिन्नंतःपादाधिकारे महांइंद्रःपरश्चेतिनकारस्यलोपोनप्राप्नोति । नैषदोषः । नात्रपदंगृहीत्वा कार्यमुच्यते किंतर्हिनकारं । नकारः पुनरंतःपादंभवति । यत्रतर्हि पदंगृहीत्वा कार्यमुच्यते । तत्रदोषोभवत्येव यथावास्तोरित्येतत् पति शब्दउत्तरइति । वास्तोष्पतेप्रतिजानीह्यस्मानिति । पादादिस्थस्य नस्यात् । अमीवहावास्तोष्पत इत्येतत्पादांतस्थस्यैवस्यात् । तथा प्रवसोमहः सहस्रइडा-

षा: पात्वित्येवंपुत्रशब्दे पराणीतिइष्टैवस्यात् । पिपर्षि येत्यत्र सहस्रपुत्रदेवानिति । इष्टंनस्यात् । सहस्रपुत्रो अक्षुतइति । एवंतर्हि दीर्घभाव एवैतत् । ज्ञापकं भविष्यतीति प्रकरणात् । अन्यवत्त्वंतःपादाधिकारेवर्त्तमाने षत्वणत्वयोर्वर्णविशेषणत्वात् । वास्तोष्पतेप्रतिजानीह्यस्मान् । सहस्रपुत्रोअक्षुतइतिसिद्धंभविष्यति तज्ज्ञापकादिहैवस्यात् । वाजेषु प्रासहमित्यादिषु इष्टंनस्यात् । प्राषहासद्याडित्येवमादिषु तस्मात्सर्वत्रग्रहणं क्रियते । वसुमघयोरितिकस्मात् । हरीविपक्षसारथे ।

रवेतुवि ॥ २ ॥

रवेप्रत्यये तुविइत्येवंपूर्वपदांताः प्लवंते । सत्राहासंतुवीरवंपतिर्दन् । कथाकविस्तुवीरवान् । रवइतिकस्मात् । तुविदेष्णं ।

विश्वविभ्व धन्व रथर्ति मक्षु द्युम्न यज्ञेति सहतौ ॥ ३ ॥

विश्व । विभ्व । धन्व । रथ । ऋति । मक्षु । द्युम्न । यज्ञ । इत्येतेपूर्वपदांताःसहतौप्रत्यये प्लवंते । विश्व । विश्वासाहमवसे नूतनाय । विभ्व । होतर्विभ्वासहंरयिं । धन्व । धन्वासहानायते । रथ । युक्ष्वाहि त्वंरथासह । ऋति । तंवोदस्म मृतीषहं । मक्षु । मक्षूषाहःस्वम्नयः । द्युम्न । द्युम्नासाह मभियोधानउक्थं । यज्ञ । यज्ञासाहं दुवइषे ।

प्रचाप्लुते ।

प्रइत्ययंचपूर्वपदांतःप्लवते अप्लुतेसहतौ प्रत्यये । प्रचेति । प्रासहस्पतिस्तुविष्मान् । अप्लुतइतिकस्मात् । मत्सरासोजर्हृषंतप्रसाहं ।

सहप्रवादा उदयास्तमांताः ॥ ४ ॥

वसु । मघ । रथ । सहति । हृति । वर्त्त । यवस । तम । इत्येतेतमांताःउदयाः सहप्रवादावेदितव्याः । एतेषामाद्यानांचतुर्णां सहप्रवादानामुक्तान्युदाहरणानि । अवशिष्टानामुत्तरत्रोदाहरिष्यामः ।

पर्यभ्यपापीतिवृतावृवर्णे ॥ ५ ॥

परि । अभि । अप । अपि । इत्येतेषांचपूर्वपदांताः प्लवंते । वृतौतु ऋवर्णप्रत्यये । परि । अपोविभ्रतं तमसापरीवृतं । अभि । वृतेनद्यावापृथिवीअभीवृते । अभीवृतंकृशनैर्विश्वरूपम् । अप । राधोविश्वायु शवसेअपावृतं । अपि । अपीवृतो अधयन्मातुरूधः । ऋवर्णइतिकस्मात् । उतव्रजमपवर्तासिगोनां ।

अभीवर्त्तःसूयवसोरथीतमःपुरूतमोनंतरर्धर्चउत्तमः ॥ ६ ॥

अभीवर्तः । सूयवसं । रथीतमः । पुरूतमः । इत्येतेषांच पूर्वपदांताःप्लवंते । उत्तमस्तु पुरूतमइत्यर्धर्चस्यादौ अंतेचवर्त्तमानः प्लवते । अभीवर्त्तः । अभीवर्तेन हविषा । अभीवर्तो यथाससि । सूयवसं । प्रजावतीः सूयवसंरिशंतीः । धेनुंनत्वा सूयवसे दुदुक्षन् । रथीनां । रथीतमं

रथीनां । पवमानोरथीतमः । पुरुहूतमं । पुरुहूतमंपुरूणां । अध्वराणांपुरुहूतमम् । अनंतरर्धंचंइतिकस्मात् । मरुतांपुरुतमममपूर्व्यं ।

कवर्द धान्यमिथुचर्षणिस्तनपिवेति सर्वंचयथोदयंच ॥ ७ ॥

कव । ऋद् । धान्य । मिथु । चर्षणि । स्तन । पिव । इत्येतेषांचपूर्वपदांताः प्लवंतेयथोदयंच । कव । तनूशुभ्रंमघवायः कवासखः । ऋदु । ऋदूपेचिदृदूवृधा । धान्य । वयंतोबीजमिव धान्याकृतः । मिथु । निष्षापया मिथूदृशा । चर्षणि । गांनचर्षणीसहम् । चर्षणीधृत मघवानमुच्यम् । स्तन । स्तनाभुजोअशिश्वीः । पिव । पिबापिबेदिन्द्रशूरसोमं । सर्वंचग्रहण मनंतरर्थंचं इत्यधिकारनिवृत्त्यर्थं ।

त्विष्युक्थेत्येता उदयेमकारे ॥८॥

त्विषि । उक्थ । इत्येतेपूर्वपदांतौ प्लवेते मकारे उदये । त्विषि । त्विषीमंतो अध्वरस्येवदिद्युत् । उक्थ । बृहस्पति रुक्थामदानिशंसिषत् । मकारइतिकस्मात् । उक्थभृतं सामभृतं ।

पर्युर्वच्छे त्यमकारेनुनासिके ॥९॥

परि । उरु । अच्छ । इत्येतेपूर्वपदांताःप्लवंते । अनुनासिकेप्रत्यये मकारंवर्जयित्वा । परि । चक्राणासः परीणहंपृथिव्याः । उरु । उरूणसावसुतृपाउदुंबलौ ।

यज्ञ। यज्ञानष्ठो नष्ठतमोतसोम्याः। यमकारइतिकस्मात्। विप्रासःपरिमाव्यः।

पित्र्यमाहिनार्क्षषिभंगुराश्वविश्वदेव्यभेषजतुग्र्यापस्त्य। सुम्नर्त्तारातौ स्वुदयेवकारे॥ १० ॥

पित्र्य। माहिन। ऋक्षाषि। भंगुर। अश्व। विश्वदेव्य। भेषज। तुग्र्य। पस्त्य। सुम्न। ऋत। अराति। इत्येतेपूर्वपदांताः प्लवंते वकारेप्रत्यये। पित्र्य। योषेवपित्र्यावती। माहिन। त्वमीक्षः पत्यते माहिनावान्। ऋक्षाषि। बह्वनामक्षाषो बलम्। भंगुर। अपहतरक्षसो भंगुरावतः। अश्व। अश्वावतींसोमावतीम्। विश्वदेव्य। विश्वकर्मणा विश्वदेव्यावता। भेषज। भेषजावान्। तुग्र्य। मंदंतुतुग्र्यावृधः। पस्त्य। मर्योदिवधन्वपस्त्यावान्। सुम्न। सुम्नावरी सूनृताः। ऋत। ऋतावायस्य रोदसी। अराति। अरातीवामानस्तारीत्। वकारइतिकस्मात्। येअश्वदाउत।

वैभ्वादयश्च॥ ११ ॥

वैभ्वादयश्च पूर्वपदांताःप्लवंते वकारेप्रत्यये। वैभ्वादीनुत्तरत्रोदाहरिष्यामः।

पृथ्वनादयस्तु यकारे॥ १२ ॥

पृथ्वनादयस्तु पूर्वपदांताः प्लवंते यकारेप्रत्यये। पृथ्वनादींश्चोत्तरत्रोदाहरिष्यामः।

अरातिकविसुक्रतुश्रुधिपितुसुम्नरय्यृताश्वेति चैते ॥ १३ ॥

(१)अराति । अरातीयतोनिदह्वातिवेदः । कवि । कवीयमानः कइह । सुक्रतु । वियोममेरजसी सुक्रतूयया । श्रुधि । श्रुधीयतश्चिद्यथतो महित्वा । पितु । प्रवतेअग्नेजनिमा पितूयतः । सुम्न । सुम्नायवईमहेदेवयंतः । रयि । अयमुवां पुरुतमो रयीयन् । ऋत । ऋतायिनी मायिनी । अश्व । अश्वायंतो गव्यंतः । यकारइतिकस्मात् । येअश्वदाउत ।

नत्वश्वसुम्नर्तवृषेतिपद्याएकाक्षरा दाउदयेयकारे ॥ १४ ॥

नतुखलुप्लवंते । अश्व । सुम्न । ऋत । वृष । इत्येतेपद्या एकाक्षरादौप्रत्यये यकारे । अश्व । अश्वयुर्गव्यूरथयुर्वसूयुः । सुम्न । तंवःशर्द्धंमारुतंसुम्नयुः । ऋत । त्वंनइन्द्र ऋतयुः । वृष । अत्योनयूथे वृषयुःकनिक्रदत् । एकाक्षरादावितिकस्मात् । अश्वायंतो गव्यन्तः । सुम्नायव ईमहेदेवयन्तः । ऋतायिनीमायिनी । वृषायमाणो वृणीत । यकारइतिकस्मात् । ऋतावायस्य रोदसी ।

पृश्नाजिरर्जुमधुप्रुतिजनिक्रतुवल्गुवंधुरब्रकांकुदम । वृजिनाध्वरीषुवृषमध्यसखिस्तभुदच्छुना-

---

(१) इत्येतेचपूर्वपदांताः प्लवंतेयकारेप्रत्यये ।

घयविशत्रुवसु ॥ १५ ॥

इतीमेपृतनादयः येपूर्वसूत्रेनिर्दिष्टाः । पृतन । ता अस्यपृतनायवः । अजिर । स्तोममिंद्रा जिरायते । ऋजु । ऋजूयंतमनुव्रतं । मधु । यमूषुवांमधूयुवा । प्रुषि । प्रुषीयंतःसुदानवः । जनि । जनीयंतो न्वग्रवः । क्रतु । क्रतूयंति क्रतवः । वल्गु । वल्गूयति वंदतेपूर्वभाजं । बंधुर । यःसूर्यावहति बंधुरायुः । वृक । वृकायुरादिदेशति । अंकु । यमंकूयंत मानयन् । दम । शृण्वेवीर उग्रमुग्रंदमायन् । वृजिन । सस्वधूतं वृजिनायंत माभुं । अध्वरि । जामयोअध्वरीयतां । इषु । क्रत्वावेधा इषूयते । वृष । वृषायमाणो वृणीतसोम । मध्य । मध्यायुवउपशिक्षंतियज्ञैः । सखि । विश्वस्पुष्टिः सखीयते । स्तभु । स्तभूयमानं वहतोवहन्ति । दुच्छुन । किमस्मान्दुच्छुनायसे । अघ । अघायते जातवेदः । यवि । सधनीजन्ये सहसायवीयुत् । शत्रु । शत्रूयंतो अभि । वसु । अश्वयुर्गव्यूरथयुर्वसूयुः ।

वैभुक्रादनिप्रुषपर्वताहुतिशुभ्रहृदयामतिसहस्रणायश्रान्ति । समिस्वधितिक्षयानवयुनर्यांवृषाहितधितविप्रुसुतर्त्विर्वयनीथ ॥ १६ ॥

इतीमेवैभ्वादयः । येपूर्वसूत्रेनिर्दिष्टाः । वैभु । वैभूवसोम्मूर्ध्वन्यघ्न्यायाः । क्रादुनि । अध्या चिन्मुञ्जरा क्रा-

दुनीहतः । पुष्ट । पुष्टावन्तो यथापशुं । पर्वत । मरुतः पर्वतावृधः । आहुति । युवानमाहुतीवृधं । शुभ्र । अंतःशुभ्रावतापथा । हृदय । उतापवक्ता हृदयाविधश्चित् । अमति । नमस्तोतामतीवा । सह । सहावा इंद्रसानसिः । वृषण्य । यःपत्यते वृषभोवृषण्यावान् । शक्ति । शक्तीवोयद्विभरारोदसी उभे । सप्ति । सप्तीवंता सपर्यवः । स्वधिति । रुक्मोनचित्रस्वधितीवान् । कृशन । मदच्युतकृशनावतः । वयुन । विश्वोवादधे वयुनाविदेकइत् । ऋण । ऋणावाबिभ्यद्धनमिच्छमानः । घृणि । घृणीवा चेतति त्मना । हित । विपन्यामहे विपणिर्हितावान् । धित । स्तुष्टीवानंधितावानं । विषु । विषूवृदिंद्रो अमतेरुत । सुत । सुतावंतस्त्वावयं । ऋत्विय । इयंतऋत्वियावती । नीथ । नीथाविदोजरितारः ।

ऋतवाकेनाश्ववित्सुम्नयंतावसु-
वसुप्रसहानोभिवावृते । परिवृ-
तेनाभिवृत्य ॥ १७ ॥

इत्येतेपूर्वपदांताः पूर्वलक्षणप्राप्ता नप्लवंते । ऋतवाकेना । ऋतवाकेनसत्येन । अश्ववित् । परिणो अश्वमश्ववित्सुम्नयंता । गीर्भिर्मित्रावरुणासुम्नयंता । वसुवसु । वसुवसुवः पार्थिवासुन्वते । प्रसहानः । सनीलेभिः प्रसहानः । प्रचाप्लुतइतिप्राप्ते । अभिवावृते । येनेंद्रोअभिवावृते । पर्यभ्यपापीतिवृतावृवर्ण इति वृतौतुऋवर्णप्रत्यये इति प्राप्ते । अत्रोच्यते । वकारेण व्यवधानात्प्राप्तिरेव-

नास्ति । तस्मान्नार्थः प्रतिषेधनिपातनेन । एवंसिद्धेसति यन्निपातनं करोति । तज्ज्ञापयत्याचार्यः । व्यवहितेपि निमित्तेक्वचित्कार्यं भविष्यतीति । किमेतस्यज्ञापनेन प्रयोजनं । उदात्तपूर्वं स्वरितमनुदात्तंपदेचरमिति । इंद्रद्युत्यत्र नकारदकाररेफव्यवहितस्यापि स्वरितस्यअकारस्य अनुदात्तत्वंभवतीति स्यान्मतम् वचनाद्भविष्यतीति । अस्तिवचनस्यावकाशः । प्रउगमिति । परिहृतंन । अपाहृषिपरिहृतन्नराधः । नेतिकस्मात् । अपोबिभ्रतं तमसापरीवृतं । अभिवृत्य । अभिवृत्यसपत्नान् ।

अश्ववश्चपादांते ॥ १८ ॥

अश्ववदित्येतस्मिन्पूर्वपदांतः पादांते नतुप्लवंते । अश्ववत् । दधानोगोमदश्ववत् । पादांतइतिकस्मात् । अश्वावद्गोमद्यवमत् ।

सर्वत्रपरेमघस्य ॥ १९ ॥

मघ इति षष्ठ्यंतेपरेसति वसुमघयोरितिप्राप्ते नप्लवते । मघस्य । प्रायंस्तुषेतुविमघस्यदानं । षष्ठ्यंतादन्यत्र प्लवते । श्रुधिचित्रामघेहवं । सर्वत्रग्रहणं पादांताधिकारनिवृत्त्यर्थं ।

अश्वयूपायाश्वयुजोश्वयोगाःसह्वाहःसुम्नयंतर्त्तयंत । सह्वसुंसह्वत्सर्त्तयुक्तिंसह्वीरंवयुनवच्चकार ॥ २० ॥

इत्येतेषांचपूर्वपदांताः पूर्वलक्षणप्राप्ता नप्लवंते । अश्वयूपाय । चषालंये अश्वयूपाय तक्षति । अश्वयुजः । वयोवृधो अश्वयुजः परिज्मयः । अश्वयोगाः । उतन ईमतयोश्वयोगाः । सहवाहः । बृहस्पतिं सहवाहो वहंति । सुम्नयंता । गीर्भिर्मित्रावरुणा सुम्नयंता । ऋतयंत । कदुस्तुवंत ऋतयंत । सहवसुं । योनामरं सहवसुं । सहवत्सा । दानुः शयेसहवत्सानधेनुः । ऋतयुक्तिं । ऋतंवदंत ऋतयुक्तिमग्मन् । सहवीरं । धातारयिं सहवीरं तुरासः । वयुनवच्चकार । सूर्येण वयुनवच्चकार । चकारेति कस्मात् । ज्योतिस्तमसो वयुनावदस्यात् ।

सुम्नायुर्जुह्व ऋताय न्नृतायुमुग्रादेवंदक्षिणावान्नृतायोः । वृषारवायसूमयंशतावन्नपीजुवापरीवृतोनपावृत् ॥ २१ ॥

इत्येतेषांपूर्वपदांताः प्लवंते । सुम्नायुः । सुम्नायुर्जुह्वे अध्वरे । जुह्व इति कस्मात् । देवांजिगातिसुम्नयुः । ऋतायन् । सर्गोनसृष्टो अर्वतीऋतायन् । ऋतायुं । उदीमृतायुमीरयत् । एतेषां त्रयाणामेकाक्षरादा उदयेयकार इति प्रतिषेधेप्राप्ते निपातनं । उग्रादेवम् । उग्रादेवंहवामहे । दक्षिणावान् । हस्तेदधे दक्षिणे दक्षिणावान् । ऋतायोः । प्रणेतारः कस्यचिदृतायोः । अस्यापिप्रतिषेधेप्राप्ते निपातनं । वृषारवाय । वृषारवायवदते । सूमयं । तुविक्षंतेसुकृतंसू-

नास्ति । तस्मान्नार्थः प्रतिषेधनिपातनेन । एवंसिद्धेसति यन्निपातनं करोति । तज्ज्ञापयत्याचार्यः । व्यवहितेपि निमित्तेक्वचित्कार्यं भविष्यतीति । किमेतस्यज्ञापनेन प्रयोजनं । उदात्तपूर्वं स्वरितमनुदात्तंपदेक्षरमिति । इंद्रइत्यत्र नकारदकाररेफव्यवहितस्यापि स्वरितस्यअकारस्य अनुदात्तत्वंभवतीति स्यान्मतम् वचनाद्भविष्यतीति । अस्तिवचनस्यावकाशः । प्रउगमिति । परिवृतंन । अपावृधिपरिवृतन्नराधः । नेतिकस्मात् । अपोबिभ्रतं तमसापरीवृतं । अभिवृत्य । अभिवृत्यसपत्नान् ।

अश्ववच्चपादांते ॥ १८ ॥

अश्ववदित्येतस्मिन्पूर्वपदांतः पादांते नतुप्लवते । अश्ववत् । दधानोगोमदश्ववत् । पादांतइतिकस्मात् । अश्वावद्गोमद्यवमत् ।

सर्वत्रपरेमघस्य ॥ १९ ॥

मघ इति षष्ठ्यंतेपरेसति वसुमघयोरितिप्राप्ते नप्लवते । मघस्य । प्रार्यस्तुषेतुविमघस्यदानं । षष्ठ्यंतादन्यत्र प्लवते । श्रुधिचित्रामघेहवं । सर्वत्रग्रहणं पादांताधिकारनिवृत्त्यर्थं ।

अश्वयूपायाश्वयुजोश्वयोगाःसहवाहःसुमयंतत्त्वयंत । सहवसुंसहवत्सत्त्वयुक्तिंसहवीरंवयुनवच्चकार ॥ २० ॥

इत्येतेषांचपूर्वपदांताः पूर्वलक्षणाप्राप्ता नप्लवंते । अश्वयूपाय । चषालंये अश्वयूपाय तक्षति । अश्वयुजः । वयोवृधो अश्वयुजः परिज्रयः । अश्वयोगाः । उतन ईंमतयोश्वयोगाः । सहवाहः । बृहस्पतिं सहवाहो वहंति । सुम्नयंता । गीर्भिर्मित्रावरुणा सुम्नयंता । ऋतयंत । कदुस्तुवंत ऋतयंत । सहवसुं । योनामरंसहवसुं । सहवत्सा । दानुः शयेसहवत्सानधेनुः । ऋतयुक्तिं । ऋतंवदंत ऋतयुक्तिमग्मन् । सहवीरं । धातारयिं सहवीरं तुरासः । वयुनवच्चकार । सूर्येण वयुनवच्चकार । चकारेति कस्मात् । ज्योतिस्तमसो वयुनावदस्थात् ।

सुम्नायुर्जुह्व ऋताय न्नृतायुमुग्रादेवंदक्षिणावान्नृतायोः । वृषारवायसूमयंशतावन्नपीजुवापरीवृतोनपावृत् ॥ २१ ॥

इत्येतेषांपूर्वपदांताः प्लवंते । सुम्नायुः । सुम्नायुर्जुह्वे अध्वरे । जुह्वइतिकस्मात् । देवांजिगातिसुम्नयुः । ऋतायन् । सर्गोनसृष्टोअर्वतीर्ऋतायन् । ऋतायुं । उदीमृतायुमीरयत् । एतेषां त्रयाणामेकाक्षरादा उदयेयकार इति प्रतिषेधेप्राप्ते निपातनं । उग्रादेवम् । उग्रादेवंहवामहे । दक्षिणा वान् । हस्तेदधे दक्षिणे दक्षिणावान् । ऋतायोः । प्रणेतारः कस्यचिदृतायोः । अस्यापिप्रतिषेधेप्राप्ते निपातनं । वृषारवाय । वृषारवायवदते । सूमयं । तुविष्मंतेसुकृतंसू-

मघंघनुः । शतावन् । बद्दिष्ठयोः शतावन्नश्वयोरा । अपीजुवा । उषासानक्ता जगतामपीजुवा । अपरीवृतः । अपरीवृतो वसति प्रचेताः । अनपावृत् । इत्याद्वजाना अनपावृदर्थं ।

इंद्रावतः सोमावती मवायती
दीर्घाधियो मित्रायुधो रथीतरः
। अन्नावृधं विश्वापुषं वसूजुवं-
विश्वाभुवे यज्ञायते घृतावृधा ॥२२॥

इन्द्रावतः । सोमावतीम् । अवायती । दीर्घाधियः । अमित्रायुधः । रथीतरः । अन्नावृधं । विश्वापुषम् । वसूजुवं । विश्वाभुवे । यज्ञायते । घृतावृधा । इत्येतेषां पूर्वपदांताः प्लवंते । इंद्रावतः । ऋजिषर्इमिंद्रावतोनभुज्युं । सोमावतीं । अश्वावतीं सोमावतीं । अवायती । कन्यारवारवायती । दीर्घाधियः । दीर्घाधियोरक्षमाणा असुर्यं । अमित्रा युधः । अमित्रायुधो मरुतामिवप्रयाः । रथीतरः । नकिष्टद्रथीतरः । अन्नावृधं । अन्नावृधंप्रतिचरंत्यन्नैः । विश्वापुषं । पुत्रांउतविश्वापुषंरयिं । वसूजुवं । वसवानं वसूजुवं । विश्वाभुवे । अर्चाविश्वानराय विश्वाभुवे । यज्ञायते । यज्ञायते वापशुषोन । घृतावृधा । घृतश्रियाघृतपृचाघृतावृधा ।

सुम्नायन्निन्मित्रायुव ऋषीवोदे-
वावान्दिवः । एवावदस्य चे-

चासा ऋताव्ने सदनासदे ॥२३॥

सुम्नायन्नित् । मित्रायुवः । ऋषीवः । देवावान्दिवः । एवावदस्य । येवासाम् । ऋताव्ने । सदनासदे । इत्येतेषां पूर्वपदांताः प्लवंते । सुम्नायन्नित् । सुम्नायन्निद्विप्रो अस्माकम् । इदितिकस्मात् । अर्चामि सुम्नयन्नहं । मित्रायुवः । मित्रायुवो न पूर्पतिंसुशिष्टौ । ऋषीवः । शिप्रिन्नृषीवः शचीवः । देवावान्दिवः । सोमंभरद्दाहृषाणो देवावान्दिवः । दिवइतिकस्मात् । सगृभ्णामो अग्निर्देववानिति । एवावदस्य । एवावदस्य यजतस्यसध्रेः । येवासां । येवासां ददथुर्वरासाम् । ऋताव्ने । ऋताव्नेबृहते शुक्रशोचिषे । सदनासदे । देवायसदनासदे ।

पदेष्वन्तरनिंग्येषुप्लुतिः पदेषुचोत्तरा ॥ २४ ॥

अनिंग्येषुपदेषु अंतःपदेषु च उत्तराप्लुतिर्भविष्यति । यदित ऊर्ध्वमनुक्रमिष्यामः । उत्तरत्रोदाहरिष्यामः ।

वृषस्व वंथ वृध्वांसंवाता वातुर्वनोवृतुः । वृतेवृषाणा वृषाणो वृजे वंधि मृजु मृशुः । मृजेमृजीत वानैषांवमेतिसहस्रादिषु ॥२५॥

वृषस्व । वंथ । वृध्वांसं । वाता । वातुः । वनः । वृतुः । वृते । वृषाणाः । वृषाणः । वृजे । वंधि । मृजु । मृशुः । मृजे । मृजीत । वाम । इत्येतेषामुदयानां सदृशादिषूदयेषु वकारमकारौ भवेते । वृषस्व । उद्वावृषस्वमघवन् । वंथ । यद्वावंथ पुरुष्टुत । वृध्वांसमिहग्रहणमनर्थकं । आवयादिषु पठितत्वात् । द्रावयदावृधवावृधेतिपाठात् । नार्थकं आवयादिषु वावृधस्येति धकारांतस्येतिग्रहणं । इहतुवृधकारांतग्रहणं । सोष्मातुपूर्व्वेणासहोच्यते सकृत्स्वेनेतिदकारभावात् । वृध्वांसं । वावृध्वांसं चिदद्रिवः । वाता । उपब्रध्नंवावातावृषणा । वातुः । वावातुः सख्युरागहि । वनः । विश्वेभिर्यद्वावनः । वृतुः । विश्वाचक्रे वनावृतुः । वृते । येनेन्द्रो अभिवावृते । वृषाणाः । महोवाजस्यसातौ वावृषाणाः । वृषाणः । उद्वावृषाणो राधसे । वृजे । प्रवावृजेसुप्रयाः । वंधि । वावंधियज्यूंरुततेषु धेहि । मृजुः । देवासस्त्वो २ निमामृजुः । मृशुः । विप्रासःपरिमामृशुः । मृजे । निमामृजे पुरइंद्रः सुमर्वाः । मृजीत । विसात्येतन्वं मामृजीत । वाम । यद्वावानपुरुतमंपुराषाट् । पदेष्वंतरिति पूर्वपदांताधिकारनिवृत्यर्थः । अंतरनिंग्येष्विति कस्मात् । संतेशस्तिर्देववाताजरेत । सदृशादिष्विति कस्मात् । वकारस्यमकादिषुमाभूत् ।

सहेत्यादिःपूर्वपदोपधःसन्नेकाक्षरंचर्षणिधन्ववर्जं ॥ २६ ॥

सहेत्यादिःपूर्वपदोपधःसन् भवते । एकाक्षरंच पूर्व-

पदं चर्षणिधन्वइत्येतेच वर्जयित्वा । सह । विश्वासाहमवसे नूतनाय । शत्रूषाहः स्वग्नयः । पूर्वपदोपधः सन्निति कस्मात् । घृषाह्वायसहमानायवेधसे । एकाक्षरंचर्षणिधन्ववर्जमिति कस्मात् । एकाक्षरं । प्रासहासम्राट् सहुरिंसहंतं । चर्षणि । गांनचर्षणीसहसं । धन्व । धन्वासहा नायते । सहेत्यादिरिति धातुग्रहणात् चतुःसहस्रमित्यत्रनभवति ।

नतु पादस्याष्टिनोंतंगतस्य ॥२७॥

नतुखल्वस्याष्टाक्षरस्य पादस्यांतंगतस्य सहेत्यादिःप्लवते । तंवोदस्ममृतीषहं । अष्टिनइतिकस्मात् । सहस्रवाजमभि मातिषाहं । अंतंगतस्येति कस्मात् । यज्ञासाहंदुवइषे ।

नद्वादशिनोऽनभिमातिपूर्वः ॥२८॥

नतुखलु द्वादशाक्षरस्य पादस्यांतेवर्त्तमानस्य उत्तरपदस्य सहतेरादिः अनभिमातिपूर्वः सन्प्लवते । सत्रासाहो जनभक्षोजनंसहः । द्वादशिनइतिकस्मात् । सतोवीराउरवोव्रातसाहाः । अंतंगतस्येति कस्मात् । सत्रासाहेनमइंद्रायवोचतम् । अनभिमातिपूर्वइतिकस्मात् । श्रुतऋषिमुग्रमभि मातिषाहं ।

अभिमातिनृपृतनोपधस्तुसर्वत्रपरप्लवतेयकारे ॥ २९ ॥

अभिमाति । नृ । पृतना । इत्येवमुपधस्तु सहतेरा-

हि: सर्वत्रयकारेपरे प्लवते । अभिमाति । अभिमातिषाह्ये । नृ । नृषाह्ये सासह्वां अमित्रान् । अषाढ्यंतद्विरीहिसं नृषाह्ये । पृतना । पृतनाषाह्याय च । किमर्थंसहतेर्यकारे पुनरेवविधीयते । ननु पूर्वेणैवसिद्धं नसिध्यति । कथं । शिषिचापठितेसतीत्यधिकारात् पूर्वेणासंयोगे नप्राप्नोति तस्मात्संयोगपरार्थं पुनर्विधीयते । यकारइतिकस्मात् । नमसेपृतनाषहं । सर्वत्रेतिकस्मात् । षष्टिद्वादशिनोः पादांतगतस्येत्यधिकारात् । नृषाह्ये सासह्वां अभिचान् । पृतनाषाह्याय च । इत्यवनस्यादिति ।

आवयादीनामुदयास्त्रिवर्णाः पदैकदेशादितितान्प्रतीयात् ॥ ३० ॥

आवयइत्येवमादीनांप्लुतानामुदयास्त्रिवर्णाएव वेदितव्याः । आकारउच्चारणार्थोद्रष्टव्यः । पदानामेकदेश इति ताङ्छ्राविथादौ नप्रतीयात् । तस्माच्छ्रावयइतिगृहीते आश्रावयंत इत्यत्रापि भवति तानुत्तरत्रोदाहरिष्यामः ।

आवय यावय च्यावययामय रामयमामहवावस । द्रावयदाहहवाहयताहयसासहवारय । आद्युत्तरंप्लुतंतेषां ॥ ३१ ॥

आवय । यावय । च्यावय । यामय । रामय । मा-

मह । वावस । द्रावय । दादृह । वावृध । तातृष । सासह । रारय । इत्येते आवयादयः । तेषामाद्याक्षरंप्लुतं भवति । आवय । आश्रावयत्तदूव आवयावाचम् । यावय । यावयाद्वक्ष्यं १ हकं । च्यावय । आच्यावयस्तूतये । यामय । आनः सुम्नेषुयावय । रामय । निरामयजरितः सोमे । मामह । तन्नोमित्रोवरुणोमामहंतां । कोन्वत्रमरुतोमामहेवः । वावस । वावसानाविवस्वति । वावसे । सत्यामनुस्फिरयंवावसेवृषा । द्रावय । अध्वर्योद्रावयात्वं । द्रावयित्नवः । सूर्यस्येवरश्मयो द्रावयित्नवः । दादृह । दादृहाणा वज्रमिंद्रोगभस्त्योः । वावृध । वावृधानाशुभस्पती । वावृधीथा गीर्भिरिवद्यौः । तातृष । तीर्थेनाच्छाता तृषाणामौकः । यस्तातृषाणउभयायजन्मने । सासह । येनासमत्सु सासहः । सुप्रकेतेभिःसासहिः । रारय । शोचिषारारयीतिमिवमहाः ।

अनन्वित्यस्यमध्यम ॥ ३२ ॥

अनन्वित्येतस्य मध्यममक्षरंप्लुतं भवति । अननु । अनानुदोवृषभोजग्मिः ।

द्विवर्णः प्रत्ययोन्त्यस्य ॥ ३३ ॥

तेषांआवयादीनां अंत्यस्यरारयइत्येतस्य द्विवर्णएवप्रत्ययोवेदितव्यः । सोमरारंधिनोहृदि ।

प्रवादाः षडितः परे ॥ ३४ ॥

परेये वक्ष्यन्ते । तेप्रवादाइति वेदितव्याः । तान्

तत्रोदाहरिष्यामः ।

दूणाशं ॥ ३५ ॥

दूणाशमित्ययं प्लवते । दूणाशं । दूणाशंसख्यंतव । दूणाशेयं दक्षिणापार्थवानां ।

उक्थशासश्च ॥ ३६ ॥

उक्थशास इत्ययंप्लवते । उक्थशासः । अस्तुटप उक्थशासश्चरंति । यज्ञंन्यंसामगा मुक्थशासं ।

इकारांतश्च दाधृषिः ॥ ३७ ॥

दाधृषिरित्ययंप्लवते इकारांतः सन् । दाधृषिः । ब्रह्मणायामिसवनेषु दाधृषिः । सवाहणं दाधृषिं । इकारांतइति कस्मात् । वाजेषुदधृषंकवे ।

पादांतेऽपद्यःसादनं ॥ ३८ ॥

पादांतेवर्तमानः अपद्यः सन्सादनइत्ययं प्लवते । सादनम् । धाराऋतस्यसादने । द्युक्षंमित्रस्यसादनं । पादांतइतिकस्मात् । योनिष्टइंद्रसदने अकारि । अपद्यइतिकस्मात् । रण्वानरोनृषदने ।

अर्धर्चांतेतु पूरुषः ॥ ३९ ॥

पूरुषइत्ययंतु अर्धर्चांतेवर्तमानः प्लवते । पूरुषः । विराजोअधिपूरुषः । आत्मानंतव पूरुषः । अर्धर्चांतइति कस्मात् । सहस्रशीर्षा पुरुषः ।

दोषामस्मैराजतोऽक्रन्वनस्पती-
न्महीयमानांकतितुभ्यमेभ्यः ।
उषासमित्युत्तरंसर्वदेश्यम् ॥४०॥

दोषां । अस्मै । राजतः । अक्रन् । वनस्पतीन् । महीयमानां । कति । तुभ्यं । एभ्यउत्तरमुषसमिति प्लवते । सर्वदेश्यं सर्वत्रेत्यर्थः । दोषाम् । दोषामुषासमीमहे । अस्मै । अस्माउषास आतिरं । राजतः । अधिश्रियाविराजत उषासावेहसीदतां । अक्रन् । अक्रन्नुषासो वयुनानि । वनस्पतीन् । आपप्रुंगासि पृथिवींवनस्पतीनुषासा । मह्नीयमानां । मह्ना न्महीयमानां उषासमिन्द्र संपिणक् । कति । कत्युषासः कत्युस्विदापः । तुभ्यं । तुभ्यमुषासःशुचयः परावति । सर्वदेश्य ग्रहणमधर्चांताधिकारनिवृत्त्यर्थं । सर्वत्रेतिसिद्धेसर्वदेश्यग्रहणं नानार्धर्चस्थादपि निमित्तात्प्राप्त्यर्थं ।

पादस्यचैकादशिनोयदन्ते ॥४१॥

एकादशिनोक्षरस्यपादस्यान्तेवर्त्तमानं यदुषासमिति तच्चप्लवते । रेवदुच्छंतुसुदिना उषासः । एकादशिनइतिकस्मात् । अग्नेविवस्वदुषसः । अंतइतिकस्मात् । अग्रे बृहन्नुषसामूर्ध्वः । इतिषट्प्रवादाःसमाम्नाः ।

यवयुररमयः ससाह्विषेवर्धंतो-
रमया गिराररभ्म । यवयसि-

ततृषाणामोषतिश्रवयंतोददृहंततेनृषह्ये ॥ ४२ ॥

यवयुः । अरमयः । ससाहिषे । ववृधंतः । रमयागिरा । ररभ्म । यवयसि । ततृषाणामोषति । श्रवयंतः । अददृहंत । तेनृषह्ये । इत्येतानिचपूर्वस्त्रयोक्तानि प्राप्तानि नप्लवन्ते । यवयुः । त्वामिद्यवयुर्मम । अरमयः । अरमयः सरपसस्तरायकं । ससाहिषे । प्रससाहिषे पुरुहूतशत्रून् । ववृधंतः । शुचन्तोअग्निंववृधंतइंद्रं । रमयागिरा । नमस्यारमयागिरा । गिरेतिकस्मात् । निरामयजरितः । ररभ्म । ररभ्माशवसस्पते । यवयसि । अस्थानायवयसि । ततृषाणां । ददन्नविष्ट्वंततृषाणामोषति । ओषतीतिकस्मात् । तीर्थेनाक्षातांतृषाणामोषः । श्रवयंतः । अगोह्यं श्रवयंत एतन । अददृहंत । यदेदंता अददृहंत पूर्वे । तेनृषह्यइतिअभिमातिनृपृतनोपधस्तुतइतिप्राप्ते तेनृषह्ये । इंद्रदेवेभिरनुतेनृषह्ये । तेइतिकस्मात् । नृषाह्ये सासह्वांअमित्रान् ।

श्रवयतंवाजसातौनृषह्येविभ्वासहंदूणाशारोचनानि । नतृषाणोयमयोररभ्णेपुरुषीणांयवयंलिंदवश्च ॥ ४३ ॥

श्रवयतं । वाजसातौ नृषह्ये । विभ्वासहं दूणाशारोचनानि । ननृषाणो यमयो ररभ्णे पुरुषीणाम् । यवयं-

त्विंद्व: । इत्येतानिपूर्वलक्षणप्राप्तानिनप्लवंते । अवयत । आनोजनेअवयतं युवाना । वाजसातौ नृषह्यइत्यभिमातिनृषतनोपधस्तुइतिप्राप्ते । परिअववाजसातौ नृषह्ये । वाजसाताविति कस्मात् । नृषाह्येसासह्वां षमिवान् । विश्वासहमितिसहेत्यादिरितिप्राप्ते । विश्वासहं । होतर्विश्वासहंरयिं । षलित:परेइति प्राप्ते दूणाशारोचनानि । चिकित्तमादूणाशारोचनानि । रोचनानीतिकस्मात् । दूणाशेयंदक्षिणा पार्थवानां । नतदूषाणा: । आयोदूषोऋतदूषाणोअजर: । नेतिकस्मात् । यस्तादूषाणा उभयाथजन्मने । यमयो: । यमयोश्चिन्नसमावीर्याणि । ररक्षे । वियोरराक्ष ऋषिभि र्नवेभि: । पुरुषीणामिति अधचांते तुपूरुषइतिप्राप्ते । पुरुषीणाम । पर्जन्य:पुरुषीणां । यवयंत्विंद्व: । इंद्रवइतिकस्मात् । तेविश्वास्मद्दुरितायावयंतु ।

ररक्षयवयस्तेनंससाह्येयवयावधं । परमयाइवयंतअवयन्नरतेचन ॥ ४४ ॥

ररक्ष । यवयस्तेनं । ससाह्वे । यवयाद्वेषं । परमया । इवयंत । अवयन् । ररते । इत्येतानि पूर्वलक्षणप्राप्तानि नप्लवंते । ररक्ष । ररक्षतांत्सुकृतो विश्ववेदा: । यवयस्तेनम् । यवयस्तेनमृम्यें । स्तेनमिति कस्मात् । यावयाद्वेषं १ द्वेषं । ससाह्वे । (१)ससाह्वेअक्र: पृतनाअभिष्टि: । यवयावधं । वरीयोयवयावधं । वधमितिकिं । यावया-

---

(१) बृहस्पतिमायुजेन्द्र: ससाह्वे उदाहरणान्तरं खपुस्तके ।

इक्थंइक्थं । परमया । तंवोधियापरमया पुराजं । ईवयन्त । ऊमिर्नंनिम्नै द्रवयंतवक्काः । अवयन् । प्रांधंश्रोवं अवयन् । ररते । चनिष्ठंपित्वो ररतेविभागे ।

साह्वांसोवः सचासाहंसदन्यंसत्यंतातान । नानामश्रूयाः शुश्रूया रीषंतं गातूयतीव ॥४५॥

साह्वांसः । वः सवासाहम् । सदन्यं । सत्यंतातान । नानाम । श्रूयाः । शुश्रूयाः । रीषंतं । गातूयतीव । इत्येतानिखवंते । साह्वांसः । साह्वांसो दस्युमव्रयं । वः सचासाहमिति नतुपादस्याष्टिन इतिप्राप्ते । त्यमुवः सवासाहं । सादन्यं । सादन्यंविदथ्यं सभेयं । सत्यंतातान । सत्यंतातानसूयः । सत्यमितिकस्मात् । धायस्ततानरोदसी । नानाम । प्रतिनानाम रुद्रोपयंतं । श्रूयाः । श्रूयाअग्निश्चित्रभानुर्हवंमे । शुश्रूयाः । यच्छुश्रूया इमंहवं । रीषंतं । दूहेरीषंतं परिधेहिराजन् । गातूयंतीव । येस्मापुरागातूयंतीवदेवाः ।

वावर्तयेषांरीषतोदकारेसांत्यभिनृषाह्ममपुरुषघ्नः । सांतिगुह्यातन्वं रीरिषोष्ठजानुपूर्व्याभीवृतेवश्रथाय ॥ ४६ ॥

वावर्तयेषां । रीषतोदकारे । सांत्यभि । नृषाह्यं ।

अपूरुषघ्नः । सांतिगुहा । तन्वंरीरिषीष्ट । जानिपूर्व्यः । अभीष्टतेव । श्रथाय । इत्येतानि प्लवंते । वावर्त्तयेषां । वावर्त्तयेषांराया । येषामितिकस्मात् । कोअध्वरेमरुतआववर्त्त । रीषतोऽदक्कारे । पाहिरीषतउतवा । अदकारइतिकस्मात् । प्रतिअरिषतोदह । सांत्वभि । विश्वानिषांत्वभ्यस्तुमन्हा । अभीतिकस्मात् । संतिकामासोऽहरिवः । नृषाहमित्येकाचरञ्चर्षणिअभ्ववर्जमितिनिषेधप्राप्तौनृषाहं । नरंनृषाहंमहिष्ठं । अपूरुषघ्नः । अपूरुषघ्नोअप्रतीत । सांतिगुहा । आविःसांतिगुहापरः । गुहेतिकस्मात् । संतिकामासोऽहरिवः । तन्वंरीरिषीष्ट । अवयंरिपुस्तन्वं रीरिषीष्ट । तन्वमितिकस्मात् । स्वैःषवैरिरिषीष्टयुः । जानिपूर्व्यः । अग्निर्हिजानिपूर्व्यः । पूर्व्यइतिकस्मात् । देवस्य भर्गः सहसोयतोजनि । अभीष्टतेव । अभीष्टतेवता महापदेन । श्रथाय । विमच्छ्रथाय रश्नामिवागः ।

साहंत्साह्वा जह्लषंतप्रसाह्वं नक्तोषासा सूर्यमुषासमग्निं ।
परिरायः सूनृतेजारयंती शुश्रूयातं यूयुविः सादनाते ॥ ४७ ॥

साह्वन् । साह्वाः जह्लषंतप्रसाह्वं । नक्तोषासा । सूर्यमुषासमग्निं । परिरायः । सूनृतेजारयंती । शुश्रूयातं । यूयुविः । सादनाते । इत्येतानिप्लवंते । साह्वन् । जयंकृत्नुं रमित्वा

अपृक्तसुसाह्नम् । षाहा: । साहायेसंति सुष्टिहैवाजहुँषंतप्रसाहं । एकाक्षरंचर्षणीतिप्राप्ते । मत्सरासोजहुँषंतप्रसाहं । जहुँषंतप्रसाहमितिकस्मात् । वाजेषु प्रासहंयुजं । नक्तोषासा । नक्तोषासा सुपेशसा । सूर्य्यमुषासमग्निम् । जनयंतासूर्य्यमुषासमग्निं । सूर्य्यमितिकस्मात् । दधिक्राव्णः प्रथममश्विनोष समग्निं । अग्निमितिकस्मात् । येभिः सूर्य्यमुषसं मंदसाम:परिराय: । बृहस्पतेविपरिरापोषहुँयति । सूनृतेजारयंती । रेवत्स्तोत्रेसूनृतेजारयंती । सूनृतइतिकिं । जरयंतीवृजनंपद्वत् । शुश्रूयातम् । शुश्रूयातमिमं हवं । यूयुविः । द्विषोयुयोतु यूयुविः । सादनाते । अवाप्रम:सादनाते मिनोतु । तइतिकिं । देवावसदनासदे ।

कारन्तसुषाह्वा घृतवान्ति साह्वा
ऋजूयेव सूयवसा वृषाय । उषा-
सानक्ता पृथुजाघने चराथ्येभी-
रीरिषत ग्लापयंति ॥ ४८ ॥

करन्त्सुषाहा । घृतवांति । साह्वान् । ऋजूयेव । सूयवसात् । वृषाय । उषासानक्ता । पृथुजाघने । राथ्येभिः । रीरिषत । ग्लापयंति । एतेच प्रवंते । करन्त्सुषाहेति एकाक्षरस्वर्षणाधन्यवर्जमिति निषेधेप्राप्ते करन्त्सुषाहा । करन्त्सुषाहाविथुरंनशव: । करन्निति कस्मात् । सुषहासोमतानिते । घृतवांति । अवट्टोघानि घृतवांतिसीद । साह्वान् । साह्वान्विश्वा अभियुजः । ऋजूयेव । दिवंन-

द्रिष्टा मृजुरिवयता । सूयवसात् । सूयवसाद्भगवतीर्हि भूयाः । इषाय । विपर्जन्यं शंतनवेषाय । उषासानक्ता । उषासानक्ता बृहती सुपेशसा । पृथुजाघने । पृथुष्टो पृथुजाघने । चकारः समुच्चयार्थः । राध्येभिः । यथोर्ध्वस्थोरथ्या २ राध्येभिः । रीरिषत । मानो मध्या रीरिषतायुर्गंतोः । ग्लापयंति । उर्ध्वस्तस्थौ नेमवग्लापयंति ।

अध्वानयद्रीरिषत्प्रावणेभी रथीयंती चादमायः ससाहे । सासाह्ययुधिरिवाश्वथायः पूरुषघं रीरिषः पूरुषादः ॥ ४९ ॥

अध्वानयत् । रीरिषत् । प्रावणेभिः । रथीयंतीव । चदमायः । ससाहे । सासाह्य । युयुधिरिव । अश्वथायः । पूरुषघ्नं । रीरिषः । पूरुषादः । इत्येतानि प्रवर्तंते । अध्वानयत् । अध्वानयद्दुरितादभयञ्च । रीरिषत् । माचनामाचरीरिषत् । प्रावणेभिः । प्रावणेभिः सजोषसः । रथीयंतीव । रथीयंतीव प्रजिहीते ओषधिः । चदमायः । त्वं ह नु त्यददमायो दस्यून् । ससाहेति ससाहे अवयावधमित्यनेकवचिः तस्मात् निपात्यते आवयादिस्तुतेः प्रतिषेधार्थमंत्रत्व । द्वितीयस्य स्तुतिविधानार्थमिद । ससाहे । ससाहेमक्तः पृतनाषभिष्टिः । सासाह्य । सासाह्ययोयुधाभिः । युयुधि-

रिव । गावइवग्रामंयूयुधिरिवाश्वान् । अश्वायः । सतीनमन्युरश्वायोअद्रिं । पूरुषघ्नं । आरेतेगोघ्न मुतपूरुषघ्नं । रीरिषः । मानोगोषुमानोअश्वेषुरीरिषः । पूरुषादः । ततोवयः प्रपतान्पूरुषादः ।

अपूरुषं जाहृषाणेन रीषत ऋतायुभीरथीनां साह्यिषीमहि । पवीतारः क्रियात्येपूरुषत्वत ऋतावरीरिव हव्यानिगामय ॥५०॥

अपूरुषं । जाहृषाणेन । रीषते । ऋतायुभिः । रथीनां । साह्यिषामहि । पवीतारः । क्रियात्या । ईपुरुषत्वता । ऋतावरीरिव । हव्यानिगामय । इत्येतानिच प्लवंते । अपूरुषं । सिंधोः पारेअपूरुषं । जाहृषाणेन । योव्यंसंजाहृषाणेन । रीषते । मारीषतेसहसावन् । ऋतायुभिः । पवमानऋतायुभिः । रथीनां । रथीतमं रथीनां । साह्यिषीमहि । वीलुचित्साह्यिषीमहि । पवीतारः । पवीतारः पुनीतन । क्रियात्या । अहरहर्यात्यनुरपांक्रियात्या । एषआकारः प्रत्युदाहरणार्थः । यदन्यदस्तिक्रियतीतिह्रस्वान्तम् । अथनास्ति ततोविशेषणार्थः । क्रियतीयोषित्येतदपि आकारेअक्रियमाणेसांशयिकंस्यात् । ईकारादिहिपरतः प्रतीकग्रहणंचभवति । ईपूरुषत्वता । दीनैर्दक्षैः प्रभूती पूरुषत्वता । ईकारोपधग्रहणंकिमर्थं । नतस्यविद्म पुरुषत्वतावयं । ऋतावरीरिव । ऋतावरीरिव संक्रोशमानाः ।

हव्यानिगामय । तव हव्यानिगामय । हव्यामीतिवास्मात् । अधरंगमयातमः ।

वृषायस्वप्रसवीताससाह्विषे ता-
त्टपाणा तात्टपिं सादनस्पृशः ।
साह्यामेयांति पशुमान्ति जागृ-
धुः पवीतारं सूर्यमुषासमीमहे॥५१॥

वृषायस्व । प्रसवीता । ससाह्विषे । तात्टपाणा । तात्टपिं । सादनस्पृशः । साह्याम । इयान्ति । पशुमान्ति । जागृधुः । पवीतारं । सूर्यमुषासमीमहे । इत्येतानिचप्लवंते । वृषायस्व । वृषायस्वापूयावाहुभ्यां । प्रसवीता । उद्देतिप्रसवीता जनानां । ससाह्विषेइत्यस्याप्युभयथनिपातने प्रयोजनं पूर्ववद्द्रष्टव्यं । ससाह्विषे । प्रससाह्विषे पुरुहूत । तात्टपाणा । तात्देवेदंतात्टपाणाच । तात्टपिं । पिवावृषस्व तात्टपिं । सादनस्पृशः । मानोनिर्भाग्वसुनः सादनस्पृशः । साह्याम । साह्याम दासमार्यम् । इयांति । गतैयांतिसवनाहरिभ्यां । पशुमांति । परिसद्मेव पशुमांतिहोता । जागृधुः । निरामित्रोरिपवोन्नेषु जागृधुः । पवीतारं । अवंत्वस्य पवीतारमाशवः । सूर्यमुषासमीमहे । अनागास्त्वंसूर्यमुषासमीमहे । सूर्यमितिकिं । दधिक्रांवः प्रथममश्विनोषसं । ईमहइतिकस्मात् । येभिः- सूर्य्यमुषसं मंदसानः ।

इति श्री पार्षदव्याख्यायामानं-

दपुरवास्तव्यवज्रटसुतोव्वट कृते प्रातिशाख्यभाष्ये नवमंपटलम् ।

क्रमः ॥ १ ॥

क्रमइत्यधिकारोवेदितव्यः । यदितऊर्ध्वमनुक्रमिष्यामः ।

द्वाभ्या मभिक्रम्य प्रत्यादायोत्तरं तयोः । उत्तरेणोपसंदध्यात्तथार्द्धर्चंसमापयेत् ॥ २ ॥

द्वाभ्यांपदाभ्यामतिक्रम्यारभ्येत्यर्थः । तयोर्द्वयोरभिक्रांतयो रुत्तरंपदं प्रत्यादावसंगृहीत्वाताभ्यामुत्तरेण पदेनोपसंदध्यात् । एतेनक्रमेणार्द्धर्चं समापयेत् । पर्जन्यायप्र । प्रगायत । गायतदिवः । दिवस्पुत्राय । पुत्रायमीढुषे ।

एकवर्ण मनोकारं नतेसुस्मेतिनःपरे । पदेनचव्यवेतंय त्पदंतत्स्वव्यवायिच । ईं(१)लुप्तान्ताप्लुतादीनि स्कंभनेनेतिलुप्तवत् । इतोपिस्वतावत्तमः पूर्वैर्द्वेपदयो-

---

(१) प्लुतांतमितिमपुस्तकपाठः ।

द्वयोः । स्वसारमस्कृतेत्युभे परवीरासएतन । अतीत्यैता न्यवस्यंति ॥ ३ ॥

एकवर्णंपदमेकाक्षरमित्यर्थः । ओकारं वर्जयित्वा । आऊंइति । इत्येतेपदेअतीत्यावस्यंति । आमंद्रम् । मन्द्रमावरेण्यं । उद्वेति । उदुत्यं । ऊं इत्यूम् । त्यंजातवेदसम् । अनोकारमितिकस्मात् । अभूदो । ओते । त्वोइत्वो । नतेसुम्नेतिनःपरे । नतेअत्वभूते सुम्नइत्येतेनःपरेअतीत्यावस्यंति । मोषुणः । आसुष्माणः । नतेइतिकस्मात् । प्रसूनआयुर्जीवसे । इंद्रसूरीन् कृणुहि स्मानोअर्द्धं । नःपरेइतिकस्मात् । मोषुत्वावाघतश्चन । एवंशिक्षाव्याख्याय अच्युतानि ॥ पदेनचव्यवेतं यत्पदंतच्चव्यवायिच ॥ पदेनचव्यवेतंपदं यच्चव्यवैतितेउभेअतीत्यावस्यंति । ईयतेनराशशंसंदैव्यः ॥ ईं लुप्तान्ताम् । ईमित्येतत्पदंलुप्तांता अतीत्यावस्यंति । यमीगर्भं । लुप्तांतामितिकस्मात् । अमीरेभासः । प्लुतादीनि । प्लुतादीनिपदानिअतीत्यावस्यंति । योनिमारैगप । कुरुश्रवण माहृणाराजानं ॥ स्कंभनेनेति लुप्तवत् ॥ स्कंभनेनेत्येतत्पदंलुप्तवत् अतीत्यावस्यन्ति । वित्स्कंभनेन स्कभीयान् । लुप्तवदिति कस्मात् । अयंमहान्महतास्कम्भनेन ॥ इतोषिंचताक्तमः पूर्वेद्वेपदयोर्द्वयोः ॥ इतोषिंचत । आवर्तमः । इत्येतयोर्द्वेपदयोः- पूर्वं पदेअतीत्यावस्यंति । इतोषिंचत । परीतोषिंचत । आवर्तमः । उषाआवर्तमः ॥ स्वसारमस्कृतइत्युभे ॥ स्वसारं । अस्कृत । इत्युभे एतेपदे अतीत्यावस्यंति । निरु-

स्वसारमस्कृतोषसं । परंवीरासएतन । वीरासः । एतन । इत्येतस्यद्वैपदस्यपरम्पदमतीत्यावस्यंति । वीरासएतन । परंवीरासएतनमर्यासः । प्लुतादिप्रभृतीनिच तानिअतीत्य अवस्यंति । शुनश्चिच्छेपंनिदितं । नरावाशंसंपूषणं । किमर्थमिदमुच्यते । ननु पदेनअव्यवेतं यत्पदं तच्चव्यवायिचेत्येवसिद्धं । नसिध्यति कथं । क्रमोद्वाभ्यामभिक्रम्येतिप्राप्ताववसानानि हि एकवर्णमनोकारमित्येवमादीनि अवसानादपा[illegible]ंते । तस्मादत्र उभेव्यवायिव्यवेतपदे प्राप्तावसानेनचैवस्यात् । इयतेनराचशंसंदैव्यं इति अन्यवनस्यात् एवमर्थमिदमुच्यते । एवमेकेवर्णयंति । अपरेपुनः पदेनअव्यवेतं यत्पदमित्यत्रसर्वेषुसिद्धं इतिमन्यमाना अन्यथावर्णयंति प्लुतादिप्रभृतीनिचेति चकारंवाशब्दस्यार्थेवर्णयंति । प्लुतादिप्रभृतीनिवा अतीत्यावस्यंति । योनिमारैक् । चित्कंभनेन । वीरासएतन । परीतोषिञ्चत । प्लुतादिप्रभृतीति । प्रभृतिशब्दः प्रकारार्थोद्रष्टव्यः । प्लुतादिप्रकाराणीति किंकृतंभवति । वक्ष्यतिहेतौ अनवसानीयेषु केषुकेषुचित् । अभिक्रमंपूर्वंनिमित्तमानि नइति तदिहापिदर्शितं भवति ।

पूर्वोत्तरकृतंरूपम्प्रत्यादानावसानयोः । नब्रूयात् ॥ ४ ॥

पूर्वकृतंरूपं प्रत्यादानेनब्रूयात् । उत्तरकृतंरूप मवसानेनब्रूयात् । पूर्वकृतंरूपं । यच्छक्वरीषु । शक्वरीषुबृहता । मोषु । मोइतिमो । सुत्वा । प्रणः ।

नइन्द्रो । उत्तरकृतंरूपं । घनेववज्रिन् । घनेवेतिघनाऽइव । वज्रिञ्छ्नथिहि । अग्नेअच्छ । अच्छावद ।

सर्वमेवान्यद्यथासंहितमाचरेत् ॥५॥

पूर्वकृताद्रूपादुत्तरकृताच्च यदन्यत्तत्सर्वं यथासंहितं आचरेत् । यथासंहिता विधानेनविहितंतथैवाचरेदित्यर्थः । वाजेषुसासहिः । सासहिर्भव ।

अवगृह्याण्यतिक्रम्य संहितकरणानिच । धक्षिधुक्षिप्रवादौच विकृतादौप्लुतादिच । अन्तः पदंचयेषांस्या द्विकारोनन्यकारितः । एतानिपरिगृह्णीयात् ॥६॥

अवगृह्याणिद्विखण्डानि पूर्वोत्तरपदरूपाणि पदानि अतीत्य परिगृह्णीयात् । ऋषिभिरीड्यः । ऋषिभिरित्यृषिऽभिः । संहिते करणानि च । इतिकरणसंहितानिच पदानि अतिक्रम्य परिगृह्णीयात् । इन्द्राग्नी अपात् । इन्द्राग्नी इतीन्द्राग्नी । धक्षि धुक्षि इत्येतौच प्रवादौचविकृतादीसंतौ अतिक्रम्यपरिगृह्णीयात् । अनुदक्षि दक्षिदावने । धक्षीतिधक्षि । मंदिमंदुक्षन् । दुक्षऽवृधे । धुक्षन्निति धुक्षन् । विकृतादौइतिकिं । नीचात्तंधक्षि । धक्ष्यतसं । निधुक्षन् । धुक्षन्वचणाभ्यः । प्लुतादिच पदमतिक्रम्य परिगृह्णीयात् । आरैवपंथां । अरैगित्यरैक् । आयुवत्तातामश्विना । अयुवातामित्ययु-

स्याता । अंतर्मध्येयेषांपदानां विकारःअनन्यकारितः आत्मकारितइत्यर्थः । तानिचअतिक्रम्य परिगृह्णीयात् । सुषुमायातं । सुसुमेति सुसुम । वाहध । नाशुभः । वहुधानेतिवहुधाना । अनन्यकारितइतिकिं । अक्रएवं ।

बहुमध्यगतानिच ॥ ७ ॥

बहूनांपदानां मध्यगतानिचयानिपदानि तानिचअतिक्रम्य परिगृह्णीयात् । ईयते नराचशंसंदैव्यं । नराशंसमितिनराशंसं । चेतिच । शुनश्चिच्छेपंनिदितं । शुनःशेपमितिशुनःशेपं । चिदितिचित् । नरावाशंसं पूषणं । नराशंसमितिनराशंसं । वेतिवा । मोषुणः । मोइतिमो । स्वितिसु ।

अर्द्धर्चांत्यंच ॥ ८ ॥

अर्द्धर्चांतेवर्त्तमानंच अतीत्यपरिगृह्णीयात् । पुत्रायमीळ्हुषे । मीळ्हुषइतिमीळ्हुषे ।

नाकारं प्रागतोऽननुनासिकं ॥९॥

अनुनासिकरहितमाकारं अर्द्धर्चांत्यात्प्राक् नपरिगृह्णीयात् । आमन्द्रम । मंद्रमावरेण्यं । आवरेण्यम् । प्रागतइतिकिं । तनूष्वा । एत्या । अननुनासिकमितिकिं । गंभीरआँउग्रपुत्रे । एत्या ।

प्रत्यादायैवतं ब्रूयादुत्तरेण पुनः सह ॥ १० ॥

प्रत्यादायतममनुनासिकमाकारं पुनरुत्तरेणैव संब्रूयात् । मंद्रमावरेण्यं । आवरेण्यं ।

उपस्थितं सेतिकरणं ॥ ११ ॥

इतिकरणसहितंपदं तदुपस्थितसंज्ञंवेदितव्यं । वाहूइति । उपस्थितसंज्ञायाः प्रयोजनम् । व्ययवध्युपस्थितइति ।

केवलंतु पदंस्थितं ॥ १२ ॥

केवलंतुपदं इतिकरणरहितं स्थितसंज्ञंवेदितव्यं । अग्निं । स्थितसंज्ञायाःप्रयोजनम् । स्थितस्थितोपस्थितयोश्चदृश्यतेपदं यथावदिति ।

तत् स्थितोपस्थितं नाम यतोभेआह संहिते ॥ १३ ॥

तत्पदंनामस्थितोपस्थितं वेदितव्यं । कतरन्नुतत् । उभेस्थितोपस्थितेयत्राह संहितेवक्ता । विभावसोइतिविभाऽवसो । स्थितोपस्थितसंज्ञायाः प्रयोजनम् । स्थितस्थितोपस्थितयोश्च दृश्यतेपदं यथावदिति ।

अदृष्टवर्णौ प्रथमेचोदकः स्यात्प्रदर्शकः । एतदिष्टं ॥ १४ ॥

प्रथमेद्वेपदेपूर्वपदस्यांतिवर्णौ अदृष्टे तत्प्रदर्शकः । चोदकःस्यात् चोदकःपरिग्रहः इत्यनर्थांतरं । तन्नः । तदितितत् । नोमित्रः । तंनः । तमितितं । तांत्वा । नोद्यावापृथिवी । तामितिता । एतत्प्रदर्शनमिष्टं । कस्मादिति

नपठ्यते । दृष्टवचनादेवतस्यानित्यत्वंगम्यते ।

समासांस्तुपुनर्वचनइंगयेत् ॥१५॥

समासांस्त्ववगृह्याणि पदानितानिच पुनर्वचनेपरिग्रहस्यद्वितीयेवचनेइंगयेत् । पवमानकृह्णीयात् । पुरोजितीभः । पुरोजितीइतिपुरःऽजिती ।

इतिपूर्वेषुसंधानं पूर्वैःस्वःस्यादसंहितं । तदवग्रहवद्ब्रूयात् ॥१६॥

इतिपूर्वेषुपदेषु परिग्रहेक्रियमाणेय इतिपूर्वस्तेषु इतिनासंधानात् । पूर्वैराचार्यैःदृष्टं यस्मात्क्रमपिस्वरितोदयंपदमसंहितं स्यात् । आचार्यग्रहणं पूजार्थं । असंहितमितियथेतिकरणांतोनिघातं नप्राप्नुयात् । स्वरितप्रत्यये तदवग्रहवद्ब्रूयात् । अवग्रहवदिति यथामात्राकालान्तरंस्यात् । स्वरितिस्वः ।

संधिर्नार्धर्चयोर्भवेत् ॥ १७ ॥

अस्मिन्क्रमविधाने अर्धर्चयोः संधिर्नभवेत् । केन प्राप्तावयंप्रतिषेध आरभ्यते । दृष्टक्रमत्वात्समयात्संदध्यात्सर्वशः क्रमइतिप्राप्ते ।

दृष्टक्रमत्वात्समयात्संदध्यात्सर्वशःक्रमे । पदेनचपदाभ्यांच प्रागवस्येदितीत्यच ॥ १८ ॥

दृष्टक्रमत्वाद्धेतोः समयात्संदध्यात् सर्वशःक्रमेपदेनच । समयंप्राप्य पदेनावस्येत् । समयमतीत्यपदाभ्यामवस्येत् । प्रप्रवः । प्रप्रेतिप्रऽप्र । वसिष्ठसमिधं संदधीरायेंदवे । योनिष्टइंद्रसदने अकारि । अकारितमानृभिः पुरुहूत । दृष्टक्रमत्वादिति हेतुसामान्येसत्यपि । अनेवंयं प्रथमस्यामृतानामित्येवमादीनामनुदृष्टानां सर्वशःसंदध्यादिति यदेतत्तन्नोपपद्यते । कस्मात् । समयसंज्ञाया अभावात् ।

नकारस्योष्मवद्वृत्तं प्लुतोपाचरितेनतिः । प्रश्लेषश्चप्रगृह्यस्य प्रकृत्यास्युःपरिग्रहे ॥ १६ ॥

नकारस्ययदूष्मावद्वृत्तं प्लुतश्च उपाचरितश्च नतिश्च प्रश्लेषश्च प्रगृह्यस्ययः ॥ एतानिसर्वाणि प्रकृत्याभवंति परिग्रहेक्रियमाणे । नकारस्योष्मवद्वृत्तं यस्माँयस्माँइत् । यस्मानस्मानित्यस्मान्ऽयस्मान् । अभीशूँरिवसारथिः । अभीशूनिवेत्यभीशून्ऽइव । साह्वांश्चिकित्वान् । साह्वानितिसाऽह्वान् । विभ्राजमानाँश्चमसान् । विभ्राजमानानिति विऽभ्राजमानान् । आवदंस्त्वम् । आवदन्नित्याऽवदन् । स्वतवाँः पायुः । स्वतवानितिस्वऽतवान् । प्लुतः मक्षूमक्षूकृणुहि । मक्षुमक्ष्वितिमक्षुऽमक्षु । उपाचरितः ज्योतिष्कृदसि । ज्योतिःकृदितिज्योतिःऽकृत् । नतिःसुषुमायातं । सुसुमेति सुऽसुम । पितृयाणांद्युमत् । पितृयानमिति पितृऽयानं । प्रगृह्यस्यप्रश्लेषः । दम्पतीवक्रतुविदा । दंपतीइवेति दंपतीऽइव ।

अगृह्यस्येतिकिं । श्वघ्नीवयः । श्वघ्नीवेति श्वघ्नीऽइव ।

ओष्ठ्याच्चरा गमीऽपैति ॥ २० ॥

ओष्ठ्याचराणां संधीनां आममोयवन्तः सपर्येतिपरिग्रहे क्रियमाणे । पुरुश्चंद्रं यजतं । पुरुचंद्रमिति पुरुऽचंद्रं । वनर्षदो वायवः । वनसदइति वनऽसदः ।

न्यायंयांत्युत्तरेचयः । रिफितान्यूष्मणोघोषेदूभावःस्वधितीवच ॥ २१ ॥

न्यायंयांतिप्रकृतिंगच्छन्तीत्यर्थः । उत्तरे त्रयः संधयः परिग्रहेक्रियमाणे रिफितानिचऊष्मणोयान्यघोषे प्रत्यये दूभावः स्वधितीवेतिच पदं । अघोषेरिफितानि । स्वश्चक्षारथिनः । स्वश्चक्षाइतिस्वःऽचक्षाः । धूर्षदं वनर्षदं । धूःसदमितिधूः सदं । स्वर्पतिंयत् । स्वःपतिमिति स्वःऽपतिं । दूभावः । दूणाशंसख्यं । दुर्नशमिति दुःऽनशं । जनस्यदूढ्यः । दुर्ध्ये १ इतिदुःऽध्यः । दूळभोरथः । दुर्दभइति दुःऽदभः । स्वधितीवरीयते । स्वधितिरिवेतिस्वधितिःऽइव । अघोषइतिकिं । स्वर्जितंमहि । स्वर्जितमितिस्वःऽजितं । अपरे इदंसूत्रं योगविभागेन वर्णयंति । न्यायंयांत्युत्तरेचयः ॥ ओष्ठ्याचराणामुत्तरेत्रयःसंधयः प्रकृतिंयांति परिग्रहेक्रियमाणे । उत्तरेचयः । जुगुक्षतइति धक्षिधुक्षि प्रवादीच नजुगुक्षतः । जुघुक्षतइतिजुघुक्षतः । अनुदक्षि । दक्षिदावने । धक्षीतिधक्षि । दुक्षन्दधे । धुक्षन्निति धुक्षन् । योगविभागादृतेपरिग्रहे एतेषांप्रकृतिभावो नसिध्यति । यो-

गविभागे ह्यसति । उत्तरेत्वय इतिग्रहणमनर्थकंभवति । रिफितान्यूष्मणोघोषे दूभावः स्वधितीवचेति यथोक्तमेवेति ।

इति श्री पार्षदव्याख्याया मानंदपुरवास्तव्यवज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये क्रमपटलंदशमंसमाप्तम् ।

अथार्ष्यलोपेन यदाह सक्रमः समानकालं पदसंहितं द्वयोः ॥१॥

अथार्ष्याः संहितायाः अलोपेन द्वयोःपदसंहिते तेष्वपदे तयोश्चसंहिता समानकालं तुल्यकालं यदाह वक्तासक्रमोधिकृतोवेदितव्यः । अग्निमीले । ईलेपुरोहितम् । समानकालंपदसंहितन्द्वयोरितिविधेः स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः सक्रमइतिमाभूदिति ।

अथोबह्वनामविलोपकारणाच्चपरैरवस्यंत्यतिगम्यकानिचित् ॥२॥

अपिचेहबह्वनापदानां आर्ष्याअविलोपार्थं क्रमोभवतीतिवेदितव्यः । तत्रपरैःपदै रवस्यन्ति । अतिगम्यकानिचित्पदानि । तानिपदान्युत्तरत्रोदाहरिष्यामः ।

अपृक्तमेकाक्षर मद्वियोनि यत्त-
दानुनासिक्यभयादतीयते ॥३॥

अपृक्त मव्यंजनमेकाक्षरमद्वियोन्यसंध्यक्षरं यत्तत्पदमनुनासिक्यभयादतीयते । अष्टौवाद्यानवसाने प्रगृह्यानाचार्या आहुरनुनासिकान्स्वरानितितन्माभूदिति । मंहूमावरेण्यं । उहेति । अपृक्तमितिकिं । दुहितुराः । एकाक्षरगृहणं पदविशेषणं । अपृक्तमेकाक्षरं पदमवसानीयमिति । इतरथाह्यक्षरं विशिष्यते । अपृक्तमद्वियांनि यदक्षरं तदेतमनवसानीयमिति । अत्रकोदोषः । अमीध्वमध्रिगा उइति । अवसानेनस्यात् । अमीगाव इतितु वृत्तौ । अद्वियोनीतिकिं । अभूदो ।

नतंचपूर्वेण परस्यकारणं नतेः
परस्योभय हेतुसंग्रहात् ॥ ४ ॥

नतंचपूर्वेण पदेनपरस्य च नतिर्यत्कारणं तत्पदमनवसानीयंभवति । किंकारणं परस्यपदस्य उभयहेतुसंग्रहार्थम् । मोषुणाइत्यत्र स्ववह्वरेणेति नामिनिमित्तंषत्वं मोषुणाइत्यत्र नतेसुष्मइतिषत्वनिमित्तं णत्वं नाम्यभावेषत्वं नस्यात् । षत्वाभावेणत्वं च नस्यात् । सविलोपः अतउभयहेतुसंग्रहार्थं अतीयते । मोषुणः आसुष्माणः ।

परीत इत्युत्तरमेतयोर्द्वयोः प-
रंद्विपूर्वोनमतीत्यतीयते ॥ ५ ॥

परि इतः इत्येतयोर्द्वयोः पदयोः परम्पदं अनवसानीयंभवति । किंकारणं । अनवसानीयात्परं सिंचतेतिपदं व्यवस्थितमपिपूर्वंपरीतिपदं नमयतीति । परीतोषिंचत ।

ततोपरे संध्यमवेद्यकारणं तदर्थंजंह्विक्रममचक्रुर्वते ॥ ६ ॥

ततः तेभ्यः अपरआचार्याः अस्यामागमवस्थायां संधिजंकारणमवेच्य किंकारणं । इतोषिंचतेत्योत्वनिपातनं । तदर्थमेव षत्वार्थमेव ओत्वं मन्यमानाः ह्विक्रममचकुर्वते । परीतः । इतोषिंचत ।

तमः परं रेफनिमित्तसंशयात्तथावरित्येतदपोद्यतेपदम् ॥ ७ ॥

तमःपरं आवरित्येतत्पदं तथा यथा पूर्वोक्तमवसानादपोद्यते अपनीयते । किंकारणं रेफनिमित्त संशयात् । नहिविज्ञायते पूर्वस्यापदांतेन उत्तरस्यावापदादिना रेफोभवतीति । अतउभयहेतुमंग्रहार्थं मपनीयते । उषाआवस्तमः ।

अदोपितोसोचिदुषर्वसूयवो नधच्चिधुक्षीत्यपिचातियंतिकिम् ॥ ८ ॥

यदि आवरित्येतत्पदं रेफनिमित्तसंशयादनवसानीयं भवति । सांशयिकनिमित्तानि । अदोपितो । सो-

ष्वित् । उषर्वसूयवः । इतीमानिपदानि यथिषुधीत्येतौच प्रवादौ किंकारणं नातियंति इमान्यपिहि तेन तुल्यानि । सत्यं । क्रमशास्त्रे अनवसानीये अननुगृहीतानिइमानि तस्मान्नातियंति । तदनुगृहीतानामिव हेतुरुच्यते ।

स्वसारमित्येतदपोह्यतेपदं परः
सकारोपज(१)नोऽकृतेतिच । नि-
रस्कृतेतिह्युपसर्गकारित स्तद-
न्वयादाचरितंतुपंचभिः ॥ ९ ॥

स्वसारमित्येतत्पदं अवसानादपोह्यते । अकृतेतिच परंपद मपोह्यते । किंकारणं । परःसकारोह्युपजनः । सकारागमइत्यर्थः । निरस्कृतेत्युपसर्गकारितः तदन्वयात् उपसर्गान्वयात् पंचभिरेवपदैराचरितं क्रमंविद्यात् आचार्यैः । निरुस्वसारमस्कृतोषसं ।

सहेतिचेमेतिचरक्तसंहितं गु-
णागमादेतनभाविचेतन । पदं-
चचास्कंभचिदित्यतः परं प्लु-
तादिचैतानिनिमित्तसंश्रयात् ॥१०॥

सहेतिचेम् इतिकारणायुक्तं ईमित्येतत्पदं लुप्तमकारमनवसानीयं भवति । किंकारणं निमित्तसं-

---

(१) नोस्कृतेतिचेति बहुपुस्तकपाठः ।

शयात् । नष्किविद्मावते पूर्वेणावापदान्तेन उत्तरेणावापदादिनामकारस्यलोपोभवतीत्यतउभयहेतु संग्रहार्थमतीयते । यमौगर्भं । एतिचरत्न संहितं चाहुस्त्येतत्पदं रत्नसंहितं यत्तत् अनवसानीयं भवति । किं कारणमिति आकारस्यरागोभवतीति । अतउभयगतहेतु संग्रहार्थं । अग्नआम-घोद्वणाना विलनोति । गुणागमादेतन भाविचेतन । गुणागमादेकारागमादेतनभूतं इतन इत्येतत्पदं अनवसानीयंभवति । किंकारणमिति गुणागमोभवतीति अतउभयगत संशयः । वीरास एतनमर्यासः । अहञ्च चास्कंभचिदित्यतः परं । चास्कंभचिदित्यस्माद्द्वैपदात्परं स्कंभनेनेतिचपदं अनवसानीयं । किंकारणं तेननिमित्तेन सकारस्यलोपोभवतीत्युभयगतः संशयः । चित्स्कंभनेनस्कभीयान् । प्लुतादिच । प्लुतादिचपदं योनिमारैगित्येवमादि अनवसानीयंभवति । प्लुतादिप्रभृतीनिचेत्यत्र मतंयोनिमारैगप । अत्राकारागमः पूर्ववत्संशयितः ॥

द्वाभिक्रमंपूर्वनिमित्तमानिन
स्त्रिषूत्तमेष्वाहुरनंतरंहितत् ॥११॥

द्वाभ्यांपदाभ्या मभिक्रम्यगच्छंति उत्तमेषु त्रिषुनिमित्तसंशयेषु अनवसानीयात्पूर्वंपदंनिमित्तंमन्यंते । किंकारणं । अनंतरंहि तत्पूर्वपदं गुणागमःसकारलोपश्च दीर्घत्वंच क्रमाणांभवतीति । वीरासएतन । चित्स्कंभनेन । योनिमारैक् ।

अनन्तरंत्वेवचतुर्थषष्ठयोः परंकथंतच्चनद्व्यभिक्रमं ॥ १२ ॥

अनन्तरन्तु पुनश्चतुर्थषष्ठयो रनवसानीययोः । उषाषावर्क्तमः । यमीगर्भमित्येतयोः परं पदं निमित्तंभवितुमर्हति । पूर्वनिमित्तमानिनां हेतुसामान्यात् । कथं तत्वचते पूर्वनिमित्तमानिनः द्व्यभिक्रमंनकुर्वंत्येवंस्थितेपि यदिचतुर्थषष्ठयो र्द्व्यभिक्रमं नकुर्वंति विषूत्तमेष्वपि नकर्त्तव्यं । अथउत्तमेषु कुर्वन्ति चतुर्थषष्ठयोः कर्त्तव्यं उभयत्रापिहिविकारहेतुरानंतर्यमेव ।

अनानुपूर्व्ये पदसंध्यदर्शना त्पदव्यवेतं च पदव्यवायिच ॥ १३ ॥

अनानुपूर्व्ये संहिते क्रमेक्रियमाणे पदेनयद्व्यवेतं यच्चव्यवैतिते उभे अनवसानीये भवतः किंकारणं पदसंध्यदर्शनात् । शुनःशेपं चिदित्येतयोः पदयो रन्योन्येनसह संधिरदृष्टो भवति । शुनश्चिच्छेपंनिदितं ।

ततोपरे द्विक्रममाहुराश्रया त्कृताविलुप्तावहि वर्णसंहिता ॥ १४ ॥

ततोपरे आचार्याः अस्यामवस्थायां द्विक्रममिच्छन्ति । किंकारणं आश्रयाल्लक्षणात् कृताहि अवयवविलोपेनवर्णानां वर्णैः सहसंहिताभवतीति । शुनश्चित्यत्रविसर्जनीयः चितिप्रत्ययेअघोषेरेफ्यरेफीचोष्मणां स्पर्श-

उत्तरइतिशकारमापन्नः । चिदित्यत्र तकारः शेषप्रत्यये तालव्येघोषउदये चकारमापन्नः । सर्वैः प्रथमैरुपधीयमानः षकारः शाकल्यपितुः छकारमितिछकारमापन्नः । शुनश्चिच्छेपमित्यत्रमकारः पदान्तेवर्तमानः नकारेप्रत्यये । विस्थानेस्पर्शउदयेमकारः सर्वेषामेवोदयस्योत्तमःस्वमिति नकारमापन्नः । शुनश्चिच्छेपन्निदितं ।

पदानुपूर्व्येणासपूर्वआसत स्ततोव्यवेतंचसहव्यवायिच ॥ १५ ॥

पदानामानुपूर्व्येण सपूर्वेविद्यमानपूर्वे अनानुपूर्व्येसंहिते अर्द्धर्चस्यपूर्वेद्वेपदशः क्रमोवक्तव्यः आसत अत्रानुपूर्वसंहितायां । हाजना । अनायातयन् यातयन्नन्तः । अंतरीयते । किमर्थमिदमुच्यते । ननुक्रमोद्वाभ्यामभिक्रम्येत्येवसिद्धं । नसिध्यति । ईयते इत्येतस्य नराइत्येतेनपदैकदेशेनसह संधिर्दृष्टः । नराशंसमित्येतेनपदेन सह संधिरदृष्टः । तदापदसंध्यदर्शनात् ईयतेइत्येतस्य पदस्य अनवसानीयता प्राप्नोति सामाभूदित्युच्यते । ततोव्यवेतञ्चपदं यच्चव्यवैति तदुभे सहवक्तव्ये । केनसहवक्तव्यमित्येताभ्यांसह । ईयते नराचशंसंदैव्यम् एवमेके । अपरेपुनरन्यथा ईयतइत्येतस्य अनवसानीयता नैवप्राप्नोति । कथं पदैकदेशेनवा कृत्स्नेनवा तदसन्धिर्दृष्टोभवति । किमर्थंतर्हि इदमुच्यते । ततोव्यवेतंचसहव्यवायिचेत्येवमाद्यपूर्वविधिः अथानुक्तः पुनरुच्यते ।

ततोनिराहेतरयोश्चतेपदे ततोव्यवेतेनपरस्यसंहिता ॥ १६ ॥

ततः अस्यामवस्थायां निराहवता परिग्रहे ययोर्भवतीत्यर्थः । तेपदेकृतसंहिते व्यवेतंचयच्चव्यवेति नराशंतमितिनराशंसं । चेतिच । इतरयोश्चकतरयोः अविद्यमानपूर्वयोः तेपदेनिराह । शुनश्चिच्छेपंनिदितं । शुनःशेपमितिशुनःशेपम् चिदितिचित् । नराशंसंपूषणं । नाराशंसमिति नराशंसं । वेतिवा । ततः अव्यवेतेनपदेन परस्यसंहिताकर्तव्या । दैव्यन्नु निदितंसहत्वात् पूषणमगोह्यम् । असंदिग्धार्थमिदमाचार्येण विस्तरेणोक्तं ।

अनंतरेत्रिक्रमकारणेयदि त्रिभिस्त्वगार्ग्यःपुनरेवचत्रिभिः ॥ १७ ॥

अनंतरेऽव्यवहिते त्रिक्रमयोः कारणेनिमित्तेयदिभवतः । तदाप्रथमतः त्रिभिः पदैः क्रमंब्रूयात् । पुनः त्रयाणांमध्यमंपदं प्रत्यादाय पुनरेवच त्रिभिः किंकारणमेवमपिनिमित्तिनामविलोपो भवतीतिगार्ग्यो मन्यते । उदूषु । ऊषुणः ।

त्रिसङ्क्रमेपञ्चभि राष्यंनुग्रहः ॥१८॥

अस्मिन्निमित्तनैमित्तिनां वर्णानांनामिषत्वणत्वानां सङ्क्रमेपञ्चक्रमेण आर्ष्योअविलोपोभवतीति मन्यन्ते एकेआचार्याः । किंकारणमुक्तंहि उदूषुणइत्यत्र नामि-

निमित्तंषत्वं षत्वनिमित्तंणत्वं । नाम्यभावेषत्वं नस्यात्। षत्वाभावेणत्वं नस्यात्। सविलोपद्रुतिन इत्येतस्यानवसानीयत्वं कस्मात्। नकारस्योत्तरपदेन प्रत्यादाने णोवसोइतिसह संधिरदृष्टोभवतीति। उदूषणोवसो।

चतुःक्रमस्त्वाचरितोचशाकलैः॥१९॥

एवं पक्षान्तरगमनेष्वस्मिंस्त्रिसंगमे शाकलाश्चतुःक्रम माचरन्ति। तुशब्दःपक्षान्तरमित्यर्थः। उदूषुणः।

अलोपभावादपरेबहुक्रमं प्रतिस्वमार्षीतिनकुर्वतेक्वचित् ॥२०॥

अलोपभावा दार्ष्याअलोपस्या भावात् अपरेआचार्योवहुक्रमंक्वचिदपि नकुर्वते। यदिवहुक्रमो नक्रियते निमित्तनैमित्तिकयोगे कथमार्ष्या अलोपोभवति। पदांतस्यपदादिना सन्धौक्रियमाणे लोपागमविकाराः प्रतिस्वम्भवति। द्वयोर्द्वयोः पदयोरार्ष्याअलोपोभवति। प्रतिस्वमार्षीभवतीति। मोषु। सुनः।

असर्वशस्त्रिप्रभृतिष्वनेकशः स्मरन्तिसंख्यानियमेन शाकलं॥२१॥

प्रतिस्वमार्षीतियदुक्तं तदसर्वशः नसर्वत्रयुज्यत इत्यर्थः। कथंयच्चपदांतपदाद्यो रन्योन्यंप्रतिनिमित्तत्वं तत्रयुक्तं। तन्नः। नोमिवः इत्यादौ। यच्चतुपदाभ्यां पूर्वंपदं विकारस्यनिमित्तंभवति तत्रनयुक्तं त्रिप्रभृतिषुपदेषु। मोषुणइत्यत्रनामि निमित्तं षत्वं स्यात्। यथा-

पदं संधिमपेतहेतुषु इतिवक्ष्यमाणत्वात् सविलोपदृष्ट्युक्तं । तस्मादनेकशः वह्वःस्मरंति । इत्थंत्वाचार्याः । संख्यानियमेन त्रिःक्रमचतुःक्रमंपञ्चक्रमा इति । एतेन संख्यानियमेन शाकलविधानं । मोषुणः । उदूषुणः । निरुस्वसार मस्कृतोषसं ।

अयावनेपूर्वंविधानमाचरेत् ॥ २२ ॥

अयावने चभिश्रणे । किमुक्तंभवति । यथाक्रमम‌प्राप्ताभ्यां पदाभ्यां पूर्वंपदंनिमित्तंनभवति तत्रेत्युक्तंभवति । पूर्वंविधानमाचरेदितिद्वाभ्यांक्रममाचरेदित्यर्थः । अग्निमीळे । ईळेपुरोहितं यत्रयत्र यावनं तत्रतत्र बहुक्रममाचरेत् । मोषुणाइति ।

यथापदं संधिमपेतहेतुषु ॥ २३ ॥

यथापदंसंधिंकुर्यात् । अपेतहेतुषु । प्रणः । न इन्द्रो । प्रशब्दोणत्वहेतु स्तस्यापाये उत्तरेणसहप्रत्यादाने क्रियमाणेनत्व विलोपसंशयनिवृत्त्यर्थं ग्रहणं नइंद्रो ।

अथोपदाभ्यां समयंपदेनच क्रमेष्ववस्येदतिगम्यसंदधत् ॥२४॥

अथोपदाभ्यां समयमतिक्रम्यावस्येत् । संदधत्तथासमयंपदेन । किंपुनः कारणं । समयातिक्रमणे दृष्टक्रमत्वादित्युक्तं क्रमशास्त्रेएव । किमर्थंपुनर्द्वाभ्यामतिक्रम्यावसानं । अदृष्टक्रमत्वादितिवक्तव्यं । एकेनकस्मा-

दसंदधद्वक्ष्यति । संध्यर्थमितिवक्तव्यं । त्वांह । इत्यदिन्द्राणंसातौ हवामहे । क्रमेष्वितिगृहणा त्वादव्यवस्थायां समयोत्तरपदद्वयांते वसानंनस्यात् । त्वांहत्यदिन्द्राणंसातावित्यादिषु । यच्चिद्धिसत्यसोमपा इत्यादिषु समयोत्तरपदद्वयांते वसानंस्यादेव । पादलक्षणावशात् ।

सहेतिकाराणि समासमंतभा
ग्बहुक्रमेमध्यगतानि यानिच ।
तृतीयतांगच्छतियस्यसोष्मवा-
ननन्ययोगंविकृतंप्लुतादिषु । अ-
तीत्यतेषांपदतांप्रदर्शयेत् ॥२५॥

सहेतिकाराणि इति करणयुक्तानि । समासं अवगृह्याणि । अंतभाक् अर्धर्चान्तंयत्पदं भजते । बहुक्रमेमध्यगतानि यानिचत्रिक्रमप्रभृतिषु बहुक्रमेषुयानिमध्यगतानि पदानि यानि च । तृतीयतांगच्छतियस्य सोष्मवान् । जुगुक्षतोदुदुक्षन्नित्येवमादितेषु सोष्माधकारश्चतुर्थः । सचवर्गंतृतीयतांदकारमापद्यते । तत् । अनन्ययोगंविकृतं अनन्यकृतो यस्यविकारआत्मकारित इत्यर्थः । प्लुतादीनिचपदानियोनिमारैगित्येवमादीनि । तेषांपदानांउत्तरेण सह प्रत्यादानंकृत्वा यापदेप्रकृतिर्दृष्टातं दर्शयेत् । केनपरिगृहीता किंकारणं । स्वइतिस्वः । स्वितिषु । सुइत्यत्र युष्मान्तस्थादंतमूलीयपूर्वैरिति परिगृ-

इत्यद्वितीयेषत्वप्रसंगः समाभूदिति । समासइति । दुर्हनोइतिदुः ऽहनो । इत्यत्र ऋकाररेफषकारानकारमिति परिग्रहस्यपूर्ववचने णत्वप्रसंगः समाभूदिति । अंतभाक् । मह्यान्हिषः । सइतिसः । इत्यत्रयुग्मान्तस्येति पूर्ववत् । बहुक्रमेमध्यगतानियानि । मोषुणः इत्यत्रपूर्ववत् तृतीयतांगच्छति यस्य सोषवान् । सुषुवतइति सुषुवतइत्यत्र परिग्रहस्यसंहितावत्पूर्ववचनं पदवदुत्तरमिति परिग्रहस्यपूर्ववचने तृतीयत्वप्रसंगः समाभूदिति । अनन्ययोगंविकृतं । सुसुमेतिमसुम । इत्यत्रपरिग्रहस्य संहितावत्पूर्ववचनेषत्वप्रसङ्गः समाभूदिति । स्रुतादि । योनिमारैगित्येवमादिषु । अरैगित्यरैगित्यत्रपूर्ववचनेदीर्घत्वप्रसंगः समाभूदिति । अस्यैवापरायोजना । अतोन्यतेषांपदतां प्रदर्शयेदिति । सहेतिकाराद्यौत्येवमादीन्यतिक्रम्य परिग्रहेण तेषांपदानांपदतां प्रदर्शयेत् । किंकारणं । नहिपरिग्रहादृते तेषांपदतादृश्यते । सहेतिकारेषु तावदुस्थितांतत्प्रदर्शनार्थंच । इन्द्राग्नीतपंति । इंद्राग्नीइतीन्द्राग्नी । प्रगृह्यप्रदर्शनार्थंच । प्रातःसोमं । प्रातरितिप्रातः । रेफप्रदर्शनार्थंच । समासेष्ववग्रहप्रदर्शनार्थं च । पुरोहितं यज्ञस्य । पुरोहितमितिपुरः ऽहितं । अंतभाक्त्वबह्वृचांतख्यापनार्थं । अर्णाचिद्रथावधीः । अवधीरित्यवधीः । पदादिप्रदर्शनार्थं च । बहुक्रमेषुमध्यगतेषु पदवद्भाग प्रदर्शनार्थं । निरस्वसार मस्कृतोषसं । ऊँ इत्यूँ । स्वसारमितिस्वसारं । अकृतेत्यकृत । तृतीयतांगच्छति यस्यसोषवानिति पृथग्ग्रहणमनर्थकं । अनन्ययोगं विकृतमित्येवमेवसिद्धत्वात् । नानर्थ

र्थं । परिग्रहस्य उभयोरपि वचनयोः पदत्वप्रदर्शनार्थं । दधुषःकृष्णांहसः । धधुषइतिधधृषः । किमुच्यतेउभयोरपिवचनयोः पदत्वप्रदर्शनार्थं पृथग्ग्रहणमिति । अन्येष्वप्यनन्ययोगंविकृतेषु उभयोरपिवचनयोः पदत्वंप्रदृश्यते । सत्यं । नकारलोपोऽस्वरभावमानयेदित्येवमादि वचनात् यत्रयत्रवचनं नास्ति तत्रतत्रपरिग्रहस्य पूर्ववचने विकारोभवत्येव । यथारजेषितमितिरजः ऽइषितं । अनन्ययोगविकृतेषुषकारःपदत्वप्रदर्शनार्थमेव । सुषुमायातं । सुसुमेतिसुसुम । प्लुतादिषु पदत्वप्रदर्शनार्थमेव । आरैक्पंथां । अरैगित्यरैक् ।

कृतेतुगार्ग्यस्य पुनस्त्वभिक्रमे॥२६॥

गार्ग्यस्याचार्यस्य पक्षे विभिन्नगार्ग्यःपुनरेवच विभिरिति पुनःस्त्वभिक्रमेकृते एवंपदतां प्रदर्शयेत् । उदूषु । ऊषुणः । ऊंइत्यूं । स्वितिसु ।

अदृष्टवर्णेप्रथमेप्रदर्शनं स्मरंतितत्त्ववत्तनिराहचोदकः ॥ २७ ॥

प्रथमेद्वेपदे पूर्वपदस्यांत्यवर्णे अदृष्टेतस्यप्रदर्शनमाचार्याः स्मरंतिइच्छंति । तत्तुप्रदर्शनं निराहेतिप्रवदतिचोदकःपरिग्रहः । किंकारणम् । पदांतसंशयनिवृत्यर्थं । तान्त्वामित्यत्र अर्धर्चायेद्वेपदे नज्ञायते नकारांतंवा पदंमकारांतंवा तस्मात्परिगृह्णन्ति । तान्त्वम् । तामितितां ।

पदंयदाकेवलमाह सास्थितिः ॥२८॥

पदंकेवलमनितिकरणं यदाऽऽहवक्ता सास्थितिरिति वेदितव्या । संज्ञाकरणं स्थित्यभिक्रमार्थं । तान्नः । तामितिताम् ।

यदेतिकारांत मुपस्थितंतदा ॥२९॥

इतिकरणांतं यत्पदंमाहवक्ता तत्पदमुपस्थितसंज्ञं वेदितव्यं । संज्ञाकरणं उपस्थितेनाभिक्रमार्थं । इंद्राग्नीइति । तामिति ।

अथोविपर्यस्यसमस्यचाहते यदास्थितोपस्थितमाचरंत्युत ॥३०॥

अथोतेपदे स्थित्युपस्थिते विपर्यस्थितेविपर्यस्योपस्थितं तत्पूर्वंकृत्वास्थितंपश्चात् समस्यच यदाऽऽहवक्ता तत्पदंस्थितोपस्थित संज्ञं वेदितव्यम् । संज्ञाकरणं स्थितोपस्थितेनाभिक्रमार्थं । विभावसोइतिविभाऽवसो । तान्नः । तामितितां । आचरंत्युत । एवंस्थित्युपस्थितस्थितोपस्थितानां अन्यतमेन पदप्रदर्शनमाचरंति ।

पुनर्ब्रुवं स्तचसमासमिंगयेत् ॥३१॥

तत्रस्थितोपस्थिते क्रियमाणे पुनर्ब्रुवन्वक्ता समासमवगृह्णीयात् । पुरोहितमितिपुरःऽहितं । अतोत्वतेषांपदता प्रदर्शयेत् इत्येवंसिद्धे इदंवचनंपरिग्रहस्य पूर्ववचने अवग्रहप्रतिषेधार्थम् ।

स्वरित्यतोन्येषु तु संधिमाचरेत् ।
अवग्रहस्येव हि कालधारणा परिग्रहेस्तीत्युपधेत्यनुस्मृता ॥३२॥

तस्मिन्नेव च स्थितोपस्थिते स्वरित्येतत्पदं वर्जयित्वान्येषु पदेषु इतिकरणात्पदेषु सत्सु इतिना तेषां यथोक्तं संधिं कुर्यात् । औवं भृगुवदित्यौवं भृगुऽवत् । इंद्राग्नी इतीन्द्राग्नी । स्वरित्यतोन्येष्विति किमात् । स्वरित्येतस्य हि पदस्य अवग्रहस्येव हि मात्राकालः । कालधारणा परिग्रहे इत्युपधास्तीति पूर्वाशाकलैः अनुस्मृता । आचार्यग्रहणं पूजार्थं । स्व रिति स्वः । क्रमशास्त्र एव हेतुरुक्तः । इति पूर्वेषु संधानं पूर्वैरिति

अभिक्रमेतोभयतोनुसंहितं ततोस्य पश्चात्पदतां प्रदर्शयेत् ।
यथापदं वान्यतरेण संदधत्त्रिषूत्तमेष्वेतदलोपसंभवात् ॥ ३३ ॥

अलोपसंभवदर्शनात् अथवा अभिक्रमं कुर्यादुभयतः पूर्वेण च परेण च अनुसंहितं ततः पश्चादस्य पदस्य पदतां प्रदर्शयेत् । क्वचित् त्रिषूत्तमेषु निमित्तसंश्रयेषु निमित्तहेतोः एवमप्यलोपः संभवति । वीरासपतन । एतनमर्यासः । इतनेतीतन । चित्कंभनेन । स्कंभनेनस्कभीयान् । स्कं-

भनेनेतिस्कंभनेन। योनिमारैक्। आरैगप। अरैगिश्वरैक्। यथापदंवान्यतरेण पदेन पूर्वेणापरेणच सहसंदधत् क्रमंब्रूयात्। वीरासएतन। एतनमर्यासः। इतनेतीतन। चित्स्कंभनेन। स्कंभनेनस्कभीयान्। स्कंभनेनेतिस्कंभनेन। योनिमारैक्। आरैगप। एवमप्यलोपः संभवति। द्वाविमौपक्षौ। उभयतोनुसंहितमितिच। यथापदं वान्यतरेणेतिच। पदयोः कोभिप्रायः। अन्नायमानेविकारनिमित्ते अन्यतरयोगेविकारोभवतीति पूर्वस्याभिप्रायः। अन्यतरवचनादन्यतरनिमित्तं भवितुमर्हतीति परस्य एवमेकेवर्णयंति। अपरे पुनः निवृत्तत्वात् निमित्तसंशयाधिकारस्यविवृत्तमेष्वितिप्रकृतानामेवसहेतिकाराणीत्यतेषांविवृत्तमेषुतृतीयतांगच्छतियस्यसोष्मवानित्येवमादिषुवर्णयंति। पत्मन्दक्षुषः। दक्षुषः कृष्णजंहसः। धक्षुषइतिधक्षुषः। वरुणोमामहंतां। मामहंतामदितिः। ममहंतामिति ममहंतां। योनिमारैक्। आरैगप। अरैगिश्वरैक्। पक्षयोः पूर्वोत्तरयोः अतीत्यतेषां पदतांप्रदर्शयेत्। इत्येवंसिद्धत्वादिदमुपग्रहणमनर्थकं। नानर्थकं। यथापदंवा अन्यतरेणसंदधदित्यपूर्वार्थविधिः। सउक्तोप्यर्थः पुनः कीर्त्यते। पत्मन्दक्षुषः। धक्षुषः कृष्णजंहसः। वरुणोमामहन्ताम्। मामहंतामदितिः। योनिमारैक्। आरैगप। यदवशिष्टं तत्पूर्ववत् द्रष्टव्यम्।

अरक्तसंध्येत्यपवाद्यतेपदं पुन-
स्तदुक्त्वाध्यवसायपूर्ववत्॥ ३४॥

अरक्तसंधिमाहृत्येतत्पदमपवाद्यते । कस्मात् । परिग्रहात् । कस्यहेतोः । बहुक्रमेमध्यगतानि यानिचेतिपरिग्रहोस्यमाभूदिति । कथंतर्हिवक्तव्यं । पुनस्तत्पदं उक्त्वा । कतरत् । आहृत्येतत्पूर्ववत्परेण पदेनाध्यवसानंकृत्वा क्रमेण । मंद्रमावरेण्यं । अरक्तसंधीतिकस्मात् । अभ्यर्षाँपपः ।

तथायदृच्छोपनतेबहुक्रमे क्रमेतदस्यैकपदानिनिःसृजेत् ॥ ३५ ॥

तथाकथं । यथाआकारस्यपदप्रदर्शनार्थं प्रत्यादानमुक्तं । पूर्ववदध्यवसानं । यदृच्छोपनतेबहुक्रमे तस्य बहुक्रमस्यैकैकं पदं निःसृजेत् । अपनयन्खलु क्रमेत । कस्यहेतो यथासर्वेपदांताः स्वरास्वसार्थंदृष्टाः स्युरिति । आत्वेतानि । त्वेत । एत । इतानि । निमित्तनैमित्तिकप्रसङ्गेन योबहुक्रमः क्रमशास्त्रेषु नाम्नातः सयदृच्छोपनतः । यथाआत्वेतानि इत्यवतुइति द्वाभ्यामवसानेक्रियमाणे नकारस्यहित्वाभावात्तदनवसानीयं भवति । अनुनासिकभयात्तुतृतीयं । दीर्घभावार्थंचतुर्थम् ।

नकारलोपोष्मरभावमानयेदपेतरागांप्रकृतिंपरिग्रहे ॥ ३६ ॥

नकारस्यखलुलोपभावंचऊष्मभावंच । अपेतरागांरागवर्जितां प्रकृतिमानयेत् । परिग्रहेक्रियमाणे । कस्यहेतोः । पदप्रदर्शनार्थं । दृष्टाहिलोपोष्मरभावः । हेप-

द्राभिक्रमणेभवंति । तस्मात्तांप्रकृतिमानयेत् । लोपभावः । अश्वाँअश्वाँइत् । अश्वानश्वानित्यश्वान् ऽअश्वान् । ऊष्मभावः । स्वतवाँः पायुः । स्वतवानिति स्वऽतवान् । नैतदुदाहरणं युक्तं । कथं । स्वतवाँःपायुरिति पायुशब्देपि नकारस्य विसर्जनीयसंबन्धः । इदं तर्हिउदाहरणं । नॄँःपात्रमिति नृऽपात्रम् । विभ्राजमानांश्चमसान् । विभ्राजमानानितिविऽभ्राजमानान् । अभीशूँरिवसारथिः । अभीशूनिवेत्य अभीशून्ऽइव । अतीत्यैषापदतां प्रदर्शयेदित्येवं सिद्धेकिमर्थं नकारलोपादीनां सहितानां परिग्रहे पुनर्निवृत्तिरुच्यते । परिग्रहस्योभयो र्वचनयो र्विकारनिवृत्त्यर्थं । तेनहिं उत्तरस्मिन्नेवस्यात् । नैषदोषः । तनाप्युभयोर्भवतीति ज्ञापकं ब्रूमः । यदयं पुनर्ब्रुवंस्तत्समासमिंगयेदिति पूर्वस्मिन्वचने अवग्रहप्रतिषेधार्थं कुर्वंतत् ज्ञापयति । अन्यत्रोभयोरपिवचनयोः पदतयाप्रदर्शनंभवतीति । एवंचेत् अतीत्यतेषां पदतांप्रदर्शयेत् इत्येवंसिद्धे नकारस्यलोपोस्वरभावमानयेदित्येवमादीनां नियमार्थमनुक्रमणं । अनुक्रांतानांविकारणानां परिग्रहस्यपूर्ववचनेनिवृत्ति र्न भवति । यथा । धनर्चमितिधनऽऋचंम् । ककुद्मानिति ककुत् ऽमान् । अहोभिरित्यहः ऽभिः । दस्मोर्मिमिति दस्मऽऊर्मिम् ।

नतिम् ॥ ३७ ॥

नतिंच प्रकृतिमानयेत् परिग्रहेक्रियमाणे । कस्यहेतोः । पदप्रदर्शनार्थं । सुषुमायातम् । सुसुमेति

सुसुम । दुर्हणौ । दुर्हणोइतिदुःऽहनौ ।

प्लुतोपाचरितेच ॥ ३८ ॥

प्लुतंचउपाचरितंचाप्लुतोपाचरितेएते प्रकृतिमानयेत् परिग्रहेक्रियमाणे । कस्यहेतोः । समानहेतुःपूर्वेणप्लुतः । मह्यूमह्यूकृणुहि । मह्युमह्वितिमह्युऽमह्यु । उपाचरितः । ज्योतिष्कृदसि । ज्योतिःकृदितिज्योतिःऽकृत् ।

यत्रचप्रगृह्यमेकीभवतिस्वरोदयम् ॥ ३९ ॥

यत्रयस्मिन्समुदायेस्वरोदयं प्रगृह्यंपदमेकीभावंगच्छति । यथा । स्यचरांतास्तुनेवेइतिप्रकृतिभावेप्रतिषिद्धेतत्प्रकृतिमानयेत् परिग्रहेक्रियमाणे कस्यहेतोःप्रगृह्यप्रकृतिभावप्रदर्शनार्थं । दंपतीवक्रतुविदा । दंपतीइवेतिदंपतीऽइव ।

प्रवादिनोदूणाशदूढ्यदूलभान् ॥ ४० ॥

प्रवादान्दूढ्यदूणाशदूलभइत्येतांश्चप्रकृतिमानयेत् परिग्रहेक्रियमाणेकस्यहेतोःपदप्रकृतिदर्शनार्थं । दूणाशंसख्यं । दुर्नशमितिदुःऽनशं । जनस्यदूढ्यः । दुर्ध्य१इतिदुःऽध्यः । दूलभोरथः । दुर्दभइतिदुःऽदभः ।

परेष्वघोषेषुचरेफमूष्मणः ॥ ४१ ॥

अघोषेषुचपरेषुऊष्मणःरेफःक्रियते। तंचप्रकृतिमानये-

त् । परिग्रहेक्रियमाणे । कस्यहेतोःपदप्रकृतिदर्शनार्थं । काव्येनास्वर्चनाः । स्वर्चनाइतिस्वः । चनाः । धूर्षदंवनर्षदं । धूःसदमितिधूःऽसदं । पूर्पतिंसुशिष्टौ । पूःपतिमितिपूःऽपतिं ।

महाप्रदेशंस्वधितीवचानयेत्॥४२॥

महाप्रदेशंस्वधितीवेत्येतच्च पदंप्रकृतिमानयेत्परिग्रहेक्रियमाणे । महान् अयंप्रदेशःयत्प्रतिकंठंचास्यग्रन्थं सर्वाणिहिशास्त्राणिप्रतिकंठमुपदिश्यंते । सर्वशास्त्रार्थंप्रतिकंठ सूक्तं । प्रतिकंठंचास्यविधि कृतोनादोडुंदुःस्वधितीवेति । स्वधितिरिवेति स्वधितिःऽइव । रेफस्यलोपोदीर्घत्वंचपुराप्रतिपादितं । तस्मात्स्वमहाप्रदेशः प्रकृतिमानयेत् ।

नुटेच्चशौद्धाच्चरसंध्यमागमं ॥४३॥

नुटेत्शौद्धाच्चरसंधिंचयागमं प्रकृतिमानयेत् क्रियमाणेपरिग्रहे । कस्यहेतोःपदप्रकृतिदर्शनार्थं । सुश्चंद्रदस्म । सुचंद्रेतिसुऽचन्द्र । परिष्कृण्वन्ननिष्कृतम् । परिकृण्वन्नितिपरिऽकृण्वन् । धूर्षदंवनर्षदं धूःसदमिति धूःऽसदम । वनसदमिति वन । सदम् ।

अभिक्रमेपूर्वविधानमाचरेत्पुन-
र्वंस्तूत्तरकारितंक्रमे । विका-
रमन्यद्यदतोनुसंहितंतदाचरे-
दंतगताद्ययोस्तुन ॥ ४४ ॥

क्रमविधावभिक्रमेद्वैपदस्य प्रथमेवचनेपूर्वंविधानमाचरेत्। पूर्वंप्रयुक्तं विकारंपठेदित्यर्थः यथाप्रणाड्दूडोड्त्यवपणाः । पुनर्ब्रुवन् द्वितीयैकवचने उक्तरकारितमाचरेत् । नपूर्वकारितं । नडून्दो । विकारमन्यदितियदतः पूर्वोक्तरकृताविकारादन्यत् यत्पदंस्वयंविकृतं तदनुसंहितमाचरेत् । क्रमकालेपिउभयवचनेपियथासंहितंपठेदित्यर्थः । अंतगतस्याद्यागस्यस्वयंविकृतस्यापि उभयवचनेपिनाचरणां कुर्यात्तयो रुभयवचनस्याभावादितिभावः ।

सकृद्यथासंहितमेषुवाचरेत्पुनर्विब्रुवन्पदमप्यसंदधत् । परिग्रहेसंधिषुकारणान्वयात् ॥ ४५ ॥

अथच सकृद्यथा संहितमेषुचाचरेत् । एषुक्ततरेषु मकारलोपोष्मरभावमानयेदिति एवमादिषु । पुनर्द्वितीयंवचनंविब्रुवन् वक्तापदमविक्रियते । असंदधत् संधिमकुर्वन्परिग्रहेक्रियमाणे । कस्यहेतोः संधिषुकारणान्वयात् एषुहिनकारलोपादिषुसंधिषु यस्मिन्स्ते नकारलोपादयोविहिता स्तत्कारणमन्वेतिपरिग्रहस्यपूर्ववचने । श्येनाँइवेतिश्येनान्ऽइव । विश्वश्चन्द्रा अभिवहन् । विश्वश्चन्द्राइतिविश्वऽचन्द्राः ।

अविक्रमं ह्यूष्मसु चोष्मसंधिषु ॥ ४६ ॥

अविक्रममेवकुर्यात् वक्ता । ह्यूष्मसुऊष्मसंधिषुपरिग्रहेक्रियमाणे किमर्थमिदमुच्यते । दूडनिष्षिध्वरीः ।

स्वर्षातीतिच । नती: रेफस्यचनिवृत्तौ कृतायां पुनर्विसर्जनीयस्यतमेवोष्माणमूष्मणीति नित्यविधिंबाधित्वाऊष्मविधानत इतिविभाषाप्राप्नोति । तत्रव्यापत्तिरेवष्यतेनविक्रमः । एवमेवार्थं मिदमुच्यते । निष्षिध्वरीस्ते । निःसिध्वरीरितिनिःऽसिध्वरीः । स्वर्षातायत् । स्वः सातेतिस्वःऽसाता । हूष्मस्विवतिविं । दिवः पृथिव्योरित्यवाप्युपाचरितस्य निवृत्तौकृतायां प्रथमोत्तमवर्गीयेस्पर्शेवेति व्यापत्तिरेवस्यात् । अविक्रममिति परिग्रहविक्रमस्य प्रतिषेधात् । स्यान्मतं अव्यापत्तिः कस्वपफेषुवृत्तिरिति उक्तत्वान्नभविष्यतीति । तच्चन परिग्रहादन्यत्रसावकाशात्तस्य ।

समानकालावसमानकारणा व-
नंतरौवायदिसंनिगच्छतः । प-
दस्यदोषावथहेत्वसंग्रहेनियुक्त-
मार्ष्यान्यतरेणलुप्यते ॥ ४७ ॥

समानकालौएककालौ असमानकारणौ नानानिमित्तौ अनंतरौवा अव्यवहितौनिमित्ताद्व्यवहितौ वा यत्रसंनिगच्छतः संनिहितौभवतः । पदस्यदोषौ विकारौकार्यौवित्यर्थः । अथास्यामवस्थायां हेत्वसंग्रहेवङ्क्रमेण निमित्तापरिग्रहेसति । नियुक्तंनियोगतः आर्षी संहिताअन्यतरेणावचनेन लुप्यते । पूर्वेणापरेणवा । प्रणहूत्यवमनिमित्तंणत्वंउदात्तंनिमित्तं अनुदात्तस्यस्वरित-

इयंचोत्तरेणास्यप्रत्यादानेक्रियमाणेलुप्यते । नहूंशो । व्यवहितेशक्रएणां इत्यत्र रेफनिमितंणत्वमुदात्तनिमित्तमनुदात्तस्यस्वरितत्वं तदुत्तरेणप्रत्यादानेक्रियमाणेच लुप्यते एनंपीपयत् ।

मकारलोपेविकृतस्वरोपधे तृतीयभावेप्रथमस्यचध्रुवं ॥ ४८ ॥

मकारलोपे विकृतस्वरोपधेसति प्रथमस्यतृतीयभावेच । वहुक्रमेणाक्रियमाणे ध्रुवमार्षी लुप्यते । एरिणांति । इत्यत्रचैकादेशनिमित्तंणत्वं उदात्तत्वंच तदुत्तरेणप्रत्यादाने क्रियमाणे लुप्यते ईरिणांति । प्रथमस्यतृतीयभावे । इन्द्रस्यत्रिष्टुबिहेत्यत्रपकारस्यपरनिमित्तं तृतीयत्वंतत्पूर्वेणानुवचनेनलुप्यतेइन्द्रस्यत्रिष्टुबिहभागो ऽन्हः ।

विपर्ययोवेतरथाभ्युपेयुषां ॥ ४९ ॥

अथवा वहुक्रमाहृतेऽपि प्रथमस्यतृतीयभावे विपर्ययः । आर्षविपर्ययः । लोपइति प्रकृतं अलोपस्यविपर्ययः । इतरथाभ्युपेयुषां । कथं । तस्मादन्यमवसाने तृतीयंगार्ग्यस्पर्शमितिगार्ग्यमतं येऽभ्युपगच्छंति । तेषांइन्द्रस्यत्रिष्टुप्

अथोभयेषा मनुनासिकोदये ॥ ५० ॥

अथाप्यार्षी लुप्यतएव । अनुनासिकोदये प्रथमेसति उभयेषां गार्ग्यमतं येऽभ्युपगच्छंति येचशाकटायन-

मत मध्युपमर्छति । विककुब्भिवर्तदित्यत्र पकारस्य परनिमित्तंमत्वं तत्पूर्वेषांसहवचनेनलुप्यते । सप्तवर्गेभिककुप् ।

अथोनते नोपहिते नुनासिके ॥५१॥

अथोनते नोपहिते अनुनासिकेसति परेणासह बहुक्रमेक्रियमाणे षार्णौ लुप्यते । मोषुणइत्यत्रषत्वनिमित्तंणत्वं तदुत्तरेणासहप्रत्यादानेक्रियमाणे लुप्यते । नः परापरा ।

तथाक्षरस्य क्रमएकपातिनः ॥५२॥

अक्षरस्यक्रमः द्विर्वचनंबहुक्रमे अक्रियमाणेउभयोर्वचनयोर्लुप्यते एकाक्षरस्यपदस्य । मुंचतावि । व्यंहः ।

नचात्रपूर्वःस्वरितेनसंहितां लभेततस्मिन्नियतस्वरोदये ॥५३॥

अत्रएकपातिनः क्रमे तस्मादेकपातिनः पूर्वस्वरः स्वरितेनसंहितां नलभते । तस्मिन्नियतस्वरोदयेसति । इंसिनि । न्य१विषां ।

यदाचगच्छत्यनुदात्तमक्षरं वशंपदादेरुदयस्यतेनच ॥ ५४ ॥

यदाच अनुदात्तमक्षरं उदात्तस्यपदादेर्वशंगच्छति । स्वरितंच । उदात्तवत्येकीभावउदात्तं संध्यक्षरमिति तेनोदात्तेनैकीभावे तदाबहुक्रमेऽप्रक्रि-

षमाणे भुवमार्ष्यौलुप्यते । पातेवइत्यत्रते इत्यनुदात्तस्य भवइत्युत्तरेणैकादेशे उदात्तत्वम् । तत्पूर्वेणासहवचने लुप्यते । पाते । त्वांसोमपवमानं स्वाध्योन्वित्यत्र स्वाध्योइतिस्वरितस्योदात्तवत्येकीभाव इत्युत्तरेणैकादेशे उदात्तत्वं तत्पूर्वेणासहपठने लुप्यते । पवमानंस्वा ध्यायोनु ।

उदात्तपूर्वंनियतस्वरोदये परोविलोपोनियतोयदावरः ॥ ५५ ॥

उदात्तपूर्वएकादेशे नियतस्वरोदयेसति परस्वरेणासह वचनेइत्यर्थः । पार्ष्यविलोपोभवतीत्यनियतो यदावरः यतउदात्तः यदापरोभवत्यनुदात्तस्वपूर्वः तदाप्यवरः पूर्वेणासहवचनेइत्यर्थः । पार्ष्योविलोपो भवति । यद्येवंपूर्वस्यायं शेषः । इहकस्मादुच्यते । उदात्तपूर्वेप्येकादेशे इकारयोःप्रश्लेष एवमादौ शाकलविधाने पूर्वेणापिसहवचने पार्ष्यविलोपोभवति । इतिख्यापनार्थंच उदात्तपूर्वे । एंद्रसानसिमित्यत्र पाकारेणमहैकदेशनिमित्तमिकारस्योदात्तत्वं तस्यपरेणासह प्रत्यादानेविलोपः । इंद्रसानसिं । शाकलविधानस्योदाहरणं तथातेवंत्वित्यत्रतेइत्युदात्तस्या वंत्वित्यनुदात्तेनसहैकादेशनिमित्तं स्वरितत्वं तस्यपूर्वेणासहवचने विलोपः । अवंतुतेइत्यनियतो यदावरइत्येतस्य पूर्वसूत्रेनिदिष्टमेवोदाहरणं ।

स्वरैकदेशंस्वरितस्यचोत्तरं यदा-

निहन्यादनिमित्तमक्षरं ॥ ५६ ॥

स्वरितस्वरस्योत्तरमनुदात्तमेकदेशं तूदात्तस्वरितपरं संतंनिहन्यात्स्वरः । आप्यो३ रथमिति । तदक्षरं यदापूर्वेण सहानिमित्तंब्रूयात् । आर्षीलुप्यते । सोतारमोप्यो: ।

उदात्तपूर्वोप्यनुदात्तसंगमो यदास्वरौद्वौलभतेपिवाबहून् ॥ ५७ ॥

उदात्तपूर्वः स्वरित अपूर्वोपि अनुदात्तानामक्षराणां समवायः यदाद्वौलभते अपिबहून् स्वरांस्तदाबहुक्रमे अक्रियमाणे आर्षी लुप्यते । उतदेवाअवहितमित्यत्र देवाइत्यनुदात्तसंगमस्य पूर्वनिमित्तमाद्यस्य स्वरितत्वं तदुत्तरेणासहप्रत्यादानेक्रियमाणे लुप्यते । तथा परनिमित्तमंतस्यानुदात्तत्वं । तत्पूर्वेणासहवचने लुप्यते । उतदेवाः । देवाअवहितं । स्वरबहुत्वे पुरुपुरुभुजायदित्यत्र पूर्वापायेस्वरितोलुप्यते । स्वरितापायेप्रचयाः । पुरुभुजायत् । उत्तरापाये आनुदात्तः । पुरुपुरुभुजा । स्वरितपूर्वः । वदतावदग्रः । इत्यत्रपूर्वापाये प्रचयस्वरौ लुप्येते । वाचंवदतेत्यत्र उत्तरापायेनुदात्तः । यथाबहुक्रमेअक्रियमाणे समानकालावसमानकारणावित्येवमादिभिर्विहितेषु आर्षीलुप्यते । तस्माद्बहुक्रममिच्छंत्येकेआचार्याः ।

यथाप्रकृतस्वरवर्णसंहिते तयो-

स्तयोरक्षरवर्णयोस्तथा । अदर्शनेनार्ष्यविलोपउच्यते क्रमेष्वनार्षंब्रुवतेपरेस्वरं ॥ ५८ ॥

यथा येनप्रकारेण प्रकृतेविहिते स्वरसंहितावर्णसंहिताचतयोरक्षरवर्णयो रक्षरस्यस्वरस्य संहिता। वर्णानांच संहिता वर्णसंहिता। तयोः स्वरवर्णसंहितयोरदर्शनेसति उच्यते अनार्ष्यंविलोपः। नआर्ष्यविलोपः अनार्ष्यविलोपः। आर्षीविलोपइत्यर्थः। कोस्यविग्रहः। विलोपःविनाशः तस्याऽभावोऽविलोपः। आर्ष्याश्चविलोपः आर्ष्याविलोपः। नआर्ष्यविलोपः अनार्ष्यविलोपः। प्रणइत्यस्मिन्वचने णत्वस्वरितयोर्दर्शनादपि अनार्ष्यंलोपोभवतीतियद्यपिणत्वस्वरितौ तत्रदृष्टौ। नइंद्रो। इंद्रोमहे। इत्यत्रइंद्रोइत्येतस्य प्रचयस्वरस्य अभावात् लोपएव। नैषदोषः। क्रमेषुत्वपरे आचार्याःस्वरमनार्षंब्रुवते।

अदृष्टमार्ष्यंयदिदृश्यतेक्रमे विलोपमेवं ब्रुवतेपरेतथा। सकारणान्यार्ष्यविलोपविक्रमः क्रमेणायुक्तोपिबहूनिसंदधत् ॥ ५९ ॥

यद्यप्यन्यतरस्मिन्वचने आर्षीदृश्यते पुनरदृष्टसंहितायां यदिक्रमेदृश्यते एवमस्यामवस्थाया मपरे आचार्योविलोपं मन्यंते। कस्मादसतः प्रादुर्भावात्। न-

इंद्रो । तथाकर्थं । यथा समानकालावसमानकारणाविति विच्छितेषु सक्रमः कःपार्ष्यँविलोपविक्रमः आर्षप्रविलोपहेतुःक्रमेणायुक्तः तंचलोपंप्रतिकारणनिमित्तानि बहून्यपिपदानि संदधत्पठति । इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमं ।

पदंपदांतश्चयदानगच्छतिस्वरा
वसानंसतुयोलयुज्यते। तदानु-
रूपंलभतेनिराकृतं नचेन्निरा-
ह्णोपनिवृत्यतत्पदं ॥ ६० ॥

पदं यदास्वरं नगच्छति पदांतश्च यदावसानं नगच्छति तदाऽनुरूपंलभते । निराकृतंविस्मृतमन्येनकेनचिदाच्छादितमित्यर्थः। पदकाले स्वरकृतंवर्णकृतं चोभयंरूपमिति । अस्यामवस्थाया सन्धावार्षौविलोपेन यस्त्ववयुज्यते क्रमकःयउपनिवृत्य .तत्पदेनचेद्ब्रवीति । स्वरकृतं । तेषदन् । तद्भुतिते । अवपरिग्रहाहते उदात्तकृतंरूपमलभत । वर्णकृतं । नुहुत्वा । न्वितिनु । अवकृष्यकृतं रूपंलभते ।

स्थितस्थितोपस्थितयोश्चहृश्यते
पदंयथावद्वायवद्ध्युपस्थिते ।
क्वचित्स्थितौचैवमतोधिशाक-
लाः क्रमेस्थितोपस्थितमाचरं-

त्युत ॥ ६१ ॥

यदुक्तमधस्तात् स्थितोपस्थितानां मन्यते एनंपदप्रदर्शनमाचरंतीति तत्अव्ययवत् । अन्यूनवदित्यर्थः । आरैक्पंथां । अरैगिति । एवमुपस्थितेसतिपदांतस्य पददृष्टं स्वरितत्वं तत्रनदृश्यतेतस्मादव्ययवदित्युच्यते । तथामोषूणा इत्यत्रोपस्थित्युक्ते ह्रस्वांतं नदृश्यते । क्वचित्स्थितावप्येवं यथोपस्थिते तथाप्यव्ययवदृश्यते । प्रातःसोमं । प्रातरित्यत्रपदेदृष्टोरेफःसनदृश्यते । अतोप्यस्माद्धेतोःशाकलाःक्रमेवर्तमानेस्थितोपस्थितमेवाचरंति । अरैगित्यरैक् । स्वितिसु । प्रातरितिप्रातः ।

क्रमेतसर्वाणिपदानिनिर्ब्रुवन्नितिस्मरंति ॥ ६२ ॥

क्रमेणक्रमंब्रूयात्क्रमकःसर्वाणि पदान्येकैकंपदंनिर्ब्रुवन् । द्विक्रमेवहुक्रमेवा इतिस्मरंति । एवमिच्छंत्येके आचार्याः । कस्माद्धेतोः एवंसुखतरमार्गो अविलोपोभवतीति । आमंद्रं । एत्या । मंद्रमावरेण्यं । मंद्रमितिमंद्रं । आवरेण्यं । एत्य । एवंसर्वत्र ।

आचरितंतु नोत्क्रमेत् । क्रमस्य वर्त्मस्मृतिसंभवौ ब्रुवन् समाधिमस्यान्वितराणि कीर्त्तयेत् ॥६३॥

पार्षदं यदाचरंति पूर्वशास्त्रविहितं । क्रमोद्वाभ्यामभिक्रम्येत्येवमादिषु तुनोत्क्रमेत् । नान्यथाकुर्यादित्यर्थः । क्रमस्यवर्त्म हतंस्मृतिसंभवौ हेतूब्रुवन्वक्ता । स्मृतिशास्त्रे दर्शनादिसंभवस्तुपपत्तिरित्यनर्थांतरं । अस्यक्रमस्य समाधिंसंपदमन्वितराणि । अनुगम्य अनुलक्ष्यच इतराणिकतराणि क्रमहेतौ शासनानिकीर्त्तयेत् । किमुक्तंभवति । पूर्वस्मिन्क्रमशास्त्रे यासंपदुक्ता तस्या अविरोधेन हेतूक्तानिकुर्यादित्यर्थः । अग्निमीले । ईलेपुरोहितं । इतौपरिगृह्यमाणे अत्रापिविक्रमः प्राप्नोति अदृष्टमार्षत्वा यथादृश्यतेक्रमइत्यपरे वर्णयन्ति । समाधिमस्यान्वितराणि कीर्त्तयेत् । अस्यक्रमस्य समाधिमान्वितराणि क्रमहेतौशासनानि कीर्त्तयेत् । किमुक्तंभवति । पूर्वस्मिन्क्रमशास्त्रे यासंपदुक्ता तस्या अविरोधेनहेतावुक्तानि कुर्यादित्यर्थः । यथा अदृष्टवर्णोप्रथमे प्रदर्शनंयथा चप्लुतादिप्रभृतीनीत्येवमादीनि ।

यथोपदिष्टंक्रमशास्त्रमादितः पुनःपृथक्त्वैर्विविधैर्नसाधुवत् ॥६४॥

यथोपदिष्टंक्रमशास्त्रं आदित स्तदेवसाधुरध्येतव्यः । पुनः पृथक्त्वैर्विविधै यदुक्तं तन्नसाधुवद्विद्यात् । किंकारणं । सर्वथाभिक्रमेक्रियमाणे स्वरसंपद्यांतरमाश्रित्य संहितायाअविलोप इत्युच्यते ।

इतिप्रबाभ्रव्यउवाचचक्रमं क्र-

मप्रवक्ताप्रथमंशशंसच ॥ ६५ ॥

इत्येवंबाभ्रव्यः। बभ्रुपुत्रः भगवान्पंचालः क्रमस्यप्रवक्ताऋषिरभूत् क्रमंप्रथमं प्रोवाच। प्रशशंसच। हिताय। कथंन्वायते हितायेति। प्रथममधिगम्य क्रमकाः कृतसंक्रमाइव मार्गमाक्रमंतःसुखमाक्रमंते। संशयदुर्गाणिक्रमंते। भवतिचात्रश्लोकः। क्रमाभिगमभिन्नानि दुर्गाणिसुमहान्त्यपि। विलीयंतेक्रभिन्नानि तमांसीवनिशात्ययेइति।

क्रमेणनार्थः पदसंहिताविदः पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः। अकृत्स्नसिद्धश्चनचान्यसाधकोनचोदयापायकरो नचश्रुतः ॥ ६६ ॥

योयं विहितोविधिः क्रमोद्वाभ्यामभिक्रम्येति तेननार्थः। कस्यहेतोः पदसंहिताविदः पदानिविदुषः संहिता चोत्तरकालं क्रमविधिरारभ्यते पुरा प्रसिद्धाश्रयपूर्वसिद्धिभिः हेतौतृतीया। पुराऽप्रसिद्धः। एवंचास्य क्रमस्य पदसंहिता पूर्वमप्रसिद्धः। आश्रयपूर्वसिद्धिः। पदसंहितं क्रमस्याश्रय स्तत्पूर्विका ह्यस्यसिद्धयो भवंति। पुराचेन्नविधीयते। नचान्यतो विधीयते। तस्मात्पदसंहितादनन्योयं क्रमोभवति। अविशेषेहि विशेषारंभोनर्थकः। अकृत्स्नसिद्धश्च। नकृत्स्नसिद्धः क्रमोयद्यपिचास्यविशेषाः संति संहिताया अविलोपार्थः पदसंहिताश्रयत्वात्।

अकृत्स्नसिद्धइत्युच्यते । नचान्यसाधकइति नायंक्रमः अन्यशास्त्राश्रयाद्विशेषान् साधयति । अकृत्स्नसिद्धस्य ह्यन्यसाधनं नविद्यते । नचोदयापायकरइति । नचायंक्रमो अध्येतुरभ्युदयकरः । नचापायकरः । नचश्रुतः । नचायंक्रमोष्टानां ब्राह्मणपथाना मन्यतमस्मिन् ब्राह्मणपथेश्रूयते । यथाऋषिछंदो दैवतयुक्तः स्वाध्याययज्ञकर्मसु संहिताविधिः यथाचनामाख्यातोपसर्गनिपाताः पदमितिपदविधिः एभिः कारणैः क्रमेणानार्थं इत्युच्यते । भवतिचात्रश्लोकः । यदिविषयगतोनान्यज्जनयतिगुणान् कृत्स्नंखलुसमभिकालंपर्षदिवंवदेदिति ।

असिध्यतःसिद्धि विपर्ययोयदि
प्रसिध्यतोसिद्धिविपर्ययस्तथा ॥६७॥

यदुक्तं पदसंहितापूर्वोयं क्रमोन सिध्यति तस्मादस्यप्रसिद्धि विपर्ययइति । तन्नास्ति कस्यहेतोः । प्रसिद्धतः असिद्धत्वस्य विपर्यय स्तथाभविष्यति । प्रसिद्धं हि पदसंहितामाश्रित्य यद्ययं क्रमोवर्तते ततः प्रसिद्धएव । अन्यस्यायं पदसंहिताक्रमोभवतीति प्रतिज्ञापूर्वोक्ता । एकदेशंहि साधयत्येकदेशी ।

सद्वापवादेषुच सत्सुनः क्रमः
प्रदेशशास्त्रेषु भवत्यनर्थकः ॥६८॥

अपवादनिंदेत्यर्थः । सद्वापवादेषु प्रदेशशास्त्रेषु सत्सु यैः अर्थाः प्रदिश्यंते तानिप्रदेशशास्त्राणियथासां-

व्ययोग शास्त्राणां । तेष्वपि अन्यस्मिन्नव्ययस्यापवादो दृश्यते । तेषुशास्त्रेषु सत्सु विद्यमानेष्वित्यर्थः । नायं क्रमोनर्थको भवितुमर्हति ।

विपर्ययाच्छास्त्रसमाधिदर्शना
त्पुराप्रसिद्धे रुभयोरनाश्रयात् ।
समभ्युपेयाद्बहुभिश्चसाधुभिः श्रु-
तेश्चसन्मानकरः क्रमोर्थवान्॥६८॥

विपर्ययादिति क्रमेणानार्थः पदसंहिताविद इत्युक्ताप्रसिध्यतः असिद्धिविपर्ययस्तथेत्युक्तं सविपर्ययः । असिद्धा अपिभावाः सिद्धानाश्रित्यसिद्धा भवंति । शास्त्रसमाधिदर्शनाच्चायंक्रमोर्थवान्भवति । शास्त्रसमाधि दर्शनादितिक्रमशास्त्रेहि अनेकविधिविशेषाः संहितापदादिपदांतानुग्रहार्थाविधीयंते । यथैवानवसानीयानीति निमित्तसंशयानीत्येवमादयः । पुराप्रसिद्धेश्चायं क्रमोर्थवा न्भवति । पुराप्रसिद्धेरिति कथंहिनामपुरा अप्रसिद्धः सन् अनवसानीयादीन् विशेषानारभेत् । उभयोरनाश्रयात् । उभेअपिपदसंहिते अवाश्रित्यक्रमो वर्तते तस्मादप्यर्थवान् क्रमः कथमनाश्रयादित्युच्यते । व्यतिरिक्तेहि पदसंहिते । विशेषारंभश्च क्रमशास्त्रेदृश्यते । यथैवावगृह्याणां परिग्रहणं समभ्युपेयाद्बहुभिश्चसाधुभिः पूर्वाचार्यैः समभ्युपगमनाच्चायं क्रमोऽर्थवान् भवितुमर्हति । कथंहिनामानर्थकं संतंबहवः सा-

धवः परिगृह्णीयुः । श्रुतेश्च सन्मानकरः क्रमोर्थवान् । श्रुतेश्चायं दृष्टः क्रमः । द्वैपदानांगिरसः प्रोचुः । विपदेनवालखिल्या इत्येभिः कारणै रयंक्रमोर्थवान् भवति । भवतिचावसिष्ठोयं । श्रुतितस्वलक्षितोनुमितस्वविविधैर्गुणैर्विशेषैर्वितत्या संधिंनयातिच पदविषये पुनरपिच विकृतिसुचितां नजहाति ।

ऋतेनचद्वैपदसंहितास्वरौ प्रसिध्यतः पारणकर्मचोतमं क्रमात् ॥ ७० ॥

इतस्वायं क्रमोर्थवान् भवति । क्रमादृते द्वैपदसंहिता चद्वैपदस्वरश्च नसिध्यति । द्वैपदे हि सिद्धे उत्तरारंभः शक्यते कर्तुं । पादार्द्धर्चऋचसूक्तसिध्यर्थं । पारणकर्मचोत्तममिति भगवतापंचालेनस्थापितानां पारायणक्रमर्णां क्रमपारायणमुत्तमं परंपरयामहिम्नाच । भवति चात्र श्लोकः । प्रगाथे पुनरादानं दृष्ट्वायत्नविधौमुनिः । अर्थवंतंक्रमंब्रूयाद्धवतायाश्चशास्त्रतः । क्रमोर्थवान् भवति ।

अतोप्यृग्यजुषांचबृंहणं पदैःस्वरैश्चाध्ययनं त्रिभिः ॥ ७१ ॥

अतोपि अस्मादपिहेतोः क्रमोर्थवान् भवति । क्रमात् ऋचांयजुषांच धारणंक्रियते द्वैपदेन । यथापदाध्ययनेनचोदात्तानुदात्तस्वरितैः ऋग्यजुषांधारणंक्रियते तथाध्ययनंत्रिभि रन्योन्यं वर्त्तते । संहितापदक्रमैस्तस्माच्चा-

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गोरक्षा	०	४	०
गुरुसारणी	०	५	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	२	६
धातुपाठः (शिला –))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	६	०	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	५	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	५	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	४	०	०
उपसर्गवृत्तिः	०	१	०

विज्ञापनम् ।

—:०:—

बनारससंस्कृतसीरीजनाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १२	१२	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ८	८	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुःसर्वानुक्रमसूत्रम् सभाष्यं	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ३	३	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम्	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणव्याख्यानम्)	४	०
न्यायलीलावती (यन्त्रस्था)	०	०

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS:

EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
No. 79.

महर्षिशौनकप्रणीतम ऋक्प्रातिशाख्यम् ।
उव्वटकृतभाष्ययुतम् ॥

श्रीपण्डितयुगलकिशोरपाठकान्तेवासिना श्रीहिन्दुकालेज मध्यवर्त्ति श्रीरणवीरपाठशालायां वेदशास्त्राध्यापकेन श्रीमत्पण्डितप्रभुदत्त शर्म्मणा संशोध्य प्रकाशितम् ॥

ŚAUNAKA'S PRÂTIŚÂKHYA
OF THE RIGVEDA,
WITH THE COMMENTARY OF UVVATA.

EDITED AND ANNOTATED BY THE LATE PANDIT
YUGALAKIŚORA VYÂSA,
And His Esteemed Pupil Pandit
PRABHUDATTA ŚARMÂ,
PROFESSOR OF VEDA, CENTRAL HINDU COLLEGE, BENARES.

Fasciculus IV.

BENARES.
Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya vilas Press,
BENARES.

1903.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

यं क्रमोर्थवान् भवति । भवतिचात्रश्लोकः । शरदुज्ज्वलो वितिमिरो विभाति भगवान्यथांशुमान् । सत्यवचनवित्तमः क्रमकः क्रमतेहि संशयांस्तमस्तथात्मवान् इति ।

इति श्रीपार्षदव्याख्याया मानंदपुरवास्तव्य वज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये क्रमहेतुकमेकादशं पटलम् ।

ऊष्मांतस्थर्सोष्मचकारवर्गा नांतं यांत्यन्यत्र विसर्जनीयात् ॥ १ ॥

ऊष्माणश्च अंतस्थाश्च ऋकारश्च सोष्माणश्च चकारवर्गइत्येते सप्तविंशतिवर्णाः पदांतं नगच्छंति । किमविशेषेणेत्याह । विसर्जनीयं वर्जयित्वा । विसर्जनीयस्तु ऊष्मसुमध्येतिष्ठति तथापि पदांतंनगच्छति । अग्निः । वायुः । परिशेषादन्येगच्छंति । तानुदाहरिष्यामः । एव । तथा । नृभ्यः । पति । देवी । वसु । बाहू । अग्ने । वायो । वै । तौ । वाक् । अर्वाङ् । विट् । वृषण्वान् । यत् । देवान् । त्रिष्टुप् । इंद्रम् ।

ऋकारलकारौ परमर्धमूष्मणां

नादितकाराद्वरे च सप्त ॥ २ ॥

ऋकारःऌकारः ऊष्मणांचोत्तरभागोविसर्जनीयादिरुच्यते । तकाराच्च पूर्वेऽकारादयः सप्त । एतेत्रयोदशवर्णाः पदादिंनगच्छंति । पारिशेष्यानुदाहरिष्यामः । अथ । आत् । ऋतं । इदं । ईषत् । उत । ऊधुः । एषः । ओमभीः । ऐत् । औचत् । कः । खनमानः । गंगे । घृतं । चित्तं । छाया । जगत् । तं । प्रतऽथा । देवं । धनं । नु । परि । फलिनीः । बलं । भयं । मम । या । रत्नं । लक्ष्मीः । वायुः । शरिणः । शतं । षट् । सः ।

नान्योन्येनमध्यमाः स्पर्शवर्गाः संयुज्यंते ॥ ३ ॥

मध्यमाये त्रयस्पर्शवर्गा स्तेऽन्योन्येनसह नसंयुज्यंते । स्ववर्गीयैस्तु संयुज्यंते । अग्र्यैश्च । यज्ञ गौः । जञ्जतीरिव । सुष्ठु । कृष्णः । मंडूकः । रथ्येव । अध्वनयत् । इन्द्रो । ग्धेतिग्ध । मध्वः । अर्चंति । वत्सं । उद्वानां । वल्मीः । वार्ध्यं । स्रोतंति । स्तौति । मध्यमाइतिकिं । वाचपतंमाय धीयते । अन्यैश्च संयुज्यते ।

न लकारेणरेफः ॥ ४ ॥

लकारेण सहरेफो न संयुज्यते । पर्वभ्यां । अर्चंति । सर्पिः । बर्हिः । वर्षं ।

स्पर्शैर्वकारो नपरै रनुत्तमैः ॥ ५ ॥

अनुत्तमैः स्पर्शैः परैर्वकारो नसंयुज्यते । पूर्वैस्तुसंयुज्यते । क । ज्वलंतौ । नवग्वाः । अनुत्वं । अनुत्तमैरिति किं । दधिक्राव्णः । सुतपाव्ने ।

तथातेषांघोषिणः सर्वैथोष्मभिः॥६॥

तथैवतेषां स्पर्शानां उत्तमादन्येघोषिणः सर्वैथाऊष्मभिर्नसंयुज्यंते । अघोषास्तु संयुज्यंते । स्कंभथुः । इवोतंति । रघ । स्वद् । अनुत्तमैरितिकिं । यक्ष्मः । पृश्निः । विष्णुः । तथातेषामिति वाक्मात् । ह्यामि । स्वःस्थात् । ऊष्मभिरितिकिं । नग्वदंतोरं घ्नंत ।

नांत्यांतस्थान प्रथमोष्मभिःपरैः ॥ ७ ॥

अंत्या अंतस्थाः । प्रथमाद्यांतस्था ऊष्मभिःपरैर्नसंयुज्येत । पूर्वैस्तुसंयुज्यंते । प्याकाष्णुस्य सुम्नतः । स्वाहाग्नये वरुणाय । अंत्याप्रथमे इतिकिं । अर्हसि । वनस्पते शतवल्शः ।

नरेफो रेफेण ॥ ८ ॥

रेफोरेफेणसह नसंयुज्यते । अन्यैस्तु संयुज्यते । अभावान्नोदाहृतं । अर्यमा ।

नसोष्मणोष्मवान् ॥ ९ ॥

सोष्मणासह ऊष्मवान्नसंयुज्यते । तृतीयेनाप्यपिहितं । अमघ्नात् ।

नस्पर्शै रूष्माप्रथमः परःसन् ॥१०॥

स्पर्शैःसह प्रथमोष्मापरः सन्नसंयुज्यते । पूर्वैस्तुसंयुज्यते । पूर्वाह्णे । अन्हान्हामः । स्पर्शैरितिकिं । बर्हिः ।

नानुत्तमैः सचसोष्माचपूर्वौ ॥११॥

अनुत्तमैःस्पर्शैः सचछकारः सोष्माचपूर्वौसंतौ नसंयुज्येते । उत्तमैस्तु संयुज्येते । ब्रह्म । अह्ना । ह्वघ्नः । अमथ्नात् । दध्ना । गृभ्णामि ।

नानुत्तमाघोषिणोघोषिभिःसह स्पर्शैःस्पर्शाः ॥ १२ ॥

अनुत्तमाघोषिणः स्पर्शाःअघोषैःस्पर्शैः पूर्वैःपरैश्चसह नसंयुज्यंते । उत्तमास्तुसंयुज्यंते । पलिक्नीः । अमथ्नात् । अप्नस्वतीमश्विना । परोदाहरणानि । यद्दुङ्‌खयंति । पन्याम् ।

नोत्तमाऊष्मभिःपरैः ॥ १३ ॥

उत्तमाःस्पर्शाः ऊष्मभिःपरैःसह नसंयुज्यंते । पूर्वैस्तु संयुज्यंते । ब्रह्म । विष्णुःस्म । पृश्निः । उत्तमाइतिकिं । अप्सु । रष्मी ।

लकारस्पर्शैर्नयकारउत्तरैः ॥१४॥

लकारेणस्पर्शैश्चोत्तरैर्यकारो नयुज्यते । पूर्वैस्तुयु-

ळ्यते । विबाल्यं । दूळ्भः । सत्यं । आरभ्या । ळकारस्पर्शैरितिकिं । इंद्रवाय्वोः ।

ऊष्मणोन्योन्येनच न ॥ १५ ॥

ऊष्माणोन्योन्येनच सह नसंयुज्यंते । स्वैस्तुसंयुज्यंते । शुनश्शेपः । निष्षिध्वरीः । निष्षपी । शाश्वि ।

ऋक्पदेष्विदं ॥ १६ ॥

यदिदमस्मिन्पटले विधानमुक्तंतदृक्षुपदमध्येएव भवति पदसंधौ नभवतीति । यदुक्तं नान्योन्येन मध्यमाःस्पर्शवर्गा इतिसंधौ नभवति । षषड्ढे । उपमाषड्द्वाद्वा । तथा नळकारेण रेफइतिसंधौनभवति । सुमदंशुर्ललामीः । तथानोत्तमाऊष्मभिः परैरितिनभवति । देवान्हुवे । दध्यङ्ह । अर्वाङ्द्युम्नतमं । दशस्यन्षष्टिं । प्रत्यङ्सविश्वा । शर्मन्स्याम । इदमपिपद्यांतरमिति ! उदाहरणंभवति ।

नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानिशाब्दाः ॥१७॥

नाम । आख्यातं । उपसर्गः निपातः इतिचत्वारिशब्दविदआहुः ।

तन्नामयेनाभिदधाति सत्वं ॥१८॥

तन्नामेत्युच्यते येनशब्देनाभिदधाति वक्ता सत्वं द्रव्यमित्यर्थः अश्वइंद्रवरुण मित्रदेवाः ।

तदाख्यातं येनभावं सधातु ॥१९॥

तदाख्यातमित्युच्यते येनशब्देन सः धातुना अभिधातिवक्ता । भावं क्रियामित्यर्थः । इतंनुदेयां निशिशीतमविषः ।

प्राभ्यापरानिर्दुरनुव्युपापसंपरिप्रतिन्यत्यधिसूदवापि । उपसर्गाविंशति रर्थवाचकाः सहेतराभ्यां ॥ २० ॥

प्र । अभि । आ॰ परा । निः दुः अनु॰ वि॰ उप॰ अप । सं । परि । प्रति । नि । अति । अधि । सु । उत् । अव । अपि । इत्येतेविंशतिरुपसर्गाः अर्थवाचकाः अर्थवाचिनः सहेतराभ्यां नामाख्याताभ्यां । प्र । प्रयाजेजातवेदसः । प्रदेवंदेव्याधिया । अभि । अभिष्टनेते अद्रिवः । अभिष्यामरचक्षः । आ । आयंतारं महिस्थिरं । मरुद्भिराग्न आगहि । परा । परायतीं मातरमन्वचष्ट । पराशृणीहितपसा यातुधानान् । निः त्वष्टुर्देवस्य निष्कृतं । निरस्वतापार्श्वान्निर्गमाणि । दुः । पुराग्नेदुरितेभ्यः । दुर्नियंतुः परिप्रीतः । अनु । अनुनुस्थात्यवृकाभिरूतिभिः तन्नक्तमुषानरामनुष्यात् । वि । विराट्संम्राट् अपितवीत । विपाट्छुतुद्री । उप । यत्रेयच्च उपस्तुता । इंद्रमग्निं सुपस्तुहि । अस्यप्राणादपानती । अपेहिमन सस्पते । सं । प्रसम्राजंचर्षणीनां । सम्रा-

जोरवपाहस्मे । परि । विद्दुर्विषाणां परिपानं । बाजीसन्परिणीयते । प्रति । प्रतियंतंचिदेनसः । प्रतिकेतवः प्रथमाः । नि । अपोनिषिंचन्नसुरः पितानः महांतंकोशमुदचानिषिंच । अति । अतिविद्धाविथुरेण । अति क्रमिष्टं जुरतं । अधि । ममराष्ट्रस्याधिपत्यं । अभिशस्तेरधीहि । सु । सुकृत्सुपाणिः स्ववान् । अश्विनावृषेस्तुहि । उत् । उद्यन्नद्यमित्रमहः । उभेउदेतिसूर्यः । अव । अवस्पर्तरधिवक्तारं । अवाधमं विमध्यमं । अपि यदीगच्छंत्युशतीरपिष्ठितं । देवाद्देवानामपियंतिपाथः ।

इतरेनिपाताः ॥ २१ ॥

इतरेकतरे । नामाख्यातोपसर्गेभ्यो ऽन्येनिपातावेदितव्याः । अश्वान् एतां । उवा । घ । स्म । स्यचां । आवां । अपां । दूतं । नूनं । शश्वत् । कुवित् । सकृत् । अथातः अथ । अथो । अरिष्टतातये । विष्णोर्नुकं । अन्यश्चेन्नाभिगच्छति । सहोजाः । ताः खिद्गर्भं इत्येवमाद्याः मादयश्चेत्येवमादयः ।

विंशतेरुपसर्गाणामुच्चाएकाक्षरानव ॥ २२ ॥

प्र । आ । निः । दुः । वि । सं । नि । सु । उत् । इत्येते उपसर्गाणां नवसंख्या एकाक्षरा उच्चाउदात्ता इत्यर्थः ।

आद्युदात्तादश्चैतेषां ॥ २३ ॥

एतेषामुपसर्गाणां दशाद्युदात्तावेदितव्याः । परा ।

अनु । उप । अप । परि । प्रति । अति । अधि । अव । अपि । इत्येते अन्तोदात्तस्त्वभीत्ययं २४ । एतेषामेवोपसर्गाणां मध्ये अभीत्ययं अंतोदात्तोवेदितव्यः । अभिप्रियाणिपवतेचनोहितः । क्रियावाचकमाख्यातमुपसर्गोविशेषकृत् । सत्वाभिधायकं नाम निपातः पादपूरणः ऋत्वर्थावेतौ ।

निपातानामर्थवशान्निपातना-
दनर्थकानामितरेचसार्थकाः ।
नेयंतइत्यपि संख्यइवाङ्मये
मिताक्षरे चाप्यमिताक्षरेचये॥२४॥

इतिश्रीपार्षदव्याख्यायामानंद-
पुरवास्तव्यवज्रटपुत्रोव्वट-
कृते प्रातिशाख्यभा-
ष्येद्वादशपटलं ।
द्वितीयोध्यायः समाप्तः ।

वायुः प्राणः कोष्ठ्यमनुप्रदानं कंठस्यखेविवृते संवृतेवा । आपद्यते श्वासतां नादतांवा वक्त्रीहायां ॥ १ ॥

यइमे शारीरा इहपंचवायवो नानाकर्माणः प्राणापानव्यानोदानसमानास्तेषां प्राणोहि नाभेरुपरिष्टाद्घ्राण्यास्ये व्याचरति । नाभेरधस्तात् पायुमेढ्रयोरपानः । प्रसारणाकुंचनोत्क्षेपणावक्षेपणादि कर्माव्यानः । कर्मप्रवृत्तिषु बलमारोपयत्युदानः । सर्वक्रियाणामुपरमणः समानः । एवंवाचि वर्त्तमानं प्राणमेके आचार्यामन्यंते । उदानमपरे मन्यंते । उपरिष्टान्मुखादग्रे ऊर्ध्वंयोवर्त्तेऽनिलः । ऊर्ध्वंकर्मक्रियाःसर्वाः प्राणिनांसंप्रवर्त्तयन् ।१। नाभ्युरोथशिरोभागं गच्छन्करचरणसंयुतः । कंठताल्वोष्ठदंतानां सप्रयत्नः समीरितः । २ । ह्रस्वदीर्घप्लुतान्वर्णान्स्निग्धान्रुक्षांस्त्वनेकधा । उदात्ताननुदात्तांश्च स्वरितान्कंपितानपि ॥ ३ ॥ समान्विकीर्णांस्तथा संवृतान्विवृतानपि । देहिनामपिबोधार्थं तेनोदानःसउच्यते ॥४॥ एवमुभयथाऽचार्यविप्रतिपत्ति दर्शनाच्छौनकेन भगवताप्राणंमन्यमानेन शास्त्रमेवंप्रणीतं वायुःप्राणः कोष्ठ्यमनुप्रदानमिति । येपुनरुदानंमन्यन्ते तेषामिदं नसिध्यति । उदानाभावेतेषांच सिद्धं । कथं । शारीराणां पंचानामपि प्राणइतिनामसाधारणं । तस्मात्तेषामपि वायुःप्राणः कोष्ठ्यमनुप्रदानमिति सिद्धं । प्राणोवायुः कोष्ठमुदरं । कोष्ठेभवंकोष्ठ्यं अनुप्रदानं । वायुमनुप्रदीयत इत्यनुप्रदानं । किंचतत् । श्वासनादोभयं केनप्रयत्नेन । किमनुप्रदान मापद्यते । कंठस्यग्रीवायाः खिगलस्यविलेछिद्रेविवृते । विपुलेविशाले सच्छति । संवृते संकुचिते संश्लिष्टेअल्पेवासति आपद्यते श्वासतां श्वासत्वं । नादतां नादत्वं वा । वत्क्री-

हायां । ईहाचेष्टा वक्तुरीहावक्त्रीहातस्यांवक्त्रीहायां । सवायुः कंठबिलेविहृतेश्वासत्वमापद्यते । संहृतेनादत्वं ।

उभयं वांतरोभौ ॥ २ ॥

उभौ विहृतसंहृतौ अंतराकंठबिलेसमे सत्युभयंश्वासनादावापद्येते ।

तावर्णानां प्रकृतयो भवंति ॥ ३ ॥

ताःखलुएताः सर्ववर्णानां श्वासनादोभयास्तिस्रः प्रकृतयोभवंतीति वेदितव्यं । उक्तेप्यस्मिन्नज्ञायते केषांवर्णानां काप्रकृतिर्भवतीति । तत्रब्रूमः ।

श्वासोऽघोषाणां ॥ ४ ॥

अघोषाणां श्वासः प्रकृतिर्भवतीति वेदितव्यं ।

इतरेषांतु नादः ॥ ५ ॥

इतरेषां कतराणां स्वराणां घोषवतां च नादःप्रकृतिर्भवतीति वेदितव्यं ।

सोष्मोष्मणांघोषिणांश्वासनादौ ॥ ६ ॥

सोष्माणोयेघोषिणः वर्गचतुर्थः । उष्मणांचघोषी हकारस्तेषां वर्णानामेवश्वासनादौ प्रकृतिर्भवतीतिवेदितव्यं । श्वासानुप्रदानाअघोषाः । हकारचतुर्थाउभयानुप्रदानाः । अवशिष्टाःसर्वे नादानुप्रदानाइतिवेदितव्यं

तेषांस्थान मप्रतिनादात्तदुक्तं ॥७॥

तेषां श्वासनादोभयानांस्थानंप्रतियद्वक्तव्यं तदेतद्व्याख्यातं नादःपरोभिनिधानाद् ध्रुवं तत्तत्कालस्थानमिति । एवंश्वासादीनि । वीर्यमनुप्रदानानि वर्णकालस्थानानि भवंति । नाधिकानि नन्यूनस्थानानि ।

तद्विशेषकरणं ॥ ८ ॥

तत्रवर्णात्मगुणतत्वज्ञाने करणंनामविशेषो वक्ष्यति । करणंप्रदानं इत्यनर्थांतरमाहुः ।

स्पृष्टमस्थितं ॥ ९ ॥

स्पृष्टं करणं स्पर्शानां । परिशेषात् तत् अस्थितं वेदितव्यं । अस्थितमिति यत्रवर्णस्थानमाश्रित्यजिव्हानसंतिष्ठते तदस्थितमित्युच्यते ।

दुस्पृष्टं तु प्राग्घकाराच्चतुर्णां ॥ १० ॥

दुस्पृष्टं ईषत्स्पृष्टमित्यर्थः । हकारात्प्राक्चतुर्णां वर्णानां यरलवानां ।

स्वरानुस्वारोष्मणामस्पृष्टंस्थितं ॥११॥

स्वराणां अनुस्वारस्य ऊष्मणां चास्पृष्टं स्थितं वेदितव्यं । यत्रवर्णस्थानमाश्रित्य जिव्हाऽवतिष्ठते तत्स्थितमित्युच्यते ।

नैकें[illegible]स्य स्थितमाहुरूष्मणः ॥१२॥

एकेषामाचार्याः कंठ्यस्य ऊष्मणो हकारस्य विसर्जनीयस्य च अस्पृष्टंकरणंनमन्यंते । स्पृष्टं दुस्पृष्टं वा एवमेके । अपरे अकंठ्यस्येति वर्णयंति ।

प्रयोक्तुरीहागुणसंनिपाते वर्णीभवन्गुणविशेषयोगात् । एकश्रुतीःकर्मणाप्नोतिवह्वीः॥१३॥

प्रयोक्तुर्वक्तुरीहा ईहाएवगुणःईहागुणः तेनसंनिपातेयोगेकंठ्यस्यवायोर्वर्णीभवन्नितिवर्णत्वमापद्यमानः एकः सन् कंठ्यः सवायुः गुणविशेषयोगात् गुणाएवविशेषागुणविशेषास्तैर्योगाद्यः कंठ्यवायुर्बह्वीःश्रुतीः बहुरूपाणिकर्मणा क्रियया प्राप्नोति । केवगुणविशेषायैःसंयोगाद्वर्णानांश्रुतितो विशेषोभवति । अनुप्रदान । संसर्ग स्थान करण परिमाणास्तैःसह संयोगाद्वर्णानां रूपभेदोभवति । वर्गेवर्गेतुल्यस्थानानां तुल्यप्रयत्नानामपि प्रथमतृतीयाना मनुप्रदानकृतः श्रुतिविशेषः । कचटतपगजडदबाइति । तथाहकारविसर्जनीययोः । संसर्गेणेतिवक्ष्यति आहुर्घोषंघोषवतां मकारमेकेनुस्वारमनुनासिकानां । सोष्मतांच सोष्मणामूष्मणामाहुः सस्थानेनघोषिणां घोषिणोवेतिद्वितीयचतुर्थाः ऊष्मणासंसृज्यंते । अनुस्वारेणपंचमाः । तत्रतुल्यस्थानप्रयत्नानुप्रदानानामपि प्रथमद्वितीयानां तथातृतीयचतुर्थानां तथातृतीयपंचमानांच संसर्गकृतःश्रुतिविशेषः । कचटतपखछठथफ । तथा । गजडदब । तथा । घझढधभ ।

तथा । ङञणनमइति । स्थानेनेति तुल्यप्रयत्नानुप्रदानानामपि स्थानकृतः श्रुतिविशेषः । अऋइउकचटतपयरलव । हशषस । करणेनेति तुल्यस्थानानुप्रदानानामपि इकारजकारयकाराणां करणकृतः श्रुतिविशेषः । परिमाणेनेति तुल्यस्थानप्रयत्नानुप्रदानयोरपि समानाक्षरयोः परिमाणकृतः श्रुतिविशेषस्तथा अआऋॠइईउऊइति । अपिचश्लोकः । अनुप्रदानात्संसर्गात्स्थानात्करणविभ्रमात् । जायतेवर्णवैशेष्यं परिमाणाच्चपंचमादिति ।

एकेवर्णाञ्छाश्वतिकान्नकार्यान् ॥१४॥

एकेआचार्याः अकारादीन्वर्णां छाश्वतिकान् नित्यान्नकार्यान्नकर्त्तव्यान्मन्यंते ।

आहुर्घोषंघोषवतामकारमेके नुस्वारमनुनासिकानां ॥ १५ ॥

घोषवतां वर्णानामकारं घोषमाहुरेकेआचार्याः । किमुक्तंभवति । घोषवत्स्वकारः स्वस्थानादागत्य घोषवत्वं जनयतीति । गजडदब यरलवहइति । तथाते एवाचार्याः अनुनासिकानांवर्णानामनुस्वारं घोषमाहुः । किमुक्तंभवति । अनुस्वारः स्वस्थानादागत्य घोषवत्वंजनयतीति । ङञणनमइति ।

सोष्मतांच सोष्मणा मूष्मणाहुः सस्थानेन ॥ १६ ॥

सोष्मणांवर्णानां सोष्मत्वंस्वस्थानेनोष्मणाप्राहुः । खकारस्यष्कइत्येतेन । छकारस्यशइत्येतेन ठकारस्यषइत्येतेन । थकारस्यसइत्येतेन । फकारस्यप्फइत्येतेन ।

घोषिणां घोषिणैव ॥ १७ ॥

घोषिणांसोष्मणां घोषिणैवोष्मणा । हकारेणेत्यर्थः । सोष्मतामाहुः । घझढधभइति ।

अचोत्पन्नांवपरे ऊष्मघोषौ ॥१८॥

अत्रैव सोष्मसुघोषवत्सु चोपपद्येते ऊष्मघोषौ इत्यपरेआचार्याआहुः । यदुक्तमकारो घोषवतांघोषवत्वं जनयतीति । अनुस्वारोनुनासिकानामिति सोष्मणांचोष्मासोष्मत्वमिति । तन्नस्पष्टं लक्ष्यते । कस्मात् । एवमुच्यमानेसति वर्णानामनित्यत्वं प्रसज्येत । नित्यास्ववर्णाःकूटस्था स्वाविचालिनः ।

शीघ्रतरं सोष्मसुप्राणमेके ॥ १९ ॥

सोष्मसु द्वितीयचतुर्थेषु शीघ्रतरंप्राणमेके आचार्यामन्यंते । सर्वेषुवर्णेषु स्थानकरणानुप्रदानानि त्रयोगुणाःसमानाः सोष्मसूष्मागुणोऽधिकः । तत्रगुणवहुत्वान्मात्राकालेनशैघ्राहुतेन शक्यमुच्चारयितुमिति तेषुशीघ्रतरं प्राणंमन्यंते । पदकारेणाप्युक्तम् । प्रथमद्वितीयाःश्वासानुप्रदाना अघोषाएके अल्पप्राणा अपरेमहाप्राणास्तृतीयचतुर्थानादानुप्रदाना घोषवंत एके अपरेमहाप्राणा इति । सोष्मसुद्वितीयाप्राणं विदधत् एतमेवार्थमिति ।

रक्तोवचनो मुखनासिकाभ्यां ॥२०॥

मुखेन नासिकयाच यदुच्यते सरक्तोवेदितव्यः । ऊअणानमदूति । सचाँइंद्रः । अश्वाँअस्माँइत् । अभीशूँरिव । नॄँः प्रणेत्रं । किमर्थमिदमुच्यते । ननु रक्तसंज्ञोनुनासिक इत्येवसिद्धं । सत्यं । नहिसंज्ञाक्रियते किंतर्हि । तत्रानुक्तं मुखनासिकावचनत्वं रक्तस्यविधीयते । एवमर्थमिदमुच्यते ।

एतद्वर्णात्मगुणशास्त्रमाहुः ॥२१॥

एतद्वायुः प्राणइत्येवमादियदनुक्रांतं तत्वर्णानां आत्मगुणशासनं वेदितव्यं । एतावंतो वर्णात्मगुणाः । श्वासता । नादता । उभयता । स्पृष्टता । दुस्पृष्टता । अस्पृष्टता । कंठबिलस्यविवृतता । अघोषता । घोषता । सोष्मता । अनुनासिकतेति ।

नपुंसकं यदूष्मांतं तस्य बह्वभिधानजः । अनुस्वारो दीर्घपूर्वः सिष्यंतेषु पदेषु सः ॥ २२ ॥

नपुंसकलिंगं यच्छब्दस्वरूपं ऊष्मांतं तस्य नपुंसकलिंगस्य बह्वभिधानजः बहुवचनोत्पन्न इत्यर्थः । दीर्घपूर्वोनकारजन्यः पदमध्ये अनुस्वारोवेदितव्यः । सि । षि । इत्येवमंतेषु पदेषु सअनुस्वारोद्रष्टव्यः । भासाँसिवस्ते सूर्योनशुक्रः । अयूंषीव सूर्येसंचरंति । आदे-

व्यावृणीमहे वाँसि । व्य१र्यंहूंस्तनुहि अश्वांसि । तपूंषि तस्मै वृजिनानि संतु । वपूंषि जाता मिथुनासचेते । आयस्मिन्मनाह्वींष्यग्नौ । किमर्थमनुस्वारस्य दीर्घपूर्वस्य पदमध्ये वर्त्तमानस्यबहुभिः श्लोकैर्लक्षणं क्रियते । अनुपाठादेव सिद्धं यथान्येषां वर्णानां । सत्यं । किंतु दुराम्नाननिवृत्त्यर्थं अनयोः शिक्षापटलयोर्बहूनांवर्णानां लक्षणंक्रियते । यथासमापाद्यान्युत्तरे षट्पकारे । शुनः शेपो निष्षपी शाश्मिनिष्षालविक्रमान् । एयैरित्येकार मकारमाहु रित्येवमादीनि । कथंपुनर्दुराम्नानप्रसंगः संतिहि । तीर्थोषिताः अलसाः अगुणदोषज्ञाः अन्योन्याध्यापकाः । सर्ववर्णान्यत्वजनयितारस्तद्दोषनिवृत्त्यर्थं आचार्येणशिष्यहितार्थमिदमारब्धं । अनुस्वारस्यस्थाने तावत्ङकारं जनयंति तस्मात् ङकारात्परंककारमंतःपातं जनयंति । हवींषि । सर्पींषि । भासांसि । अवांसीत्येवं तन्निवृत्त्यर्थं मनुस्वारलक्षणंक्रियते । यद्येवंपदांतेप्यनुस्वारस्य तद्वर्णं तुल्यम् । त्वांहत्यदिंद्रार्णसातौ । तांसुतकीर्तिं मघवन् । तस्मादत्रापि यत्नःकर्त्तव्यः । नकर्तव्यः । रेफोष्मणो वृदययो मकारोनुस्वारमिति विहितमनुस्वारं जानात्यसौ । तत्रपदमध्ये अनुस्वारलक्षणं नास्ति येनानुस्वारं जानीयात् एवंसति किमर्थंदीर्घपूर्वोगृह्यते । नह्रस्वपूर्वः । आविंशत्या त्रिंशता । अंसेषुव इत्युभयत्रापिहि ङकारस्यवर्णं तुल्यं । तत्रतावदाहुः दीर्घस्ययथाव्यक्तङकारश्रुति र्नंतथाह्रस्वपूर्वस्य । तस्मान्नगृह्यते । अपरेत्वाहु रनुस्वारस्योपधां ह्रस्वांकेचित्द्राघयंत इवपठंति । त-

न्निहत्यर्थं दीर्घपूर्वः परिगृह्यते । एतावान्ह्यनुस्वारो दीर्घादित्येवमंतः ।

सः सासौ सं पदांतेभ्यः पूर्वोनाम्युपधस्तथा । यकारोवा वकारोवा पुरस्ताच्चेदसंधिजः ॥२३॥

सः । सा । सौ । सं । इत्येतेभ्यःपदांतेभ्यः पूर्वोनुस्वारः अनाम्युपधः अकाराकारोपधः । तथा । कथं । यथासिध्यंतेषु दीर्घपूर्व एवमिहापि दीर्घपूर्वोवेदितव्यः । असंधिजः यकारोवावकारोवा यदितस्माद्वर्णात्पूर्वोभवति । सः । साह्वांसोदभ्युं । सा । शुश्रुवांसाचित् । सौ । विद्वाँसौ । इत् । इरः । सं । श्रेयाँसंदधं । वाब्ध्वाँसंचित् । यकारोवावकारोवा पुरस्ताच्चेदसंधिज इति कस्मात् । योव्यंसं ।

जिघांसन् पांसुरे मांसं पुमांसं पौंस्यमित्यपि । पदेष्वेवं प्रवादेषु ॥ २४ ॥

जिघांसन् । पांसुरे । मांसं । पुमांमं । पौंस्यं । इत्येतेषुच पदप्रवादेष्वनुस्वारः दीर्घपूर्वोवेदितव्यः । द्रुहञ्जिघाँसंध्वरसं । यत्स्तोतारंजिघांससि सखायं । समूळ्हमस्यपांसुरे । मांसमेकःपिंशति । येचार्वतोमांसभिक्षां । पुमाँसंपुत्रमाधेहि । स्तुषेतदस्यपौंस्यम् । चकृषितानिपौंस्य ।

नामकार उपोत्तमे ॥ २५ ॥

जिघांसादीना मुपोत्तमप्रवादे अमकारेसति अनुस्वारोदीर्घपूर्वो नभवति । किंतुह्रस्वपूर्व एव भवति । पुंसःपुंश्चाउतविश्वापुषंरयिं ।

प्रश्लिष्टादभि निहितात् ॥२६॥

प्रश्लिष्टादेकीभावात् अभिनिहिताच्च परमनुस्वारः परे ह्रस्वपूर्वः सन् संहितायां दीर्घपूर्वोभवति । प्रश्लिष्टात् । आभूतांशः । अभिनिहितात् । भरेष्विंद्रं सुहवंहवामहेंहोमुचं ।

माँस्त्वे याँस मित्यपि ॥ २७ ॥

माँस्त्वे । अयाँसं । इत्येतयोश्चानुस्वारो दीर्घपूर्वो वेदितव्यः । माँस्त्वेवापृथने वावधन्ते । अयाँसमग्ने सुक्षितिं । अयंयोगोऽनर्थकः कथं माँस्त्वेति नात्र मनुस्वारः । किंतर्ह्यादिस्वरस्योत्तरेषां परेपीति । अनुनासिकः स्वरः । अयासमिति सः सा सौ सं पदांतेष्वित्येवसिद्धं । नानर्थकः शाखांतरे किलमांस्त्वेसा नुस्वारं पठंति तत्प्रदर्श्यंते । यद्येवं मांस्पचन्न्या इतिच निपातयितव्यं । नैतदस्ति प्रयोजनं जिघांसन्यांसुरेमांस मिति मांसप्रवादत्वात्सिद्धं । अयांसमित्येतस्य निपातने प्रयोजनं मृग्यंउदाहरणं ।

एतावान्त्वनुस्वारो दीर्घात्॥२८॥

नपुंसकं यदुष्मांत मित्येवमादिर्योयमनुस्वारो ऽनु-

कालः एतावानेव वसुपदमध्ये दीर्घात्परो वेदितव्यः । अत्रैवोदाहृतः ।

हुतरथेतरः ॥ २९ ॥

हुतरथाकायशब्दाद्दीर्घपूर्वाद्विषयात्मन्यत्र वसुपदमध्ये रेफोष्मपरः हुतरःकतरः ह्रस्वपूर्वोऽनुस्वारो वेदितव्यः । अंह.विंशत्या । पंसिषु । असंदिग्धान्स्वरानिति । उक्तःश्लोकार्थः स्वरपटले । अत्रापि तथैवव्याख्यातव्यः ।

समापाद्यान्युत्तरेषट्पकारे राधोरथोग्नादिवीजाऋतस्य । अंजःपादुः प्रतिचपूर्वं पद्यावनिंगयन् विक्रममेषु कुर्यात् ॥ ३० ॥

समापाद्यानि षट्पदानि षकारे उत्तरे । राधः रथः ग्नाः दिवः जाः ऋतः इत्येतानि । अंजः । पा । दुःप्र इत्येतौ चपूर्वपदौ विक्रममेतेषु कुर्यात् । अवनिंगयन् अवग्रहमकुर्वन् विक्रमंकुर्यादिति । विक्रमंउपाचारमपनीयविसर्जनीयमेषु कुर्यात् । त्वंगिराधस्पते । राधःपते । एषतेदेवनेतारथस्पतिः । रथःपतिः । नराशंसोग्नास्पतिर्नः । ग्नाःपतिः । दिवस्पृथिव्योरव आवृणीमहे । दिवःपृथिव्योः । संजास्पत्यं । जाःपत्यं । तववायवृतस्पते । ऋतःपते । यामन्नंजस्पाइवघेत् । अंजःपाः २ इव । दुष्प्राव्योवहंता । दुःप्रऽपव्यः । पूर्वपदौ इतिकिं । इमंमंजस्पामुभये अकृण्वत । अंजस्पामित्य-

त्वावग्रहत्वात् मात्राकालो भवतीति । किमिदं समापाद्यमित्यत आह ।

समापाद्यंनामवदंति षत्वं तथाणत्वं सामवशांश्च संधीन् ।
उपाचारं लक्षणत श्वसिद्धमाचार्या व्यालिशाकल्यगार्ग्याः॥३१॥

समापाद्यं नामषत्वं वदंति । तथाणत्वं । च पुनः सामवशां त्संधीन् । लक्षणातः सिद्धमुपाचार मपि तथावदंति केते । आचार्या व्यालिशाकल्यगार्ग्याः । सुषुमायातं । तदा रभंःस्वदुर्हणो । मक्षूमक्षूकृणुहि । त्वंहिराध्यते ।

ह्रस्वामर्द्धस्वरभक्त्या समामा मनुस्वारस्योपधामाहुरेके । अनुस्वारं तावतैवाधिकं च ह्रस्वोपधं ॥ ३२ ॥

ह्रस्वां अनुस्वारोपधां अर्द्धस्वरभक्त्या असमाप्तां पादमात्रया अर्द्धपादमात्रयावान्यूनां आहुरेके आचार्या अनुस्वारंच तावताकालेनाधिकं ह्रस्वोपधं । त्वंराजेंद्रयेव । त्वंह्यत् ।

दीर्घपूर्वं तदूनं ॥ ३३ ॥

दीर्घपूर्वमनुस्वारं तथैवार्द्धस्वरभक्त्या न्यूनमाहुः । दीर्घामुपधां तावताधिकां च । गवांशता । तांसुतेकीर्तिम् ।

रेफोस्त्यृकारेच परस्यचार्द्धे पूर्वेऽह्रस्वीयांस्तु नवेतरस्मात् । मध्येसः ॥ ३४ ॥

ऋकारेरेफो विद्यते । परस्यऋकारस्यच पूर्वेऽर्द्धे रेफोविद्यते । ह्रस्वीयांस्तु ह्रस्वतरः सरेफः । इतरस्मादृकाररेफादल्पतरः । नवाह्रसीयान् । समएववा । मध्येसः । सरेफस्तस्यऋवर्णस्यमध्ये द्रष्टव्यः । नादौ । नांत्ये । ऋऋ ।

तस्यैवलकारभावे धातौस्वरः कल्पयता लृकारः ॥ ३५ ॥

तस्यऋवर्णस्यस्थानेरेफस्यलकारभावे यदासरेफो लकारमापद्यते तदालृकारोभवति स्वरसंज्ञश्च भवति । कल्पयतावेवधातौ नान्यत्र । चाक्लृप्रेतेन ऋषयोमनुष्याः इत्यत्रस्वरात्ककारस्य द्विर्वचनं नभवति । असंयोगादित्वात् । पकारस्यच द्वित्वंभवति स्वरोपधत्वात् ।

अनंतस्थं तमनुस्वार माहुः ॥ ३६ ॥

योसौ पुरस्तादविशेषेणानुक्रांतो नुस्वारःएतावाननुस्वारोदीर्घादिति । तमनुस्वारं अनंतस्थपद मध्यवर्तमानमाहुराचार्याः । किमर्थमिद मुच्यते । नपुंसकं यदूष्मांतमित्येवमाद्यनुक्रमेणैवसिद्धं । सत्यं । किंतु

एतावान्ह्यनुस्वारो दीर्घादितिनियमविधिः प्रसज्येत । तन्निवृत्त्यर्थमुच्यते । संतिह्यन्येपि दीर्घात्पदांताः । त्वांहि । त्वांराजानं । तांसुतेकीर्तिं ।

व्यालि र्नासिक्य मनुनासिकं वा॥३७॥

व्यालिराचार्यः सर्वमनुस्वारं नासिकास्थानं मुखनासिकास्थानं वा मन्यते । त्वंराजा । त्वाँराजानं । अँसेषुवः । हवीँषि । त्वंराजेन्द्रं । त्वांराजानं । अंसेषुव हवींषि । अनुस्वारस्यपूर्वोक्तमपि नासिकास्थानं मुखनासिक्यविधिस्तथापुनरुच्यते ।

संध्यानिसंध्यक्षराण्याहुरेके द्विस्थानतैतेषु तथोभयेषु ॥ ३८ ॥

संध्यानिसंधितव्यानि संधितानिवासंध्यक्षराण्याहुरेके आचार्याः । यथाऽन्या न्यक्षराणि स्वयमुत्पन्नानि नतथेमानि । कथमेतदध्यवसीयते यतोद्विस्थानता कंठतालुस्थानता । कंठोष्ठस्थानताच । तथाह्युच्यते । उभयेषु संध्यक्षरेषु कंठतालव्ययोः कंठोष्ठयोश्च । एओऐऔ इति । यद्धिसंध्यानि द्वयोर्वर्णयोः संधिजानिभवंति ।

संध्येष्वकारोर्द्धमिकार उत्तरं युजोरुकार इति. शाकटायनः ॥ ३९ ॥

संध्येषु संध्यक्षरेषुसत्सुअकारः पूर्वार्द्धंभवति । इकारमुत्तरार्द्धं प्रथमतृतीययो र्भवति । युजोर्द्वितीयच-

र्थयोः उकारमुत्तरार्धं भवति एवं शाकटायनाचार्यो मन्यते । अइ । ए । अउ । ओ अइ । ऐ । अउ । औ । इति । यद्येवमेकारैकारयोरोकारौकारयोर्वा कथं श्रुतिविशेषः ।

मात्रासंसर्गादवरेपृथक्श्रुती ॥४०॥

अवरेपूर्वे । एओइत्येते मात्रासंसर्गात् । मात्रयोः समयोः क्षीरोदकवत् नज्ञायते क्वावर्णमात्रा क्वेवर्णोवर्णयो रिति तस्मात्संध्यक्षरे अपृथक्श्रुतीभवतः । किमिदमपृथक्श्रुतीइति । एओ इत्येतयोरिवर्णोवर्णयोः पृथक्श्रवणं नविद्यते । क्षीरोदकवत्संप्रयुक्तत्वात् । एवंश्रुतिविशेषः । अस्यैवापरायोजना । मात्रासंसर्गादवरेऽपृथक्श्रुती । मात्रयोः क्षीरोदकवत्संप्रयुक्तत्वान्नज्ञायते तस्मादवरे संध्यक्षरे एओ इत्येते पृथक्श्रुती भवतः । ऐऔकाराभ्यामेकारओकारौ पृथक्श्रूयेते इत्यर्थः । एवंश्रुतिविशेषोभवति ।

ह्रस्वानुस्वारव्यतिषंगवत्परे ॥४१॥

परेसंध्यक्षरे ऐऔइत्येतौ ह्रस्वानुस्वारयोर्योव्यतिषंगोऽनुक्रान्तः ह्रस्वामर्धस्वरभक्त्यासमाप्तामिति तद्व्यतिषंगो वेदितव्यः । ऐऔकिंयुक्तंभवति । यथा तत्रह्रस्वरनुस्वारः पादमात्राधिक उपधाचतावतान्यूना । एवमिहापि द्रष्टव्यं । इवर्णोवर्णयो र्भूयसीमात्रा । अल्पीयसीअवर्णस्य यस्मात्तयोर्वैषम्यान्नक्षीरोदकवत्संसर्गोभवति । तस्मात्तयोरवर्णस्य इवर्णोवर्णयोश्च पृथक्श्रवणं भवति ऐऔ इति ।

शिखीभूते नकुलस्त्वर्द्धमात्रिकमिति वापाठः । गतार्थमेतत् क्षेपकम् ॥ ४९ ॥

इति श्रीपार्षदव्याख्याया मानंदपुरवास्तव्यवज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये शिक्षापटलं त्रयोदशम् ।

समुद्दिष्टावर्णगुणाः पुरस्तान्निर्दिष्टानां सांहितो यस्य धर्मः ।
तदायापायव्यथनानि दोषास्तान्व्याख्यास्यामीत निदर्शनाय॥१॥

पुरस्तान्निर्दिष्टानां वर्णानां वर्णगुणाः समुद्दिष्टाः सांहितोयस्यधर्मः समुद्दिष्टोऽनुक्रांतेषु पटलेषु तदायापायव्यथमानि । तेषां वर्णानां आयोऽपायः व्यथनमिति । एतेदोषाः प्रादुर्भवंति । आयोनामासतोवर्णस्योपजनः । यथाह्वयामीत्यत्र पुरस्तादनुवादः । अपायोनामसतोपकर्षः यथा अनयोरित्यनयोरित्येतस्य व्यथनंनामसतोन्यथाश्रवणं । यथारथ्याद्वत्यत्र वकारस्यस-

कारणञ्चणं दोषानुत्तरत्वदर्शनार्थं विस्तरेणासौ पमुत्रेति अनुक्रामंतोव्याख्यास्याम: ।

निरस्तं स्थानकरणापकर्षे ॥ २ ॥

निरस्तंनाम दोषउत्पद्यते स्थानकरणयो रपकर्षेण । ननु स्थानकरणयो रपकर्षोनोपपद्यते । कथं । स्थानकरणाभ्यांहि वर्णोपपकृष्यते । नैषदोष: । यथास्थान। करणाभ्यां वर्णोऽपकृष्टोभवति तथावर्णादपि स्थानकरणेपपकृष्टे भवत: । तस्मात्सदोष: परिहर्तव्य: ।

विहारसंहारयो र्व्यासपीडने ॥३॥

विहारोविहरणं विस्तार: । संहार:संहरणं । अन्यथाकरणं संकोचनं वा । कस्यस्थानकरणयो विहारे व्यासोनामदोषो जायते । संहारेपीडनं च । व्यासोऽविवेक: । पीडनंद्विर्भाव: तावपि परिहर्त्तव्यौ ।

ओष्ठाभ्यामंबूकृतमाहनद्धंदष्टं ॥ ४ ॥

ओष्ठाभ्यांनद्धं । बद्धमित्यर्थ: । यदाहवक्ता तद्दुष्टं अंबूकृतमित्युच्यते । तदपिवर्ज्यम् ।

मुखेनसुषिरेणाघूनं ॥ ५ ॥

सुषिरेणाविलंबितेन मुखेनवक्ता यदाहतद्दुष्टं घूनंवेदितव्यं ।

संदष्टंतु पीडन आहहन्वो: ॥६॥

अन्योन्येन व्यंजनानां विरागः ॥१६॥

व्यंजनानां अन्योन्येनसह विरागः क्रियते सदोषः यथा । उपमाषड्द्वाद्वेत्यत्र उकारात्परस्य दकारस्य विरागः क्रियते अज्ञाद्भिः ।

श्लेषेणवावचनं पीडनं वा ॥१७॥

श्लेषेणवाव्यंजनानांवचनं क्रियते पीडनंवा । श्लेषेण-प्रयत्नशैथिल्येन । पीडनमतिप्रयत्नःतावुभौदोषौसर्वेषुवर्जयेत् ॥

घोषवतामनुनादःपुरस्तात्पदादिस्थानांक्रियतेधारणं वा ॥१८॥

पदादिस्थानांघोषवतां पुरस्तादनुनादःध्वनिःक्रियते अथवा तेषांघोषवतां धारणंनामानुपलब्धिः । यथाह्वयामीत्यत्र पुरस्तादधिकःशब्दःक्रियते अथवा तस्यदोषस्यपरिहरणार्थं हकारस्यानुपलब्धिःक्रियते । अपरेधारणं द्विर्वचनंमन्यंते । ज्योतिष्कृत् । द्यावा । द्वादश ।

सोष्मोष्मणामनुनादोप्यनादः ॥१९॥

सोष्मणामूष्मणामपि पुरस्तात्पदादिस्थानात् अनादोऽशब्दः । अनुनादश्च क्रियते । यथा अभिऽख्याय । छायामिव । श्चोतंति । स्तौति ।

लोमश्यंच क्ष्वेडनमूष्मणां तु ॥२०॥

ऊष्मणांत्व घोषाणांलोमश्यंचक्ष्वेडनंच दोषौभवतः ।

लोमश्यंनामासौ कुमार्गे । क्ष्वेडनं नामा(१)विवेकोवर्णस्य स्वरूपोध्वनिः ।

वर्गेषुजिह्वाप्रथमं चतुर्षु ॥ २१॥

आद्येषुचतुर्षु वर्गेषुजिह्वाप्रथनंक्रियते सदोषः । जिह्वाप्रथनंनामविस्तारः ।

ग्रासोमुख्ये ॥ २२ ॥

एतेषांवर्गाणां मुख्ये आद्येवर्गे ग्रासोनामदोषो भवति । सव्याख्यातः ।

प्रतिहारश्चतुर्थे ॥ २३ ॥

एतेषामेव चतुर्थेवर्गे प्रतिहारनामदोषो भवति पतिप्रबलः प्रतिहारः ।

सरेफयोर्मध्यमयोर्निरासः ॥ २४ ॥

सहरेफेणवर्त्तेते इति सरेफौ एतेषांचतुर्णांवर्गाणां यौमध्यमौवर्गौ तयोश्चरेफस्य च निरासो नामदोषो भवति सव्याख्यातः ।

विक्लेशस्थाने सकलेचतुर्थे ॥ २५ ॥

चतुर्थेवर्गेस्थाने सकले सहकलाभिः सकलं कलावयवाः केतेकारणादयः तेषुकारणादिषु स्थानेचविक्लेशो नामदोषो भवति । विक्लेशो अवैशद्यमित्येकोर्थः ।

---

(१) अविवेकः वर्णस्य अस्वरूपोध्वनिः । पुरस्तादुदाहृतमिति वृत्तिः ।

अतिस्पर्शोबर्बरताचरेफे ॥ २६ ॥

दुस्पृष्टोरेफः सातिस्पृश्यते बर्बरताचोच्यते तौदोषौरेफस्यवर्जयेत् । बर्बरताप्यसौकुमार्यमेव ।

जिह्वान्ताभ्याञ्चवचनंलकारे ॥२७॥

जिह्वाग्रेणवक्तव्यः सलकारः यदाजिह्वायाः अंताग्राभ्यामुच्यते तदासदोषोभवति । पूर्वोक्तौचातिस्पर्शबर्बरौवयोदोषालकारस्यभवंति तान्वर्जयेन्मेधावी ।

श्वासोऽघोषनिभतावाहकारे ॥२८॥

श्वासोवा अधिकः अघोषसदृशत्वं च हकारस्यदोषौलक्षयेत् ।

निरासोन्येषूष्मसुपीडनंवा ॥२९॥

येन्येहकारादूष्माणस्तेषु शकारादिषुनिरासः पीडनंवेतिद्वौदोषौभवत स्तौव्याख्यातौ ।

स्वरात्परं पूर्वसस्थानमाहुर्दीर्घा-
न्निरस्तंतु विसर्जनीयं ॥ ३० ॥

दीर्घात्स्वरात्परं विसर्जनीयं पूर्वस्यसस्थानं निरस्तमाहुः उक्तः सदोषः । रथीः । वधूः । अग्नेः । वायोः । दीर्घादिति किं उच्यते । ननुह्रस्वादपिविसर्जनीयः पूर्वसस्थानएवश्रूयते । अग्निः वायुः इति । यद्यपिश्रवणं तुल्यं ततोप्याचार्येण दीर्घग्रहणं कृतं तस्माद्दीर्घादेवपूर्वसस्थानत्वं भवतीति नह्रस्वादपिभवतीति मंतव्यं ।

अपरेपुनरन्यथावर्णयंति अन्यस्थानेदीर्घात्स्वरात्परो विसर्जनीयोदेवै रपि नशक्यते उच्चारयितुमितिविधिं वर्णयंति । दीर्घात्स्वरात्परं पूर्वसस्थानमाहुराचार्या इच्छंतीत्यर्थः । तस्मिन्नपिपक्षे दीर्घग्रहणमनर्थकं ह्रस्वादपितथैवेच्छंति । एवंतर्हि परस्ययोगस्यार्थे दीर्घग्रहणं वृत्तवशेनेहपठितं द्रष्टव्यं । स्वरात्परं पूर्वसस्थानमाहुर्निरुक्तं विसर्जनीयमस्मिन्योगे सत्युभयोरपिपक्षयोः अग्निः वायुः रथीः वधूः इतिसर्वंसिद्धंभवति । किं पुनरत्रयुक्तं । उभयं । कथं । शास्त्रांतरेविधिर्दृश्यते । कंठ्यस्थानौ हकारविसर्जनीयौ उभयस्वरादिसंस्थानोविसर्जनीयइति तेषां विसर्जनीयः पूर्वसस्थानो भवतीति । तस्मात्तदपियुक्तम् । इहदोषसमुच्चय प्रकरणे वचनाद्दोषः सइतिनिश्चयः । कथमेतदध्यवसीयते । आचार्यप्रवृत्ति दृश्यते । यथाअनुनासिकपरादूष्मणः परसस्थानयमागमो भवत्येकेषां । यथाअश्नोविष्णुरिति । तदिहास्माकं प्रतिषिद्धं परं यमंरक्तं परादघोषादिति तस्मादेतदध्यवसीयते ।

कण्ठ्याद्यथारेफवत स्तथाहुः ॥२१॥

दीर्घात्कंठ्यात्परं विसर्जनीयं यथारेफवतऋकारात्परं जिह्वामूलीयं तथानिरस्तमाहुः सदोषः । देवाः मातॄः । दीर्घादिति कस्मात् । देवः सोमः । ह्रस्वात्कंठ्यात्परोविसर्जनीयो ह्रस्वसस्थान एव भवति ।

रक्तात्तुनासिक्यमपी तरस्मात् ॥२२॥

रक्तात्कंठग्राह्यघोषात्परं विसर्जनीयं द्रुतरक्तादपिपरं । वातरक्तात् ऋकारान्नासिक्यमाहुः सदोषः । स्वतवाँः पायुः । नॄँः पतिभ्यः ।

संयोगादेरूष्मणः पूर्वमाहुर्विसर्जनीयमधिकं स्वरोपधात् ॥३३॥

स्वरोपधात्संयोगादेरूष्मणः पूर्वमधिकं विसर्जनीयमाहुः सदोषः । पावकतेस्तोकाश्चोतंति । यभिष्ट्याम । संयोगादेरितिकिं । द्विपदेशं चतुष्पदे । मोषुणः । परिसोमः । ऊष्मणइतिकिं तवत्यत् । स्वरोपधादितिकिं । आस्वग्ने ।

परँयमं रक्तपरादघोषात् ॥ ३४ ॥

ऊष्मणोऽघोषा द्रक्तपरात्परँयमं आहुः सदोषः । पृश्निः विष्णुः । स्नात्वा ।

ऊष्माणंवाघोषिण स्तत्प्रयत्नं ॥३५॥

घोषिणऊष्मणो रक्तपरात्परं घोषिणं पूर्वतुल्यप्रयत्नं ऊष्माणंयमंवाऽऽहुः सदोषः तंवर्जयेत् बुधः । ब्रह्म । वन्हा २ ।

शुनश्शेपो निष्षपीशोऽस्मिन्निष्षालविक्रमान्ब्रह्मविष्णुस्मपृश्निनः ॥३६॥

एतेष्वविक्रमाभवंति । एतेषुविक्रमोविसर्जनीयः सदोषोवर्ज्यः । शुनश्शेपो यमह्वद्गृभीतः । मानोम-

घेवनिष्षपीपराद्गाः । प्रपाकंशास्मि प्रदिशोविदुष्टरः । प्रनांशरद्ग नृषभोननिष्षाल । यभौ २ दमेकमेको पस्मिन्निष्षालभौ । ब्रह्मचते जातवेदो नमस्व । इदं विष्णुर्विचक्रमे । कूटंस्मतृंहदभिमातिमेति । आयंगौः पृश्निरक्रमीत् ।

स्पर्शोष्मसंधीन् स्पर्शरेफसंधीनभिप्रायांश्च परिपातयंति ॥३७॥

चरतिचक्रे इत्येवमादीन् स्पर्शोष्मसंधीन् ईकारोकारोपहितोद्गति च स्पर्शरेफसंधीन् विहृत्यभिप्रायेषु चेत्यभिप्रायांश्च परिपातयंति । एतेषुषनुस्वारंकुर्वंतोत्वर्थः । सदोषः । ताँस्तेषद्याम । रक्षांरिव । पीवोऽन्नाँरयिवृधः ।

स्वरौकुर्वंत्योष्ठनिभौसरेफौतिस्रोमातॄस्त्रीन्पितॄन्यन्नृभिर्नॄन् ॥३८॥

सरेफौ ऋॠइत्येतावोष्ठनिभौ उदयांसदृशौकुर्वंति सदोषः । तिस्रोमातॄस्त्रीन्पितॄन् । कार्हिस्वित्तदिंद्रयन्नृभिर्नॄन् ।

दंत्यान्सकारोपनिभानघोषा न्व्यघ्यः पृथ्वीपृथिवीत्वापृथीति ॥३९॥

दंत्यानघोषान्सकारोपनिभान् सकारसदृशान् कु-

र्वन्तिसदोषः। रथ्यः। पृथ्वी। पृथिवी । त्वा। पृथ्वी । इत्येवमादिषु । असर्जिरथ्योयथा । उर्वी पृथ्वीबहुले दूरेअंते। दूरंविचायंते । पृथिवीत्वेति त्वा ग्रहणं विशेषणार्थं पृथग्ग्रहणंवेति। कुतः संदेहः। प्रायेणथकारे सकारोपनिभोदोषः सलक्ष्यते न तकारइति विशेषणार्थं मेकेमन्यंते । अपरेथकारस्यैव सदोषः स्यात् । कथं थकारं सकारोपनिभमितिलघीयसासिद्धे यद्धन्यग्रहणंकरोति तेनपृथग्ग्रहणंमन्यंते । अदितिः सिंधुः पृथिवीउतद्यौः । यत्वासूर्यंस्वर्भानुः । पृथीयद्वांवैन्यः सादनेषु।

ऊष्मांतस्थाप्रत्ययं रेफपूर्वं ह्रस्वं लुंपंत्याहु रथाप्यसंतम्। पुरुषंतिं पुरुवारार्यमाष्ट्रांहरियोजनायहरियूपीयायां॥ ४०॥

ऊष्मप्रत्ययमंतस्थाप्रत्ययंचरेफपूर्वं ह्रस्वंलुंपंति। नाशयंति। अथवा असंतमविद्यमानं ह्रस्वरेफात्परमाहु कत्यादयंति तौदोषौवर्जयेत् । एतेषु पुरुषंतिमित्यादिषु षट्सु। याभिर्ध्वसंतिं पुरुषंतिमावतं। महोरायः पुरुवारप्रयंधि । पुरुवीराभि र्वृषभक्षितीनां । अर्यमायातयज्जनः। आष्ट्रांपदं कृणुते अग्निधाने। अतक्षद्ब्रह्महरियोजनाय । शचीवतोयद्धरियूपीयायां। अर्यमा आष्ट्रामित्येतयोरसंतमाहुरन्येषुलुंपंति।

रेयेरित्येकारमकारमाहु वैय-

श्वेचक्रामयंतो यकारं ॥ ४१ ॥

ऐयैरित्यत्रवैयश्वेचऐकारस्थाने अकारमाहुः परंयकारंक्रामयंतः तौदोषौ । हृणीयमानो अपहिमदैयेः । वैयश्वस्यश्रुतंनरा ।

तदेवान्येषु विपरीतमाहु स्तैरश्यावर्श्यं हृदय्ययेति च ॥ ४२ ॥

तद्दोषद्वयमन्यपदेषु विपरीतमाहुः कथं अकारस्थाने ऐकारमाहुः परं यकारमक्रामयंतः तौदोषौ । तैरश्या । वर्श्यं । हृदय्यया । इत्येवमादिषु । तैरश्यासंहृजंतुनः । परिप्रयंतं वय्यसुषंसदम् । अद्यांहृदय्य १ याकृत्या ।

अकारस्यस्थान ऐकारमाहु लुँपंति चसयमौकारमुत्तमं । वह्वक्षरं द्व्यक्षरतां नयंति यथोनयोध्वंनयीत्कोभयौरिति ॥ ४३ ॥

येनसह्ववर्ततद्भातिसयः तंसयमौकारं अकारस्यस्थाने ऐकारमाहुः सयंईकारंलुंपंतिच किस्वान्यत् बह्वक्षरं संतंद्व्यक्षरतां नयंति एतेनयश्चत्वारोवादोषाभवन्ति । ऊनयौः ध्वनयीत् । कोभयौः । इत्येवमादिषु । जरितुः काममूनयौः । मात्वाग्निर्ध्वंनयौद्धूमगंधिः । दभकोभयौर्दभवाजिनोदात् ।

तदेवचान्यत्रविपर्ययेण कार्यऐ-

एवे सयमीकारमाहुः । धातोर्विभर्तेर्जयतेर्नियश्चाभैष्मचाजैष्मनैष्टेतिचैषु ॥ ४४ ॥

तद्वेवमेवंवान्यवचान्येषु पदेषु कर्तव्येऐत्वेविपर्ययेण अकारंकृत्वा सयमीकारमक्षरं असंतमाहुः तेतथैवदोषा भवंति । भिजिनीङ्इत्येतेषां धातूनां प्रयोगे अभैष्म । अजैष्म । नैष्ट । इति । अभैष्मापतद्दुच्छुनु । अजैष्माद्यासनामच । दूरंनैष्टपरावतः ।

ड़कारस्यस्थानेळकारमाहुर्ळ्हकारंवाचंद्रनिर्णिक्सुशिल्पे ॥ ४५ ॥

ड़कारस्यस्थाने क्वचिद्ळकारमाहुः । चन्द्रनिर्णिगित्येवमादिषु । क्वचित् ळ्हकारमाहुः सुशिल्पे इत्यादिषु । तौदोषौ लक्षयेत् । अतः सहस्रनिर्णिजा । यतरेववचराचंद्रनिर्णिक् । सुशिल्पे बृहतीमही ।

अनंतरेतद्विपरीतमाहुस्तालव्येशृंगेविभृयाद्विवृताः ॥ ४६ ॥

अनंतरेतालव्येसति ळकारात्पूर्वोवायदिवा तालव्योवर्णोभवति तदातद्विधानं विपरीतमाहुः । यदुक्तं ड़कारस्यस्थानेळकारमाहुः । तदिहळकारस्थाने ड़कारमाहुः । सदोषोज्ञेयः । यथाशृङ्गे शिशीतेशृङ्गे रक्षसेविनिक्षे । यमौयमस्यविभृयाद् जामि । पाथापा-

दित्यारिपवेविचृताः ।

तालुस्थानोव्यञ्जनादुत्तरश्चेदयकारस्तत्रयकारमाहुः । शुनश्शेपः शास्मिववर्जुषीणामत्कोविरप्शीतिनिदर्शनानि ॥ ४७ ॥

यकारादन्यस्तालुस्थानो वर्णोव्यंजनादुत्तरोभवति । तत्राविद्यमानं यकारमाहुः । यथा । शुनश्शेपोयमह्वद्गृभीतः । अपाकंशास्मि प्रदिशो विदुष्टरः । विशांववर्जुषीणां । भाजामिरत्कै अव्यत । विरप्शीगोमतीमही ।

लुंपंति वासंतमेवं यवकारंज्येष्ठाय सम्वारन्नापृच्छ्यमृभ्वा ॥४८॥

अथक्वचिदेवसंतं कथंसंतं । व्यंजनादुत्तरंभंतं यकारंवकारंवालुंपंति । ज्येष्ठाय । सम्वारन् । अर्थवशेनायं पादः । वृत्तवशे ननुरेक्गः समित्यादिः पादः अयंवृत्तवशेन पादैकदेशोद्रष्टव्यः । आपृच्छ्यम् । ऋभ्वा । इत्येतेषु इन्द्रज्येष्ठाय सुक्रतो । सम्वारन्नकिरस्य मघानि । आपृच्छ्यंधरुणं वाज्यर्षति । पुरुहूतोयः पुरुगर्तऋभ्वा ।

व्यस्यंत्यंतमर्हतो व्यायतंत दीर्घायुः सूर्योरुशदीतंऊर्जं ॥४९॥

अर्हतः संयोगस्यांतभूतं अर्हतोदीर्घात्परं अव्यायत-

अपृथग्भूतं रेफेनसक्तामित्यर्थः । तमंतर्व्यस्यंति रेफात्पृथक्कुर्वन्ति । केनचित्स्वरेण व्यवदधतीत्यर्थः । दीर्घायुः । सूर्यः । कथदीर्तें । ऊर्जं । इत्यादिषु । दीर्घायुरस्यायः पतिः । सूर्योनादिवस्पात् । पवमानोकथदीर्घंपयोगोः । इषमूर्जंच पिन्वसे ।

लुंपंत्यंतस्थां क्रमयंतिचैतां स्वरात्त्सस्थानादवरां परांवा । स्वस्तयेधायि भुवनेयमूवुः ॥ ५० ॥

लुंपंत्यंतस्थां अथवा क्रमयंति एतांसंस्थानात्स्वरादवरां पूर्वांपरांवा लोपोद्विर्भावस्त्वेति । तौदोषौपरिहरेत् । स्वस्तये । अधायि । भुवना । इयं । ऊवुः । इत्यादिषु । स्वस्तयेवायुमुपब्रवामहै । उपप्रागात्सुमन्मेधायि मन्म । भुवना । तंसंप्रश्नं भुवनायंत्यन्या । इयंशुष्मेभिर्विसखाइवारुजत् । ऊवुः । इंद्रायार्कंमहिहत्यऊवुः ।

एतांह्रस्वं द्राघयंत्युग्रंऊोकः ॥ ५१ ॥

एतांह्रस्वंदीर्घं कुर्वंति सदोषः । उग्रँ ओकः इति । यथा विश्वदृशानि तविषीव उग्रँओकः । यथाप्रसूतः सवितुः सवायंएव ।

हकारसोष्मोपहिता द्यकारा हकाराद्वा सर्वसोष्मोष्मपूर्वात् । तत्सस्थानं पूर्वमूष्माणामाहुस्तु-

थ्यान्दध्या आपृच्छ्यमृभ्वाह्व-येऽह्युः ॥ ५२ ॥

हकारेणासोष्मभिश्चोपहितात् यकाराद्वकाराद्वा सर्वैरूष्मभिः सोष्मभिश्चोपहितात्पूर्वं तेषांसमानस्थानं ऊष्माणमाहुः । सद्दोषः । तुथ्यान् । दध्याः । आपृच्छ्यं । ऋभ्वा । ह्वये । अह्युः । इत्यादिषु । तुह्यागका-मान्कस्तेसिष्विदानः । पद्मासदध्यायो पघस्यघाता । आपृच्छ्यंधरुणं वाज्यर्षति । पुरुहूतोयः पुरुगूर्त्तऋभ्वा । तद्वदेवाँ उपह्वये । शतचक्रंयो २ ह्योवर्त्तनिः । अश्व्यो वसिष्ठ ऋक्षः ।

पकारवर्गोपहिताच्च रकादन्यं यमं हप्लुताम्नानमौभ्नात् ॥५३॥

पकारवर्गेणोपहिता द्रकादनुनासिकात्पूर्वं अन्यंयममाधिकं आहुः । हप्लुत । आम्नानंऔभ्नात् । इत्यादिषुदोषावर्ज्यः । समुद्रप्लुत ऋभवः । आम्नानंतीर्थं कदूहप्रवोचत् । हह्नान्यौभ्नादुग्रमानतोजः ।

अनुस्वारमुपधांवान्यवर्णां स्वरोपधात्सोष्मयमोदयश्चेत् ॥ तङ्क्षुत्यक्ष्मोजक्षतईक्ष्यंतीः सक्ष्मातरूपोथसक्ष्मानमिन्द्रः ॥५४॥

तत्सस्थानं पूर्वमित्यतः पूर्वमित्यनुवर्त्तते । पकार-

वर्गोपहितात्स्वरक्तादित्यतो रक्तपदमनुवर्तते। स्वरोपधाद्रक्तात्पूर्वमनुस्वारमाहुः। उपधांवाऽन्यवर्णांतौ दोषौपरिहरेत्। रक्तः सः। सोष्मोदयोवायमोदयोवायद्भवति तङ्घ्नन्ति। यघ्नुः। अङ्घ्नः। ईङ्खयंतीः सङ्ख्यातरूपः। सङ्ख्यानमिन्द्रः। इत्यादिषु। नकिष्टङ्घ्नन्त्यन्तितो न दूरात्। गोभिरङ्क्तोमदायकम अनन्यस्तुप्रकृतेरितियमोदयत्वम्। पवमानस्यजङ्घ्नतः। ईङ्खयंती रपस्युवः। सङ्ख्यातरूपश्चिकेतदस्मै। सङ्ख्यानमिन्द्रस्याग्निश्च। एषायोजना येरक्तात्पूर्वमनुस्वारं कुर्वंतियेनकुर्वन्तितेपूर्वग्रहणं निवर्त्यस्वरोपधाद्रक्तात्परमनुस्वारमाहुः। उपधांवान्यवर्णां कुर्वंति इतियोजनाकर्त्तव्या। केचिद्रक्तमेवानुस्वारमाहुः तेरेवंयोगः परिवर्त्तितव्यः। अनुस्वारमुपधांवाऽन्यवर्णां स्वरोपधात्सोष्मयमोदयस्येदिति। अस्मिन्पक्षे स्वरोपधं रक्तमनुस्वारं कुर्वंतीतियोजनकार्या तान्येवोदाहरणानि।

सांतस्यादौ धारयंतः परक्रमं शर्मन्स्यामास्मिन्सुजनाङ्कुधीयतः॥ ५५॥

सांतस्य संयोगस्यादौ रक्तंधारयंतः विलंबमानाः परक्रमंकुर्वंति। शर्मन्स्याम। अस्मिन्सुजनाङ्कुधीयतः इतियथा। शर्मन्स्याममरुतामुपस्थे। अस्मिन्स्वे २ तच्छपूतएनः। संयावप्रस्थे। अपसेवज्जनाङ्कुधीयतश्चित्।

रक्तैरागः समवायेस्वराणां ननू-

नंनृम्णां नृमणान्नृभिर्नॄन् ॥ ५६ ॥

रक्तैः स्वराणां समवाये रागः क्रियते । ननूनं । नृम्णाम् । नृमणा । नृभिर्नॄन् । इत्यादिषु । ननूनमस्तिनोश्वः । नृम्णां तद्वतमश्विना । नृमणा वीरपस्त्यः । बर्हिस्विन्त दिंद्रयन्नृभिर्नॄन् ।

रक्तात्तुसोष्माक्रियते हकारोदध्यङ्हदेवान्हवते महान्हि ॥५७॥

रक्तात्परोहकारः सोष्माक्रियते । दध्यङ्ह । देवान्हवते । महान्हि । इत्यादिषु । दध्यङ्ह मेजनुषं । देवान्हवतऊतये । दक्षसोमहान्हिषः ।

संयोगानां स्वरभक्त्याव्यवायो विक्रमणंक्रमणंवा यथोक्तं । विपर्ययोवाच्यततिलिविलेज्मन्द्रप्सोजुष्प्रन्सार्ज्ञयोष्ट्रां प्रनेष्ट्रात् ॥ ५८ ॥

संयोगानां क्वचिदविद्यमानया स्वरभक्त्याव्यवायः क्रियतेक्वचिद्विक्रमणं । अविक्रमणंनाम द्विर्वचनाभावः । संयोगस्यचमध्ये क्वचित्स्वरमुत्पादयतीत्यर्थः । क्वचिद्यथोक्तं क्रमणंक्रियते । क्वचिद्विपर्ययः । विपर्ययोनाम विद्यमानांस्वरभक्तिं नकुर्वन्तीत्यर्थः । इमेचत्वारो दोषाः संयोगस्यभवन्ति । तान्वर्जयेत् । व्यतद्दत्व-

सविक्रमकं तित्विषी अज्मन्नित्येतयोर्हित्वाभिधानमकृत्वा अनार्योषिता उच्चारयंति । तत्र स्वरभक्त्या व्यवाय एव भवति । दृशे विक्रममेव । अजुष्मन्नित्यत्र षकारात्परं(१) अकारमिव किंचिदुत्पाद्यते । अयथोक्त क्रमथांकुर्वंति । साम्नुयेत्यत्र विपर्ययः । अष्ट्रां । प्रनेष्टादित्येतषु च विक्रममेव । व्यत । शुरोयोयुत्सु तन्वंपरिव्यत । तित्विषे । भद्रे क्षेत्रे निमिता तित्विषे वा । विश्वो वो अज्मन् भयते वनस्पतिः । दासः । दासमस्कंदप्रथमाँ अनुद्यून् । स्वसारः श्यावीमरुषी मजुष्रन् । भरद्वाजान्साम्नुयो अभ्ययष्ट । अष्ट्रांपूषाशिथिरामुद्वरी वृजत् । प्रदेवं । देववीतये । नेष्टासोमं द्रविणोदः पिबऋतुभिः ।

विवृत्तिषु प्रत्ययादे रदर्शनं यथायाऐक्षस्य यऔशिजस्य ॥ ५९ ॥

विवृत्तिषु प्रत्ययादे रदर्शनंलोपः क्रियते सदोषः । यथा । याऐक्षः । इमागावः सरमेयाऐक्षः । कक्षीवंतंयऔशिजः ।

हूउसंधौसंध्यवचनं च कासुचित्सहूदस्ताकस्तउषोयथैते ॥ ६० ॥

हूउहूत्येतयोः संधौकासुचिद्विवृत्तिषु संध्यक्षरवचनं प्रत्ययादर्शनंच क्रियते तौदोषौवर्जयेत् । यथा । सहूदस्ता । सहूदस्तेवप्रतिधाद्दसिष्यन् । सहूद्रुचिवं अभि । कस्तउषः कधप्रिये । तउष्वायरयिमभिप्रतस्थुः ।

---

(१) उकारमिवकिंचिदुत्पद्यते इत्यपिपाठः ।

समानवर्णासु विपर्ययोवा यथाऊतौ इंद्रकआसतश्च ॥ ६१ ॥

समानवर्णासु विवृत्तिषु कासुचिद्विपर्ययः क्रियते। प्रत्ययादेर्वाऽदर्शनं । कोविपर्ययः पूर्वोवर्णः परःक्रियते परश्चपूर्वः सविपर्ययः। तौदोषौलक्षयेत् । ऊतीइंद्र। कआसत इतियथा । यानस्तुत उपवाजेभि ऊतौ-इंद्र। यच्छायो गंताना धमानमूतीइत्या । कआसतो वचसः संति। तथागमंतुतइह।

अभिव्यादानंच विवृत्तिपूर्वे कण्ठ्यताआपोवसाएति दीर्घे ॥ ६२ ॥

विवृत्तिः पूर्वा यस्मात्सविवृत्तिपूर्वः । तस्मिन्विवृत्तिपूर्वे कण्ठ्येदीर्घेप्रत्ययेइति । यच्च सप्तमीनिर्देशोविज्ञायते कआसतइत्येवमादिष्वभिव्यादानमेवस्यात् । सतत्रविपर्यय उक्तः समानवर्णासु विपर्ययोवेति । तस्मात्सप्तमीनिर्देशः कथं । विवृत्तिः पूर्वा यस्मादक्षराद्विवृत्तिपूर्वमक्षरं विवृत्तेः पूर्वमपिविवृत्तिपूर्वं तदुभेकण्ठ्येदीर्घे यदाभवत स्तदा कासुचिद्वृत्तिष्वभिव्यादानंइति । आदानमारंभः विविधंविपुलंविशालंवा दानं अथवाआदानमेवव्यादानं यद्वाकेनचिदभिव्याप्त मभिभूतं व्यादानंयस्य तदिदमभिव्यादानं भवत्यक्षरं। किमुक्तंभवति । आद मात्राविवृत्ति रिह समधिकाक्रियते । तथापरस्यारंभोव्याप्यतइत्यर्थः ।

क्त। ताश्चापः। अवसाया। इत्येवमादिषु। तायापोदेवी रिहमामवंतु। स्वसत्वागृहेभ्य आवसायाविमोचनात्। याश्चापोदिव्याः। तायाचरंति। तेदोषाः। तत्रश्लोकः। अभ्रमध्ये यथाविद्यु दृश्यते मणिसूत्रवत्। एषकूटोविदृत्तीनां यथावालेषुकर्त्तार।

नंदोषाणां स्वरसंयोगजाना मंतोगम्यः संख्ययाथेतरेषां ॥ ६३ ॥

एषांदोषाणां स्वरसंयोगजानां स्वरेषूच्यमानेषु उत्पद्यंते तेषामित्यर्थः। अथेतरेषां स्वरसंयोगजानां संख्यागणनया अंतः पारंगंतुमशक्यं। कस्मात्। उच्चावचाः प्रयोक्तारः नानास्थानकरणानुप्रदानस्वरोच्चारणाः तथा नानाप्रतिस्वरभावशीलसमाचाराः केषु वर्णेषु कान् जनयंतीत्यज्ञानात्।

शक्यस्तुशास्त्रादधि साधुधर्मायुक्तेन कृत्स्नः प्रतिपत्तु मस्मात् ॥ ६४ ॥

अस्माच्छास्त्रादधि वर्णानां कृत्स्नोवर्णधर्मः साधुयुक्तः। साधयताकृत्स्नेनसाधुधर्मयुक्तेनप्रतिपत्तुंशक्यः साधुयुक्तोनाममनो वाग्बुद्धियुक्तः। तत्वार्थशिक्षालक्षणवित्। ऊहापोहवितर्कज्ञः। शास्त्रागमकुशलः। ध्यानपरोऽवितथाध्यवसायी।

अकारस्यकरणावस्थयान्यान्स्वरान्ब्रूयात् । अऋइउ एवमाद्यान्स्वरान्ब्रूयात् ॥ ६५ ॥

तद्विसंपन्नमाहुः । अकारस्यकरणावस्थया अऋइईउऊ इत्येवमाद्यानपिस्वरान्ब्रूयात्तद्विसंपन्नं भवति ।

परानकारोदयवद्विवक्षेत् सर्वंच वर्णानिति संपदेषा ॥ ६६ ॥

परान्ककारादीन्यपि व्यंजनानिव्यंजनसंज्ञकान्वर्णान् अकारोदयवदकारोदयानितिविवक्षेद्वक्तुमिच्छेत् । सर्वंवर्णानित्याहुराचार्याः । ककाकिकीकुकूइति यथा । संपदेषावर्णानां । एषासंपदुभाभ्यांपटलाभ्यांव्याख्याता ।

शास्त्रापवादात्प्रतिपत्तिभेदान्निंदंत्यकस्मेतिच वर्णशिक्षां ॥ ६७ ॥

शास्त्राणामपवादाद्दोषाः संति । पुनरुक्तता अविस्पष्टतार्था कष्टशब्दतार्था अशक्यार्थतेति । एवमादयः । तेष्वशक्यादिषुदोषेषु अस्मिंछास्त्रे संहितमप्येकमक्षरं यथोच्चारयितुं नशक्यं अस्माच्छास्त्रादपवादात् । प्रतिपत्तिभेदात् । प्रतिपत्तिभेदाच्च निंदंत्यकस्मात्स्मेतिच वर्णशिक्षां । किमिति । अकस्मात्स्मेत्यप्रयोजनेत्यर्थः । प्रतिपत्तिभेदोनाम आहुर्घोषंघोषवतामकारमित्युक्त्वा अ-

वोत्पन्नावपर ऊष्मघोषावित्येवमादीनां वर्णप्रतिपत्तिभेदोविरुद्धविधानानि ।

नैतेनशास्त्रेण विशिष्यतेन्यैः कृत्स्नंच वेदांगमनिंद्यमार्षं ॥६८॥

यदुच्यते इह यथोक्तंतथावर्णोच्चारणं कर्तुमशक्यं तस्मादकृत्स्नेयं वर्णशिक्षेति तन्न । कथं शिक्षा एतेनैवविधानेनान्यैः शास्त्रै र्नविशिष्यते । अन्येष्वपि शास्त्रेषुहि ग्रस्तनिरस्त इत्यादयोवर्णानांदोषाविधीयंते । तानिच शक्यार्थविधानात् । अकृत्स्नानीतिनोच्यंते तानिच कृत्स्नान्येवभवतितस्मादिदमपिशास्त्रंकृत्स्नं संभवितुमर्हति । प्रतिपत्तिभेदस्तुन । अन्येष्वपिशास्त्रेषुएवं विधाविकल्पाः संति । तस्मादनिंद्यं षडंगवत् । षट्सुवेदांगेषु इदमप्येकं अंगं कल्पोव्याकरणं निरुक्तं शिक्षाछंदोविचितिर्ज्योतिषामयनं इति । तस्माच्चानिंद्यं आर्षंच वेदांगशास्त्रं । आगमश्च लोकेप्रमाणं भवति । तस्माच्चानिंद्य मपि त्र । अत्रश्लोकाः । उक्तोदाहरणंकिंचि द्बहुग्रंथधरोनरः । आक्षिप्तःशैक्षिकेणेह दृष्ट्वाग्निरिवशाम्यति ॥ १ ॥ सुबहुज्ञोपियोभूत्वा शिक्षांचेन्नाधिगच्छति । नराजतिसभायां सशैक्षिकस्यसमीपतः ॥२॥ ब्राह्मणेषुसमेतेषु विद्वत्सुचबहुष्वपि । ब्रह्मोद्येद्येप्रवृत्तेयः शैक्षिकःसविराजते ॥ ३ ॥

इतिश्री पार्षदव्याख्यायामानं-

दप्पुरवास्तव्यवज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये चतुर्दशं पटलं समाप्तम् ॥

पारायणंवर्तये ब्रह्मचारी गुरुः शिष्येभ्यस्तदनुव्रतेभ्यः । अध्यासीनोदिशमेकां प्रशस्तां प्राचीमुदीची मपराजितां वा ॥ १ ॥

पारायणमध्यापनं । वर्तयेत् कुर्यात् । गुरुरुपाध्यायः ब्रह्मचारीभूत्वातावंतंकालं शिष्येभ्यस्तदनुव्रतेभ्यगुरौ अध्ययनेचयेभक्ताः तेभ्यः प्रशस्तां एकां दिशंमध्यासीनः । प्राचींपूर्वां उदीचीमुत्तरां अपराजितां वा प्रागुदीचीम् ।

एकः श्रोतादक्षिणतो निषीदेद्द्वौवा ॥ २ ॥

एकःश्रोताशिष्यः दक्षिणतः निषीदेत् । उपविशेदित्यर्थः । यदिद्वौश्रोतारौ स्यातां दक्षिणतएवनिषीदेतां ।

भूयांसस्तुयथावकाशं ॥ ३ ॥

भूयांसः बहवः श्रोतारो यदिस्युः यथावकाशं यत्रयत्रावकाशं तत्रतत्रनिषीदेयुः ।

तेधीहिभो ३ इत्यभि चोदयंति गुरुंशिष्य उपसंगृह्य सर्वे ॥ ४ ॥

तेसर्वेशिष्याः उपसंगृह्य गुरोः पादौ पाणिभ्यां उपपीड्यशिरसिकृत्वा अधीहिभो ३ इत्यनेन गुरुमभिचोदयंति ।

सओ ३ मितिप्रस्वरति त्रिमात्रः प्रस्वारस्थाने सभवत्युदात्तः । चतुर्मात्रोवार्द्धपूर्वोनुदात्तः षण्मात्रोवाभवति द्विःस्वरःसन् ॥ ५ ॥

सगुरुः ओं ३ इति प्रस्वरतिशब्दंकरोति । त्रिमात्रः प्रस्वारः सओंकारशब्दः त्रिमात्रः स्थाने भवति । उदात्तश्च । किमिदंस्थानमिति । उपांशुस्थानमिति । उपांशुस्थानं निषादपंचममध्यमतारेषु तेयेनस्थानेन प्रयोज्यंस्यात् तेनैवप्रकारेण प्रणवंकुर्यात् । तान्येतान्युक्तानि भवंति । अथवा चतुर्मात्रः संभवति । अर्द्धपूर्वः अनुदात्तोयस्यसअर्द्धपूर्वोनुदात्तः । अथवाषण्मात्रो भवति द्विःस्वरःसन् इमेत्रयः प्रणवाः । तेषामाद्योवहुभिः परिगृहीतः । न मध्यमः । किमितिनज्ञायते । अन्याभिस्तु उत्तममंत्यंमत्वातथापद्यते ।

अध्येतुरध्यापयितुश्च नित्यंस्वर्गद्वारं ब्रह्मवरिष्ठमेतत् मुखंस्वा-

ध्यायस्य भवेत् ॥ ६ ॥

अध्येतुः शिष्यस्याध्यापयितुश्च मुखंनित्यं प्रणवोभवति । स्वर्गद्वारंवरिष्ठं प्रधानं ब्रह्मइत्येतदक्षरं प्रतीयात् जानीयात् ।

मुखमादौ स्वाध्यायस्य भवेत्तद्ब्रह्म । नचैतत्संदध्यात्स्वाध्यायगतं परेण ॥ ७ ॥

एतदोंकारं स्वाध्यायार्थं प्रयुक्तं परपादेन वार्द्धर्चेन वा नसंदध्यात् । यज्ञकर्मणितु संधानं भवति चोदितत्वात् ।

प्रचोदितोऽभिक्रमते यथास्यक्रमः परस्ताद्विहितस्तथैव ॥ ८ ॥

तथाशिष्यस्य प्रचोदितोगुरुः ओङ्कारंकृत्वा अभिक्रमते । अध्ययनमुच्चारयति । यथा अस्यक्रमः आनुपूर्व्यंपरस्तादुत्तरत्र विहितंदक्षिणाय प्रथमंप्रश्नमाहेति तथैव ।

सर्वोदात्तंत्विहतस्मिन्नपृक्तमविप्रयुक्तं द्विरुपस्थितंवा ॥ ९ ॥

इहपारायणप्रवचने तस्मिन्नभिक्रमे सर्वोदात्तंच यत्तत्पदं अविप्रयुक्तंवा अपृक्तंवा उपस्थितंवा । शिष्यज्ञापनार्थं गुरुर्द्विरुच्चारयति । प्र । आ । रोदसीइति । उभेइतियथा । अविप्रयुक्तमितिकस्मात् । उद्वेति । एवमेकेअ-

परे उदात्तादाकारयोः । अपि सर्वोदात्तमित्येव सिद्धत्वात् । अपृक्तमच्चिप्रयुक्तमित्यनर्थकं भवति । तस्मात्त्वामंतरेण वर्णयंति । उदहेति । यथा अपृक्तं सन्नचेप्रयुक्तमिति । ननु अत्रापि उपस्थितमित्येवसिद्धं । सत्यं । नियमार्थमिदमुच्यते । इहमाभूत् । क्व । उदहेति । उद्धृथदेव इहयेवमादौतु नियमः स्यात् । अथवा उपस्थितंवेति उपस्थितविभाषाप्रसक्ते नित्यार्थमस्य ग्रहणं । अपृक्तमच्चिप्रयुक्तमिति । १ ।

अभिक्रांतेद्वैपदेवाधिकेवा पूर्वंपदंप्रथमः प्राहशिष्यः ॥ १० ॥

गुरुणाद्वैपदेवाधिकेवा प्रोक्तेपूर्वंपदं प्रश्नाद्यंपदं प्राहदक्षिणः शिष्यः ततः पश्चादितरे प्राहुः । अस्मिन्पटलेयदुक्तं विधानं तेनदक्षिणात्याः पठंति तस्मादिष्टज्ञापनत्वाभिप्रायेणकिंचिदुक्तंमत्वातत्कश्चिच्छिक्षतइति ।

निर्वाच्येतु भो ३ इतिचोदनास्यान्निरुक्तं ओंभो ३ इतिचाभ्यनुज्ञा ॥ ११ ॥

शिष्येणनिर्वक्तव्ये गुरोः भोः ३ इतिचोदनास्यात् तेननिरुक्ते ओंभो ३ इतिचार्थं पुनर्गृहीतमावर्तयितुमभ्यनुज्ञास्यात् ।

परिपन्नं प्राकृतमूष्मसंधिं नका-

रस्य लोपरेफोष्मभावं । असंयुक्त मृपदंरेफसंधिं विवृत्तिमित्यत्र निदर्शनानि ॥ १२ ॥

परिपन्नंत्वंराजेंद्रेत्यादि । प्राकृतमक्षरं ऊष्मसंधौ । अनिश्चयः । यस्तेमन्योऽयः शंबरंपर्वतेषु । नकारलोपभावं । अस्माँ अस्माँ.इत् । रेफभाव । रश्मीँरिव । अभीशूँरिव । ऊष्मभावः पशूँस्ताँश्चक्रे । तांस्तेअश्याम । वः पात्रं । असंयुक्तं । तववायवृतस्पते पदं । यन्नृभिर्नृन् । रेफसंधिं । अन्तर्वावित् । अग्नीरक्षांसि । विवृत्तिं सहूँपाहि । इत्येतानि निदर्शनान्याहुराचार्याः । कस्यनिदर्शनानीत्येतदागमयितव्यं । केचिदेतं श्लोकं नपठंति ।

प्रत्युच्चार्यैतद्वचनं परस्यशिष्यस्यस्याद्भो ३ इतिचोदनावा । अर्द्धर्चोदर्केषु तुवर्जयेयु रध्यायान्तेषूभयथास्मरंति ॥ १३ ॥

प्रत्युच्चार्यैतद्वचनं परस्यगुरोरित्यर्थः । शिष्यस्याद्भो ३ इतिचोदना स्यात् । नवास्यात् । अर्द्धर्चोदर्केषु अर्द्धर्चसमयेषु तांचोदनां वर्जयेयुः । अध्यायांतेषु अर्धर्चोदर्केषु उभयथास्मरंत्याचार्याः वर्जनंवानवेति ।

गुरुः शिष्यस्यपदमाहमुख्यं स-

मासश्चेदसमासो यदिद्वे ॥ १४ ॥

गुरुः शिष्यस्य प्रश्ने सुक्तं एकपदमाह यदिसमासः यद्यसमासः द्विपदेषाह ।

एतेनकल्पेन समाप्यप्रश्नं प्रत्याम्नाय् स्तम्पुनरेवसर्वे ॥ १५ ॥

एतेनविधानेन प्रश्नंसमाप्य सर्वेंशिष्या स्तमेव प्रश्नंपुनः पुनरभ्यासयेयुः ।

ततऊर्ध्वँसन्ततंसंहतेनप्रविग्रहेण मृद्ववग्रहेण । सर्वोदात्तेन चचर्चयेयुः सर्वइमानुपस्थापयंतः पदानि ॥ १६ ॥

तस्मादभ्यासादूर्ध्वंसंततं अव्यवस्थितं संहतं समानं । समानशब्देन प्रविग्रहेण सप्रश्लिष्टः यस्मिन्संभवति सप्रविग्रहः । इंद्रोइत्येवमादिषु प्रविग्रहेषु प्रश्लिष्टं विश्लिष्टं कुर्यात् । कालाधिक्येनकुर्यादित्यर्थः । मृदवः अवग्रहायस्मिन्समृद्ववग्रहः तेनसर्वोदात्तेनस्वरेण चर्चयेयुः । आदिपदिकाश्चोत्तरपदिकाश्च भूत्वा सर्वेशिष्यास्तमेवप्रश्नं । इमानिपदानि । यानिवक्ष्यामः तान्युपस्थापयंतः सेतिकरणानिकुर्वन्तइत्यर्थः ॥

अभ्युत्पराणिव्युपसम्प्रति प्रयछ्य-

व्यपादुःस्वपिपर्यवानु ॥ १७ ॥

अभि। उत्। परा निः वि॰ उप। सं। प्रति। प्र। नि। अधि। अति॰ अप॰ आ॰ दुः। सु। अपि। परि। अव। अनु॰ इत्येतानिपदानि केषांचिच्छाखिनां सेतिकरणानिभवंति। उदिति। परेति। अस्माकंतुनपुनः यानि सेतिकरणानि तेष्वेवायंविधिः कर्त्तव्यः।

आद्यंस्थितोपस्थित मेकमेषामर्द्धर्चांते कुर्यु रथोद्विषन्धौ ॥ १८ ॥

तेषामुपसर्गाणा माद्यमभीत्येकमुपसर्गं मर्द्धर्चांतेवर्त्तमानंअथोद्विषंधौ वा विवृत्तिस्थाने स्थितोपस्थितं कुर्युः तेषामेवशाखिनां। अभीत्यभि।

चद्यह्विवेतिच्च सर्वंचतेषामनेकंचेत्संनिपते द्वितीयं ॥ १९ ॥

चद्यह्विवेत्येतानि सर्वत्रस्थितोपस्थितानिकुर्युः चेतिच तेषामुपसर्गाणां अभ्यादिः वांतानांयद्यनेकं संनिपतेतर्हि द्वितीयमेवसेतिकरणं कुर्युः। नेतरत्। उदिति।

समस्यंतश्च द्विपदाद्यर्द्धर्चौ व्यवस्यंत इतरांश्चर्चयेयुः ॥ २० ॥

पश्वानतायुमित्येवमादीनां द्विपदानां उक्तानां द्वौद्वौअर्द्धर्चौएकामृचंकुर्वन्तः। व्यवस्यंतः पृथक्कुर्वन्तः इत-

राअधिकायाः सूक्तेषु साधुर्नंगृह्णुरिति यथा तास्तथैव चर्चयेयुः । आदिग्रहणादादिपदस्यैतदुच्यते ।

दक्षिणाय प्रथमं प्रश्नमाह प्रदक्षिणं तत ऊर्ध्वं परीयुः ॥ २१ ॥

दक्षिणाय शिष्याय प्रथमं प्रश्नमाह गुरुः ततअध्ययनारंभादूर्ध्वं किंचित्गच्छंतः शिष्याः प्रदक्षिणमाचार्यं कृत्वा परीयुः प्रदक्षिणावृत्तीः परीयुरितिवा योजनीयं ।

एवं सर्वे प्रश्नशोऽध्यायमुक्त्वोपसंगृह्यातिसृष्टा यथार्थम् ॥ २२ ॥

एवमेतेन विधिना प्रश्नशः सर्वे शिष्या अध्ययनांतं गत्वा उपसंगृह्य गुरुं तेनातिसृष्टा यथार्थं यथार्थाः स्युः । यद्गुरुरत्र कर्म तत्तत्कुर्युरित्यर्थः किमिदं प्रश्न इति ।

प्रश्नस्तृचः ॥ २३ ॥

तृचः । प्रश्न इत्युच्यते ।

पंक्तिषु तु द्वृचो वा ॥ २४ ॥

पंक्तिषु ऋक्षु द्वृचो वा प्रश्नो भवति तृचो वा ।

द्वे द्वे त्वपंक्तेरधिकाक्षरेषु ॥ २५ ॥

त्रिष्टुभादिषु तस्माद्द्वे द्वे एव ऋचः प्रश्नो भवति ।

एका च सूक्तं ॥ २६ ॥

एका ऋक् यत्सूक्तं भवति । सा च प्रश्नो भवति ।

समयास्त्वगण्याः परावरार्द्ध्याः २७॥

समयाः परावरार्द्ध्याः प्रश्नेषुगण्यंते ।

द्विपदे यथैका ॥ २८ ॥

द्विपदेयथा एकाऋक् तथागण्यंते ।

सूक्तस्यशेषोल्पतरो यदिस्यात्पूर्वंसगच्छेत् ॥ २९ ॥

एवंप्रश्नेषु परिकल्प्यमानेषु सूक्तस्यशेषं यदिघल्पतरंस्यात् । प्रश्नात्पूर्वंसप्रश्नोगच्छेत् ।

यदितुतृचोवा ॥ ३० ॥

यदिसूक्तस्य शेषोतृचोभवति । पूर्वंप्रश्न गच्छेद्वा न वेति । पंक्त्याः प्राक् छंदसः तृचंपूर्वमेवगच्छेत् । यदिपराणि पंक्त्या स्युः । तदापूर्वंनगच्छेत् । यदिमिश्राणिस्युः पंक्त्यांतर्हि क्वचित्पृथक्स्यात्पूर्वंगच्छेद्वा संख्यावशेन ।

तेषष्टिरध्याय उपाधिकावा सूक्ते समाप्ते यदितेसमाप्ताः ॥ ३१ ॥

तेप्रश्नाः एवंगण्यमानाः एकैकस्मिन्नध्याये षष्टिर्भवंति । उपाधिकावाभवंति । सूक्तेषुसमाप्तेषु यदितेप्रश्नाः समापयंति यदिषष्टिः पूर्णाभवंतीत्यर्थः । तदायावद्भिः प्रश्नैः सूक्तशेषः समाप्यते तावद्भिरधिका

षष्ठिर्भवति । एवंप्रायेणसर्वचयुज्यते । क्वचित्सूक्ते समाप्तेइति । शतधारमिति । जातिपक्षं द्रष्टव्यं । सूक्तेषुसमाप्तेष्विति । यथाचतुःषष्ठिरध्यायाः ।

भो ३ इत्यर्द्धर्चेगुरुणोक्तआह शिष्य ओँ भो ३ इत्युचिता ऋचं च ॥ ३२ ॥

अध्यायस्यांत्ये अर्द्धर्चेसमाप्ते भो ३ इति गुरुणाउक्तः शिष्यः ओँ भो ३ इत्याह । चार्थेवाढंयुष्मदनुध्यानात् समाप्तमित्यर्थः । उक्तांचऋचमाह । उचितास्यात् तथा नमोब्रह्मणेनमोस्त्वग्नय इति यानित्यं स्वाध्यायेपरिधानीया ऋक्स्यात् ।

अथैकेप्राहुरनुसंहितं तत्पारायणे प्रवचनंप्रशस्तं ॥ ३३ ॥

अथैकेआचार्याः प्राहुः । एतदेवपारायणस्यप्रवचनं अनुसंहितं । संहिताक्रमेण प्रशस्तंइति ॥ ३ ॥

इति श्री पार्षदव्याख्याया मानंदपुरवास्तव्यवज्रटपुत्रोवटकृते प्रातिशाख्यभाष्ये पंचदशं पटलम् ।

गायत्र्युष्णिगनुष्टुप्चबृहतीच्च प्रजापतेः । पंक्तिस्त्रिष्टुब्जगतीच सप्तछन्दांसि तानि ह । अष्टाक्षरप्रभृतीनि ॥ १ ॥

गायत्री । उष्णिक् । अनुष्टुप् बृहती पंक्तिः । त्रिष्टुप् जगती । इत्यष्टाक्षरप्रभृतीनिसप्तछंदांसि तानिप्रजापतेर्वेदितव्यानि ।

चतुर्भूयः परंपरं ॥ २ ॥

यथापरंपरं तेषु छंदःसु पूर्वस्मात्पूर्वस्माच्छन्दसः उत्तरमुत्तरं चतुर्भिरक्षरैर्भूयोभवति ।

दैवान्यपिच सप्तैव ॥ ३ ॥

देवानामपि सप्तछंदांसिभवंति -

सप्तचैवा सुराण्यपि ॥ ४ ॥

आसुराण्यपि सप्तैव छंदांसि भवंति ।

एकोत्तराणिदेवानां नान्येवैकाक्षरादधि ॥ ५ ॥

तान्येवगायत्र्यादीनि एकाक्षरप्रभृतीनि एकोत्तराणि देवानांभवंति ।

एकावमान्यसुराणां ततः पंच-

दशाक्षरात् ॥ ६ ॥

तान्येवपंचदशाक्षरप्रभृति चैमानि एकावमानि एकैकन्यूनानि असुराणांभवंति ।

तानित्रीणि समागम्यसनामानि सनामतत् । एकंभवत्यृषिछंदस्तथागच्छति संपदं ॥ ७ ॥

तानिप्रजापति देवासुराणां छंदांसि समाननामानितानित्रीणि समागम्य सहभूत्वा सहभूतानां सनामतदेकं ऋषिछंदोभवति । तथाकथं । प्रजापतेर्गायत्रमष्टाक्षरं देवानामेकाक्षरं असुराणांपञ्चदशाक्षरं । तानिचतुर्विंशतेः चतुरुत्तराणिभवंति । एवंसर्वाणिछंदांसि संपदंगच्छंति

एवंत्रिप्रकृतीन्याहुर्युक्तानिचतुरुत्तरं । ऋषिछंदांसि ॥ ८ ॥

एवंकथंयुक्तानि समाननामानि सनामेतिच त्रिःप्रकृतीनि ऋषिछंदांसि चतुरुत्तराण्याहुः ।

तैः प्रायोमंत्रः श्लोकश्चवर्त्तते ॥ ९ ॥

तैर्ऋषिछंदोभिः प्रायेणमंत्रोनुवर्त्तते श्लोकश्च । १ ।

तत्पादोयजुषां छंदः साम्नांतुद्वाहृचां लयः ॥ १० ॥

तत्पादस्तेषां ऋषिछंदसां चतुर्थोंशः यजुषांछंदोवेदितव्यं । साम्नांछन्दो द्वौपादौवेदितव्यौ । ऋचांछंदः त्रयः पादावेदितव्यं ।

गायत्र्यादि जगत्यंतमेकद्वित्र्यधिकंतु तत् ।
आर्षवत्तत्समाहारो ब्राह्मोवर्गः षडुत्तरः ॥ ११ ॥

तानिछंदांसियजुः सामऋचांगायत्र्यादिजगत्यंतानि क्रमेणएकद्वित्र्यधिकानि भवंति । कः क्रमः । यजुषांगायत्रीषडक्षरा । उष्णिक्सप्ताक्षरा । तथासाम्नांद्वादशाक्षरागायत्री उष्णिक्चतुर्दशाक्षरा । तथा ऋचामष्टादशाक्षरागायत्री । उष्णिगेकविंशत्यक्षरा । इति एवंसर्वंच । तत्समाहारस्तेषां ऋग्यजुः साम्नांछंदसांसमाहारः आर्षवत् । ऋषिछंदोवत् द्रष्टव्यः । सब्राह्मः ब्रह्मणोयंवर्गगणः षडुत्तरोवेदितव्यः ।

अक्षराणितुषट्त्रिंशद्गायत्रीब्रह्मणोमिता ।
यजुषांषडृचां त्रिः षट्साम्नां द्वादशसंपदि ॥ १२ ॥

कथं यद्ब्रह्मणोगायत्रीषट्त्रिंशदक्षरा भवतीति मन्यसे तच्छृणु । यजुषांगायत्रीषडक्षरा । ऋचांत्रिः षट् । अष्टादशाक्षरेत्यर्थः । साम्नांद्वादशाक्षरा । अस्यांसंपदि षट्त्रिंशदक्षरा भवति ।

ऋषीणांतु त्रयोवर्गाः सप्तका-
एवनेतरे ऋषिछंदांसि ॥ १३ ॥

प्रजापतिप्रभृतीनि छंदांसिव्याख्यातानि । तेषुऋषिछंदांसि । सोदाहरणानि विस्तरेणवक्ष्यति ।

गायत्री साचतुर्विंशत्यक्षरा । अ-
ष्टाक्षरास्त्रयः पादाश्चत्वारोवाष-
डक्षराः ॥ १४ ॥

तेषु गायत्रीचतुर्विंशत्यक्षरास्यात् । तस्या अष्टाक्षराः त्रयः पादाभवंति । अग्निमीळे पुरोहितं । षडक्षरा वाचत्वारः पादाभवंति । इंद्रः शचीपतिर्बलेन वीळितः । दुश्च्यवनो वृषासमत्सुसासहिः । इतिषडक्षरायाउदाहरणं ।

पंचकाः पँचषड्वांत्यः पदपंक्ति-
र्हिंसाभुरिक् । द्वौवापादौचतु-
ष्कश्चषट्कश्चैकस्त्रिपंचकाः ॥१५॥

पंचाक्षराः पंचपादाभवंति यस्याः साभुरिवपदपंक्ति र्वेदितव्या । षडक्षरोवा अंत्यः पादोभवति चत्वारश्चपंचकाः साभुरिक्पद पंक्तिर्वेदितव्या । द्वौपादौएकश्चतुष्कः एकः षट्क; त्रयश्चपंचाक्षराभवंति ।

अधाहींद्रेतिच तृचौष्टतमग्ने-

तमित्यृचः ॥ १६ ॥

अथाग्नींद्रेतिद्वृचौ । हृतमग्नेतमद्य । इत्येतास्वृचः । तासांमुदाहरणानि भवंति । अथाह्यग्ने । इंद्रतिषोडशिनस्तोत्रियः । इंद्रजुषस्व । प्रवहायाहि । शूरहरीह । पि वासुतस्यमतिर्न । मध्वश्चकानः । चारुर्मदाय । एवमष्टाक्षरैर्विनापंचकाः पंचपादाभवंति । हृतंनपूर्तं । अग्नेतमद्य ।

अष्टकोदशकः सप्तकोविद्वांसाविति साभुरिक् ॥ १७ ॥

अष्टकः प्रथमः पादः उत्तरोदशकः अंत्यः सप्तकः साभुरिक् । उदाहरणं विद्वांसाविद्दुरः पृच्छेत् ।

युवाकुहीतिगायत्री त्रयः सप्ताक्षराविराट् । सैषापादनिचृन्नाम गायत्र्येवैकविंशिका ॥ १८ ॥

युवाकुहिशचीनामित्येषा त्रिः सप्ताक्षरागायत्री एवंविराट् एकविंशत्यक्षरापादनिचृन्नामवेदितव्या ।

षट्कः सप्तकयोर्मध्ये स्तोतृणांविवाचीति । यस्याः सातिनिचृन्नाम गायत्रीद्विर्दंशाक्षरा ॥ १९ ॥

सप्तकयोर्मध्येषट्कः पादः. सा यतिनिचृन्नाम विंशत्यक्षरागायत्री । पुरुतमंपुरूणांस्तोतॄणां ।

षट्कसप्तकयोर्मध्येस्तु ह्यासावातिथिं । षडक्षरः प्रकृत्यैषव्यूहेनाष्टाक्षरोपि वा ॥ २० ॥

प्रकृत्या एषषडक्षरः अक्षरव्यूहेनअष्टाक्षरः षट्कसप्तकयोर्मध्ये । साचगायत्री यतिनिवृदेव । प्रेष्ठमुप्रियाणामिति । ३ ।

उत्तरोत्तरिणः पादाः षट्सप्ताष्टावितित्रयः । गायत्रीवर्द्धमानैषा त्वमग्नेयज्ञानामिति ॥ २१ ॥

उत्तरोत्तरिण एकैकाक्षरेणवर्द्धमानाः त्रयः पादाः षट्सप्ताष्टाक्षराः यस्याः सागायत्री वर्द्धमानानामवेदितव्या । त्वमग्नेयज्ञानां ।

अष्टकौमध्यमः षट्कएकेषा मुपदिश्यते ॥ २२ ॥

एकेषांशाखिनां आद्यंतौ अष्टकौ पादौ मध्यमः षट्कः यस्याः सावर्द्धमानैव उपदिश्यते ।

सनोवाजेषु पादौद्वौजागतौ द्विपदोच्यते ॥ २३ ॥

सनोवाजेष्वविता पुरूवसुरिति आमतौपादौद्विपदागायत्रीउच्यते ।

आद्यांत्यौसप्तकौ यस्या मध्ये-
चदशकोभवेत् । यवमध्याच-
गायत्री समुन्वद्रूतिदृश्यते ॥ २४ ॥

आद्यांत्यौपादौसप्तकौयस्याः मध्येचदशको भवेत् । यवमध्यानाम सागायत्रीवेदितव्या । समुन्वेयोवसूनां ।

षडक्षरः सप्ताक्षरस्ततएकाद-
शाक्षरः । एषोष्णिग्गर्भागायत्री
तामेअश्व्यानामिति ॥ २५ ॥

षडक्षरःप्रथमःपादः ततोद्वितीयः सप्ताक्षरः तृतीयः एकादशाक्षरःयस्याः एषाउष्णिग्गर्भानामगायत्रीवेदितव्या । तामेअश्व्यानांहरीणां नितोशना ।

अष्टाविंशत्यक्षरोष्णिक्सापादै-
र्वर्ततेत्रिभिः । पूर्वावष्टाक्षरौ-
पादौ तृतीयोद्वादशाक्षरः ॥२६॥

यस्याअष्टाविंशत्यक्षराणि साउष्णिग्भवति । त्रिभिस्पादैर्वर्तते । पूर्वौद्वावष्टाक्षरौपादौ तृतीयोद्वादशाक्षरसोष्णिक्भवति ॥ ४ ॥

पुरउष्णिक्तुसातस्मिन् प्रथमे-

मध्यमेककुप् ॥ २७ ॥

तस्मिन्द्वादशाक्षरे प्रथमेसति पुरउष्णिग्भवति । तस्मिन्द्वादशाक्षरे मध्यमेसति ककुब्भवति ।

अग्नेवाजस्य तम्बश्चःसुदेवः समहेतिच । ऋचोनिदर्शनायैताः परायास्तायथोदिताः ॥ २८ ॥

उष्णिक्पुरउष्णिक्ककुभां क्रमेणैता ऋचोनिदर्शनानि भवंति । अग्नेवाजस्यगोमतः । [illegible] । सुदेवःसमहासति । पराःयाऋचः ताअपियथोदिताः उत्तरत्रयथाकथ्यमानाः तत्रतथाजानीयात् ।

समाक्षरैश्चतुर्भिर्हि नदंमंसीमहीतिच । पादैरनुष्टुभो विद्या दक्षरैरुष्णिहाविमे ॥ २९ ॥

समाक्षरैः चतुर्भिःपादैर्हि ऋचौउष्णिहौ भवतः । पादैरनुष्टुभोजानीयात् । अक्षरैःकृत्वा उष्णिहौभवतः । नदंवओदतीनां । मंसीमहित्वावयेहयेन ।

दशैरेकादशेतित्वेषाककुपन्न्यंकुशिरोनिचृत् । एकादशोस्याःप्रथमः उत्तमश्चतुरक्षरः ॥ ३० ॥

यस्याःप्रथमएकादशाक्षरः सास्मिककुप्न्यङ्कुशिरा । द्वि-

तीयो द्वादशाक्षरः उत्तमस्तृतीयश्चतुरक्षरः । एषा ककुब्न्यंकुशिरा निचृत् । उदाहरणं दीरेक्णास्तन्वे दादिवसु ।

एकादशाक्षरौ च द्वौ मध्ये चैकः षडक्षरः । उष्णिक्पिपीलिकमध्याहरीयस्वेति दृश्यते ॥२१॥

यस्या एकादशाक्षरौ द्वौ पादौ । तयोर्मध्ये एकः षडक्षरः । पिपीलिकमध्या नामोष्णिग्वेदितव्या । हरीयस्य सुयुजा विव्रताविः ।

ताभ्यां परः षडक्षरः प्रयातनुशिरो नाम ॥ २२ ॥

ताभ्यां एकादशाक्षराभ्यां पादाभ्यां षडक्षरःपादः परो भवति सोष्णिक्तनुशिरा नाम वेदितव्या । प्रयावोषि भृगवाणेन शोभे । ५ ।

आद्यःपंचाक्षरःपाद उत्तरेष्टाक्षरास्त्रयः । अनुष्टुब्गर्भोष्णिक् साऽगस्त्येऽस्ति पितुंन्विति ॥२३॥

आद्यःचपाक्षरःपादः उत्तरेत्रयःपादा अष्टाक्षराःयस्या एषाऽनुष्टुब्गर्भा उष्णिग्भवति । साऽगस्त्यवर्गे विद्यते । पितुन्नुस्तोषं ।

द्वात्रिंशदक्षराऽनुष्टुप् चत्वारो-

ष्टाक्षराःसमाः ॥ ३४ ॥

याद्वात्रिंशदक्षरासा अनुष्टुब्भवति । तस्याःचत्वारःपादाः अष्टाक्षराः तेचसमानावेदितव्याः । उदाहरणं गायंतित्वागायत्रिणः ।

कृतिर्द्वौद्वादशाक्षरावेक श्चाष्टाक्षरःपरः ॥ ३५ ॥

यस्याःपादौद्वादशाक्षरौस्तः परःअष्टाक्षरःपादोभवति । साअनुष्टुप्कृतिर्नामवेदितव्या । उदाहरणंवक्ष्यति ।

यस्यास्त्वष्टाक्षरोमध्येसापिपीलिकमध्यमा ॥ ३६ ॥

यस्यास्तुद्वादशाक्षरयो र्मध्ये अष्टाक्षरैःपादोभवति सापिपीलिकमध्यमा अनुष्टुब्भवति । वक्ष्यमाणोदाहरणं ।

नवकौद्वादशीद्व्यूना ताविद्वांसेति काविराट् ॥ ३७ ॥

नवकावाद्यंतौपादौ मध्येचद्वादशीपादः । द्वाभ्यांन्यूनाविराट्इत्यर्थः काविराट्नामवेदितव्या । ताविद्वांमाहवामहेवां ।

तेषामेकाधिकावंत्यो नष्टरूपाविपृक्षामि ॥ ३८ ॥

तेषामेवनवकद्वादशिनां पादानां अंत्यौएकैकाक्षरे-

चाधिकौभवतः । नवाक्षरः प्रथमः दशाक्षरो द्वितीयः त्रयोदशाक्षरोऽन्त्यः । अनुष्टुप्सानष्टरूपा नामवेदितव्या । विपृक्षामिपाकपारनदेवान् ।

दशाक्षरास्त्रयो विराट्त्रयोवैका-
दशाक्षराः ॥ ३९ ॥

दशाक्षरास्त्रयःपादाः एकादशाक्षरास्त्रयोयस्याः पादा भवंतिविराट् । नामसानुष्टुब्वेदितव्या । तयोरुदाहरणेवक्ष्यामः ।

षण्महापदपंक्तिस्तु षट्कोंत्यः
पंचपंचकाः ॥ ४० ॥

षड्भिःपादै र्याअनुष्टुप् सामहापदपंक्तिरित्युच्यते । अंत्यःपादःषट्कः । पंचपंचकाआद्याः । उदाहरणंवक्ष्यति ।

माकस्मै पर्यूषु श्रुध्यग्ने तवस्वा-
दिष्ठा ताऋचः ॥ ४१ ॥

इत्येताऋचो निर्दिष्टलक्षणानां उदाहरणान्यनिर्दिष्टोदाहरणानां । माकस्मै । पर्यूषु । श्रुधि । अग्न । तवस्वादिष्ठाइति । क्रातिः माकस्मैधातमभ्यमित्रिणेनः । पिपीलिकमध्यानुष्टुप् । पर्यूषु प्रधन्व वाजसातये । दशाक्षराविराट् । श्रुधीहवं विपिपानस्याद्रेः । एकादशाक्षरा अमनइंद्रस्य दाशुषोदुरोणे । महापदपंक्ति स्तवस्वादिष्ठाग्नेसंदृष्टिः । ६ ।

चतुष्पदांतुबृहती प्रायःषट्विं-

षडक्षरा । अष्टाक्षरास्त्रयःपादा स्तृतीयोद्वादशाक्षरः ॥ ४२ ॥

बृहती षट्त्रिंशदक्षराचतुष्पदा भवति तस्याः त्रयः पादा अष्टाक्षराः तृतीयोद्वादशाक्षरः पादोभवति । एषाबृहतीप्रायः । किमिदंप्रायइति । प्रायेणैषा प्रयुज्यत इत्यर्थः । माचिदन्यद्विशंसत ।

पुरस्ताद्बृहतीनाम प्रथमेद्वादशाक्षरे । उपरिष्टाद्बृहत्यनन्त्ये द्वितीयेन्यंकुसारिणी । स्कंधोग्रीव्युरोबृहती त्रेधैनांप्रतिजानते ॥४३॥

प्रथमेद्वादशाक्षरेसति पुरस्ताद्बृहतीनाम वेदितव्या । अन्तिमेद्वादशाक्षरे उपरिष्टाद्बृहतीनाम । द्वितीयेद्वादशाक्षरे न्यंकुमारिणीतिकेचिदाहुः । अपरेस्कंधोग्रीवीनाममन्यंते । उरोबृहत्यन्ये । तासामुदाहरणानि वक्ष्यति । एवमेनां त्रिधाप्रतिजानते आचार्याः ।

त्रयोद्वादशकायस्याः सात्वोर्ध्वबृहतीविराट् ॥ ४४ ॥

यस्याबृहत्यास्त्रयःपादा द्वादशाक्षराः साविराडूर्ध्वबृहतीनाम वेदितव्या । उदाहरणं वक्ष्ये ।

महोयोधीन्नतं मत्सीजानमिदजीजनः ॥ ४५ ॥

महीयः । अधीत् । गतं । सखि । ईशानमित् । अजीजनः । निर्द्दिष्टलक्षणानाम निर्द्दिष्टोदाहरणाना मुदाहरणानि । पुरस्ताद्बृहत्याः द्वे । महीयस्पतिः शवसो असाम्या । अधीन्वत्रसप्ततिंच सप्तच । उपरिष्टाद्बृहत्याः नतमंहोनदुरितं । न्यंकुसारिणीस्कंधोगौव्युरोहतीनां द्वे । मत्स्वपायितेमहः । ईशानमितो गूर्त्तवसुः । विराडूर्ध्वबृहत्याः अजीजनोअमृतमर्त्येष्वा ।

अष्टिनोर्दशकौमध्ये विष्टारबृहतीयुवं ॥ ४६ ॥

अष्टिनोःपादयोर्मध्ये दशकौयस्याः साविष्टारबृहती । युवंह्यास्तमहोरन् ।

एकाऽगस्त्ये पितुस्तोमेनवाक्षरपदोत्तमा ॥ ४७ ॥

अगस्त्यऋषौ अन्नस्तुतिसूक्ते उक्तं । उत्तमांत्यैकानवाक्षरपादात्रिद्युते । बृहत्येव । तंत्वावयंपितो वचोभिः । ७ ।

द्वयोश्चोपेदमाद्यार्षं सर्वैर्व्यूहेनवाक्षराः ॥ ४८ ॥

उपेदमुपपर्चनं । आद्यार्षंत्वाविदंत्वा । इत्येतयोश्चबृहत्योर्ऋचोः सर्वैर्व्यूहेनवाक्षराः पादाभवंति । बृहत्येव । ७ ।

त्रयोदशाक्षरौचद्वौमध्येचाष्टाक्षरोभवेत् । अभिवोवीरमित्ये-

षा सापिपीलिकमध्यमा ॥४९॥

त्रयोदशाक्षरयोर्मध्ये चाष्टाक्षरःपादःसापिपीलिकमध्यमा बृहतीनामवेदितव्या । अभिवोवीरमंधसो मदेषुगाय ।

नवकाष्टादशसहैकः परमोष्टच यदिपादाः । बृहतीविषमपदा सासनितः सुसनितश्च ॥५०॥

नवाक्षरः प्रथमःपादः अष्टाक्षरोद्वितीयः एकादशाक्षरस्तृतीयः परमःअंत्योष्टाक्षरः इतिईदृशायदिभवंति सा बृहतीविषमपदानाम वेदितव्या । सनितः सुसनितश्चेति ।

पंक्तिरष्टाक्षराः पंच ॥ ५१ ॥

सापंक्तिरिष्यते यस्याअष्टाक्षराः पंचपादाभवंति । इंद्रोमदाय वावृधे ।

चत्वारोदशकाविराट् ॥ ५२ ॥

यस्याःचत्वारोदशकाः पादाः साविराट्पंक्तिर्भवति । मन्ये त्वायज्ञियं यज्ञियानां ।

आदेशेष्टाक्षरौ विद्यात्सोपसर्गेषु नामसु ॥ ५३ ॥

आस्तारपंक्तिरित्येवमादिषु सोपसर्गेषुनामसु आदितोऽन्ततो मध्यतइत्येवमादिष्वष्टाक्षरौपादौविद्यात् ।

युग्मावष्टाक्षरौ पादा वयुजौ द्वादशाक्षरौ । सासतोबृहतीनाम ॥ ५३ ॥

यस्याः युग्मौद्वितीयचतुर्थौ पादावष्टाक्षरौ भवतः । अयुजौ प्रथमतृतीयौ द्वादशाक्षरौ सापंक्तिः सतोबृहतीनामवेदितव्या । मातैराधांसि मातऊतयोवसो ।

विपरीताविपर्य्यये ॥ ५४ ॥

तेषांविपर्य्ययेयुग्मौद्वादशाक्षरौ अयुजौअष्टाक्षरौसाविपरीतापंक्तिर्नामवेदितव्या । यक्ष्वः श्रावयत्सखा ।

आस्तारपंक्ति रादितः ॥ ५५ ॥

आदौअष्टाक्षरौ अंत्यौद्वादशकौ साआस्तारपंक्ति र्नाम । अग्निंनस्ववृक्तिभिः ।

प्रस्तारपंक्तिरंततः ॥ ५६ ॥

यस्याः अंत्यौपादौ अष्टाक्षरौ आद्यौ द्वादशाक्षरौ साप्रस्तारपंक्तिर्नाम । महिद्यावापृथिवी भूतमुर्वी ।

संस्तारपंक्तिर्मध्यतः ॥ ५७ ॥

मध्येष्टाक्षरौपादौ आद्यांत्यौ द्वादशाक्षरौभवतः सासंस्तारपंक्तिर्नाम । पितुर्भृतोनतंतुमित्सुदानवः ।

विष्टारपंक्तिर्बाह्यतः ॥ ५८ ॥

आद्यांत्यौ चाष्टाक्षरौ मध्येद्वादशकौभवतः साविष्टारपंक्तिर्नाम । अग्नेतवश्रवोवयः । ८ ।

मन्येत्वा माते राधांसि यक्ष्व आग्निंमहीति च । पितुभृतो नाग्नेतव ताऋचोऽत्रनिदर्शनं॥५९॥

मन्येत्वायज्ञियं । मातेराधांसिमात । यक्ष्वःश्रावय । आग्निंनस्ववृक्तिभिः । महिद्यावापृथिवी । पितुभृतोनतंतु । अग्नेतवश्रवो । एताऋचोऽत्रनिदर्शनं यथाक्रमं विराट्पंक्त्यादीनां पुरस्तादेवनिदर्शितानां ।

चतुश्चत्वारिंशत्त्रिष्टुबक्षराणिचतुष्पदा । एकादशाक्षरैः पादैः॥६०॥

चतुश्चत्वारिंशदक्षरा एकादशाक्षरैःपादैः चतुष्पदात्रिष्टुब्भवति । पिबासोममभियमुग्रतर्दः ।

द्वौचेत्तुद्वादशाक्षरौ । प्रायस्यौपजगत्येषा परस्यास्यतुसाचिष्टुप् ॥ ६१ ॥

यदिद्वौद्वादशाक्षरौभवतः द्वावेकादशाक्षरौपरस्तजगतीप्रायेवर्त्तमानेत्यर्थः । उपजगतीनामवेदितव्या । यथा । सोचिन्नुवृष्टिर्यूथ्या २ स्वासचा । अस्यतुत्रिष्टुभः प्रा-

यस्यसात्रिष्टुप्नाम्ना वेदितव्या । यथासनेमिचक्रमजरं विवावृते ।

वैराजजागतैः पादैर्योवाचेत्यभिसारिणी ॥ ६२ ॥

द्वौदशाक्षरौभवतः द्वौद्वादशाक्षरौ अभिसारिणीसंज्ञासा । योवाचाविवाचा मृध्रवाचः ।

नवकोदशकोवास्या देकोनेकोपित्रिष्टुभः । एकादशाक्षरश्चापिविराट्स्थानाहनामसा ॥ ६३ ॥

त्रिष्टुभःपाद एकोप्यनेकोपि नवकोवादशकोवास्यात् । एकादशाक्षरश्चाप्यनेकोवास्यात् । एतदुक्तंभवति यद्येकोनवकः द्वौदशकौभवतः । एकोदशकः द्वौनवकौ । उभयत्राप्येकस्त्रैष्टुभः द्वौचत्रैष्टुभौ एकैकोद्भुतरौ । साविराट्स्थाना नामवेदितव्या । श्रुधीहव मिंद्रमारिषण्यः ।

पूर्वौदशाक्षरौपादा वुत्तरेष्टाक्षरास्त्रयः । विराट्पूर्वाहनामैषात्रिष्टुप्पंक्त्युत्तरैववा ॥ ६४ ॥

यस्याः पूर्वौद्वौपादौ दशाक्षरौ भवत उत्तरेष्टाक्षरास्त्रयोभवंति । एषात्रिष्टुब्विराट्पूर्वा वापंक्त्युत्तरावा वेदितव्या । एवेंद्राग्निभ्यामह्वाविहव्यस् । ८ ।

त्रयश्चैकादशाक्षरा एक श्चाष्टाक्षरःपरः । विराड्रूपाह्वनामैषा त्रिष्टुम्नाक्षरसंपदा ॥ ६५ ॥

यस्यास्त्रयःपादा एकादशाक्षरा एकश्चापरोष्टाक्षरः साविराड्रूपा नाम त्रिष्टुब्वेदितव्या । यद्यप्यक्षरसंपन्नास्ति । उक्तं च । त्रिष्टुभोयाविराट्स्थाना विराड्रूपा तथापरा । बह्ननाथापिताज्ञेया त्रिष्टुभोब्राह्मयां तथेति । श्रीणन्नोपस्थाभुवः ।

त्रयश्चद्वादशाक्षरा एकश्चाष्टाक्षरःक्वचित् । एषाज्योतिष्मतानाम ततोज्योतिर्यतोष्टकः ॥६६॥

यस्यास्त्रयःपादा द्वादशाक्षराः एकश्चाष्टाक्षरः क्वचिद्भवति एषात्रिष्टुप्ज्योतिष्मतीनामवेदितव्या । यतः अष्टकःपादः ततोज्योतिरित्युच्यते । यद्वायज्ञं मनवे संमिमिक्षथुः । मध्येज्योतिः । अग्निनेन्द्रेणवरुणेन विष्णुना । उपरिष्टाज्ज्योतिः ।

चत्वारोष्टाक्षराःपादा एकश्चद्वादशाक्षरः । सामहाबृहतीनाम६७॥

यस्याअष्टाक्षराःपादाः चत्वारः एकश्चद्वादशाक्षरः सात्रिष्टुम्महाबृहती नामवेदितव्या । नमोवाके प्रस्थितेअध्वरेनरा ।

यवमध्यातुमध्यमे ॥ ६८ ॥

पादावष्टाक्षरौ तृतीयोद्वादशाक्षरः चतुर्थपंचमौचाष्टाक्षरौ सात्रिष्टुप्यवमध्याज्ञेया। इद्धग्निरग्ने अर्चिभिः ।

सोच्चिन्नुसनेमिश्रुध्ये वक्रौलन्यद्धाग्निनेंद्रेण । नमोवाकेबृहद्भिश्च ताऋचोचनिदर्शनं ॥ ६९ ॥

उक्तप्रायमेतत् ।

पंचाशज्जगतीद्व्यूनाचत्वारोद्वादशाक्षराः । तदस्यावहुलंवृत्तम् ॥ ७० ॥

द्वाभ्यामूनानि पंचाशदक्षराणि जगतीनामभवति । चत्वारःपादा द्वादशाक्षरा भवंति । वहुलंतद्वृत्तंजगतीप्रायेणभवतीत्यर्थः । अस्याउदाहरणं । प्रदेवमच्छामधुमंतइन्दवः ।

महापंक्तिः षडष्टकाः ॥ ७१ ॥

यस्याःपादाषट् अष्टाक्षराभवंति साजगती महापंक्तिरित्युच्यते ।

अष्टकौसप्तकः षट्कोदशको नवकश्च वा ॥ ७२ ॥

द्वौपादौ अष्टाक्षरौ एकःसप्ताक्षरः अपरःषडक्षरः । दशाक्षरोन्यः । इतरेनवाक्षरोभवति सावामहापंक्तिः । सेहानउग्रपृ । सूर्येंविषं ।

महासतोबृहत्यर्द्धे व्यूहयोरेतयोःसह । संपातेत्वेतिपादांते दैववान्साम्नविंशके ॥ ७३ ॥

एतयोर्ऋचो र्महापंक्त्योः अर्द्धेसहद्वादशाक्षरयोः पादयोः सहव्यूहयोरिवसतोः द्वादशाक्षरौ त्वयस्त्वाष्टाक्षरा अनिमेन यस्याः सामहासतोबृहतीनाम जगतीवेदितव्या । । अस्माकमुभे यदिंद्रसेहान उग्रेतिषट् । आयःपप्रौच विश्वासांताऋचोत्वनिदर्शनं । अस्माकमु प्रभूतये । उभेयदिंद्ररोदसी । सेहानउग्रपृतनाइति षडेतामहापंक्तयः । आयःपप्रौ भानुनारोदसीउभे । विश्वासांगृहपतिर्विश । एतेमहासतोबृहत्यौ ॥ १० ॥

इतिश्री पार्षदव्याख्यायामानन्दपुरवास्तव्य वज्रटपुत्रोव्वटकृतप्रातिशाख्यभाष्ये षोडशपटलं समाप्तम् ।

द्वावतिछंदसां वर्गाउत्तरौ चतुरुत्तरौ ॥ १ ॥

जगत्याउत्तरावतिछंदसांद्वौवर्गौ चतुरुत्तरौ वेदितव्यौ-

प्रथमातिजगत्या सांसाद्विपंचाशदक्षरा ॥ २ ॥

आसांप्रथमाया द्विपंचाशदक्षरा अतिजगतीनामवेदितव्या । यथा । तमिंद्रंजोहवीमिमघवानमुग्रं ।

षट्पंचाशत्तु शक्वरी ॥ ३ ॥

षट्पंचाश दक्षराशक्वरी भवति । प्रोष्वस्मैपुरोरथं: ।

षष्ठिरेवाति शक्वरी ॥ ४ ॥

षष्ट्यक्षराणि अतिशक्वरीभवति । सुषुमायातमद्रिभिः ।

उत्तराष्टि श्चतुःषष्टिः ॥ ५ ॥

तस्याउत्तरा या अष्टिःसाचतुःषष्टि रक्षरैर्भवति । साअष्टिर्नाम । त्रिकद्रुकेषु महिषोयवाशिरं ।

ततोऽष्टाषष्टिरत्यष्टिः ॥ ६ ॥

ततउत्तरा अष्टाषष्टिरक्षराणि साऽत्यष्टिर्भवति । अयारुचाहरिण्यापुनानः ।

धृतिःपूर्वा द्विसप्ततिः ॥ ७ ॥

अतिधृतेः पूर्वायाद्विसप्तत्यक्षरासाधृति र्भवति । सखेसखाय मभ्याववृत्स्व ।

षट्सप्तति स्त्वतिधृतिः ॥ ८ ॥

यस्याःषट्सप्तत्यक्षराणि भवंति साऽतिधृतिः । सहि शर्द्धोन मारुतं तु विष्वणिः ।

सर्वादाशतयीष्वेताः ॥ ९ ॥

एता अतिजगत्यादयः सर्वादाशतयीषुविद्यंते ।

उत्तरास्तु सुभेषजे ॥ १० ॥

उत्तरायावक्ष्यंते ताःसुभेषजे ऋचोद्रष्टव्याः ।

कृतिःप्रकृतिराकृतिर्विकृतिः संकृतिस्तथा । षष्ठीचाभिकृति र्नामसप्तम्युत्कृतिरुच्यते ॥११॥

एताः कृत्यादयः सप्तताःयाःसुभेषजेउक्ताः ।

अशीति श्चतुरशीति रष्टाशीति द्विर्नवतिः । षण्णवतिः शतं पूर्णमुत्तमातु चतुःशतं॥१२॥

कृत्यादीना मक्षरपरिमाणानि क्रमेण । अशीतिः ८४ । ८८ । ९२ । ९६ । १०० । १०४ ॥

तमिंद्रं प्रोषुसुषुमत्रिकद्रुके षवयाऋचा । सखेचसहिशर्द्धश्च मध्यमोवर्ग उच्यते ॥ १३ ॥

तास्तुयथाक्रमं पुरस्ता त्तत्तल्लक्षणे उदाहृताः ।

आसुकृतिस्तुप्रकृतिर्ध्रुवं पूर्वात-

तस्तुया । आकृति र्यदितेमाता-
मेषी विकृतिरुच्यते । संकृतिस्तु
नवैतत्र देवो अग्निस्त्वभिकृतिः ।
सर्वमित्युत्कृति स्तत्र तृतीयो-
वर्ग उच्यते ॥ १४ ॥

कृतिः । आसुरैरुपरावतइति । प्रकृतिः भुवंपूर्वेति । ततःप्रकृतेः पराआकृतिर्यदितेमात्रेति । मेषीविकृति रुच्यते । संकृतिस्तु नवैतत्र । तस्मिंस्तुभेषजेपि नविद्यते । एवंप्रायेणवर्णयंति । केचिद्वर्णयंति संकृतेर्नवाइत्येतदुदाहरणं । अभिकृतिः । देवोअग्निःस्विष्टकृदिति । उत्कृतिःसर्वस्येति । अपदक्रमेआम्नातत्वादिहसंज्ञाभिरुदाहृताः अथास्यास्तुत्कृतौ तृतीयोवर्गःसमाप्यते । (१)

एवंक्रमप्रमाणानां छंदसामुप-
दिश्यते ॥ १५ ॥

एवंचतुर्विंशत्यक्षरादीनां क्रमप्रमाणानांचतुरुत्तराणां चतुःशतपर्यंतानामेकविंशतिछंदसां कश्चिद्विशेष उपदिश्यतेकोसौ विशेषः ।

एकद्व्यूनाधिकासैव निचृदूना-
धिकाभुरिक् ॥ १६ ॥

---

(१) इति श्रीपार्षदव्याख्यायामानंदपुरवास्तव्यवज्रटपुत्रउवटकृते प्रातिशाख्यभाष्ये षोडशंपटलं समाप्तम् इतिकपुस्तकपाठः ।

एकेनऊनानिचृद्भवति एकेनवाधिकासाभुरिग्भवति । यःशुक्रइवसूर्योनिचृत् । परिधामानियानितेभुरिक् ।

विराजस्तूत्तरस्याहुर्द्वाभ्यांयावि-
षयेस्थिताः । स्वराजएवं पर्व-
स्ययाः काश्चैवंगताऋचः ॥ १७ ॥

द्वाभ्यामक्षराभ्यां याऋचोधिका न्यूनावाविषयेमध्येस्थिताः उत्तरस्यपूर्वस्यचछंदसःविराजस्ताआहुरुत्तरस्य । स्वराजःपूर्वस्य । यथाषड्विंशत्यक्षराऋचोगायत्रीप्रायेस्वराज्योगायत्र्योभवंति । उष्णिक्प्रायेषु विराजउष्णिहोभवंति । यथा । ओषासवितर्यस्यतेइतिस्वराड्गायत्री । पतिर्विमानुषाणामिति विराडुष्णिक् । उत्तरत्रापि । याःकाश्चैवंगता एताएवऋचोभवंति ।

याः कश्चिद्बहुपादास्तु गाय-
त्र्योहीनतांगताः अक्षरैर्बहुभि-
स्तास्तु गायत्र्यउपधारयेत् ॥१८॥

गायत्र्यः द्वाभ्यांत्रिभिश्चतुर्भिः पंचभिर्वान्यूनाःसत्योगायत्र्यएवविराजो भवंति । पूर्वस्यछंदसोऽभावात् । भगवता उभयछंदसां मध्येत दृतं ।

ताराट् विराट् स्वराट्सम्राट्-
स्ववशिनी परमेष्ठी । प्रतिष्ठा-
प्रत्नममृतं वृषाशुक्रं जीवंपयः ।

ट्समवर्णौ भौभौबुवायांपस्वोदकमुत्तमं ॥ १९ ॥

विषयेस्थिता: द्वाभ्यांताद्गमा: तारात् । विराट् । स्वराट् । सम्राट् । स्ववशिनी । परमेष्ठी । प्रतिष्ठा । प्रवम् । अमृतं । वृषा । शुक्रं । जीवं । पयः । ट्सं । अपः । अंशः । अम्भः । अंबु । वारि । आपः । उदकं । भूति । यथाएकविंशतिर्विराजस्य । द्वाविंशत्यक्षराद्योद्विशताक्षरपर्यंता:एवंस्वराजः ।

दैवतंछंदसामच्चवक्ष्यतेततउत्तरं । अग्नेर्गायत्र्यातोधिदैभक्त्यादैवतमाहुः । समानांछंदसामृचौ ॥ २० ॥

ताराडादीनांछंदसामुत्तरंगायत्र्यादीनांछंदसांचदेवता:कथ्यंते । अग्नेर्गायत्र्यभवत्सायुग्वेत्यारभ्यदेवत्यौछंदसां भक्त्या।दैवतमाहुःसमानां । तस्मादग्नेर्गायत्रीभवति । सावित्रीउष्णिक् । सौमीअनुष्टुप् । बृहतीबार्हस्पत्या । मैत्रावरुणीविराट् । ऐन्द्रीत्रिष्टुप् । वैश्वदेवीजगती । छंदसांदैवतज्ञानेधर्म:प्रयोजनं । भवत्येवसंशयेछंदसांदैवतेनाध्यवसायः । यथातवस्वादिष्टा । त्रिपाद:सत्यादुत्युष्णिगनुष्टुभोमंधीराघृतवपूतमितिषड्भिःशंयवरेद्वृचौदैवतेनस्वराजौगायत्र्यावध्यवसीयेतेनविराजावुष्णिहौ ।

नपंक्तेः ॥ २१ ॥

पंक्तेर्दैवतमेतेऋचौनाहतुः । सप्तसुमधेरयस्मात्पंक्तिस्तस्मादिदमुच्यते ।

सातुवासवी ॥ २२ ॥

सापंक्तिर्वासवीवेदितव्या । १ ;

प्राजापत्यास्त्वतिछंदाः ॥ २३ ॥

याश्चतिछंदाश्चतिछंदांसिश्चतिजगत्यादीनितानिप्राजापत्यानिज्ञेयानि ।

विछंदावायुदैवता ॥ २४ ॥

याविछंदाऋक्सावायुदैवतावेदितव्या । विछंदाश्चवांतरभेदाः पदपंक्तिः पुरउष्णिगाद्याः तावायथाज्ञेयाः ।

द्विपदापौरुषंछंदः ॥ २५ ॥

याद्विपदाऋक्सापौरुषीवेदितव्या ।

ब्राह्मीत्वेकपदास्मृता ॥ २६ ॥

याएकपदाऋक्साब्राह्मीस्मृता ।

एतेनैवक्रमेणैषांवर्णतोभक्तिरुच्यते ॥ २७ ॥

येनक्रमेणछंदसांदैवतमुक्तंतेनैवक्रमेणैषांवर्णतोभक्तिरुच्यते ।

श्वेतंचसारंगमतःपिशंगंकृष्णमेवच । नीलंचलोहितंचैवसुवर्णमिवसप्तमं । अरुणंश्यामगौरंचंबभ्रुवैनकुलंतथा ॥ २८ ॥

श्वेतंशंखवर्णंगायत्रं । द्विवर्णंशुक्लकृष्णसारंगमौष्णिहं । पिशंगंरोचनावर्णमानुष्टुभं । कृष्णमगुरुवर्णं बार्हतं । नीलमुत्पलवर्णं वैराजं । लोहितमिन्द्रगोपवर्णं त्रैष्टुभं । सुवर्णंरूपवर्णं जागतं । अरुणं प्रातःसंध्याभवर्णं पांक्तं । श्यामं कृष्णवर्णं अतिछंदः । गौरं सिद्धार्थवर्णं विछंदः । बभ्रु कपिलवर्णं द्वैपदंछंदः । नकुलवर्णं एकपदंछंदः । एतावतोदेवताः क्रमेणविधिः ।

पृश्निवर्णं वैराजं ॥ २९ ॥

पृश्निवर्णं बहुवर्णंचित्रं वैराजम् । अथकस्माद्वैराजस्य द्विवर्णोपदेशः क्रियते । तत्र क्रमेणैवनीलत्वं सिद्धम् । नसिध्यति । कथं । एतास्तिस्रोविराजः अनुष्टुबेकापंक्तिरेका । द्वाभ्यांन्यूनाचैका । तत्र पूर्वयोर्नीलवर्णः । अस्याः पृश्निरितिवेदितव्यं । एवमपि कथमेतदध्यवसीयते पूर्वयोः नीलः । अस्याः पृश्निरिति । निचृद्भुरिजोर्न्यूनाधिकयोः समीपोपदेशात् अस्याः पृश्निरिति । परिशेषादितरयो नीलइत्यध्यवसीयते । तयोरप्येके क्रमात्पंक्तेरेवविराजो नीलत्वम्मन्यन्ते ।

निचृच्छ्यावं ॥ ३० ॥

कृमिदूषितपत्रवर्णं निचृद्भवति ।

पृषद्भुरिक् ॥ ३१ ॥

विद्रुमवत् भुरिग्भवति ।

ब्रह्मसामगर्य्यनुष्टुप्छन्दः कपिलंवर्णतः स्मृतं ॥ ३२ ॥

ब्रह्मणःसामगर्य्यनुष्टुभश्छन्दः वर्णतः कपिलं जटाकलापसूर्यरश्मिवर्णं स्मृतं ।

मा प्रमा प्रतिमोपमा समाच चतुरक्षरात् । चतुरुत्तरमुद्यन्ति पञ्चछन्दांसितानिह ॥ ३३ ॥

मा । प्रमा । प्रतिमा । उपमा । समाचेति । चतुरक्षराच्चतुरुत्तराणि तानिगायत्र्याः पूर्वाणि पञ्चछन्दांसि वेदितव्यानि ।

हर्षिका सर्षिका(१) सर्वमाचा विराट्कामा । द्व्यक्षरादीनि मादीनां वैराजान्यनुचक्षते ॥ ३४ ॥

इत्येतानिद्व्यक्षरादीनि चतुरुत्तराणि अष्टादशाक्षरपर्यंतानि मादीनां वैराजान्यनुचक्षते आचार्याः ।

---

(१) मर्षिकेत्यपिक पुस्तक पाठः ।

अक्षराण्येवसर्वत्र निमित्तं बलवत्तरं । विद्याद्विप्रतिपन्नानां पादवृत्ताक्षरैर्ऋचां ॥ ३५ ॥

पादैर्वृत्तै रक्षरैश्च विप्रतिपन्नामृचां सर्वत्रबलवत्तरं । निमित्तं अक्षराण्येवविद्यात् । यथा । सूर्येविषमासजामि । पादैर्विप्रतिपन्नास्तिस्रो ऽक्षरैर्जगत्योध्यवसीयन्ते । नवानांनवतीनामिति पंक्तिः । अभ्रप्रुषो नवाचाप्रुषावसुइति । वृत्तैर्विप्रतिपन्नाक्षरै स्त्रिष्टुबध्यवसीयते । यथायास्ते प्रजाअमृतस्येत्यनुष्टुप् । यथा च येनः सपत्नाअपते भवन्त्विति त्रिष्टुप्प्रायेचाक्षरैरेवजगत्यध्यवसीयते । तथा मांधुरिन्द्रंनामदेवतेतिजगतीप्रायवृत्ताभ्यां विप्रतिपन्नापित्रिष्टुप् ।

व्यूहेदेकाक्षरीभावान्पादेषूनेषु संपदे ॥ ३६ ॥

ऊनेषुपादेषु संपदिकर्त्तव्यायां एकाक्षरीभावांत्संधीन्व्यूहेत्पृथक्कुर्यादित्यर्थः । प्रेताजयतानरः । सास्माकेभिरेतरीनशूषैः । ऊनेष्विति किं । सेमंयज्ञंमधुमन्तं कृधीनः । संपदइति कस्मात् । आदूनायामोपनव्यन्त इन्द्र मित्यत्र नयएकीभावापूर्वस्यैव व्यूहेनसंपत्सिद्धेरुत्तयोर्नकर्त्तव्योभवति ।

चैप्रवर्णांश्चसंयोगान्व्यवेयात्सदृशैः स्वरैः ॥ ३७ ॥

चैप्रवर्णांश्चसंयोगान्सान्तस्थान्संयोगानित्यर्थः। व्यवेयात्व्यवधानंकुर्यादित्यर्थः। सदृशैः समानस्थानैः स्वरैः। त्र्यंबकंयजामहे। उद्वत्स्वस्माअकृणोतनातृणङ्गोर्नंपर्वंविरदातिरश्चा। पादेषूनेष्विति छन्दसः संपदेइत्ययेवानुवर्त्तते। ऊनेष्वितिकस्मात्। प्रत्यग्रभीष्मनृतमस्यनृणां। संपदइतिकस्मात्। अगोह्यस्य यदसस्तनागृहे इत्यत्रद्वौचप्रवर्णौयौतत्रपूर्वस्यसंपत्तिसिद्धेरुत्तरस्मिन्नकर्तव्यो भवति। अथकेचित् चैप्रसंधिकृतानं तस्थासंयोगान् व्यूहेत्। एकाक्षरीभावानिति। एवंसिद्धे इति मन्यंते तषां उद्वत्स्वस्माअकृणोतनातृणमिति व्यूहः कर्तव्यः। तत्सदृशैः स्वरै र्व्यवायः। अस्तुयेस्वाभाविका अन्तस्थसंयोगा स्तेतूदाहरणत्वे नभवन्ति। यथात्वमद्भ्यस्त्वमश्मनस्परिइति। गोर्नंपर्वंविरदातिरश्चेति अयंव्यवायः यकारवकारसंयोगे एवेष्यते। रेफलकारसंयोगयोर्न। कथंज्ञायते। अयंभुवोरयोर्याचिकेतयत् इत्यत्र दीर्घत्वप्रतिषेधार्थं जामिषुजासुचिकेतेति चिकेतशब्दस्यपाठात्।

पदाभेदेन पादानां विभागोभि-
समीच्यतु। छन्दसः संपदं
तांतां यांयां मन्येत पादतः॥३८॥

छन्दसःपादतो यांयां संपदं मन्येत तांतां सम्यक्पूर्वमभिसमीक्ष्य पादांश्चपश्चात्पदानामभेदेन पादानांविभागः कर्तव्यः। यद्यप्युत्तरैः पादज्ञानहेतुर्विरोधो भवति। यथा माध्यन्दिनस्य सवनस्यवृत्रहन्ननेद्ये-

तयोः पादयोः पदभेदेनाष्टाक्षरयोः क्रियमाणयोः यद्यपिप्रायवृत्तसंपद्भवति। अनादृत्यतां माध्यंदिनस्य सवनस्येत्येवंविभागः कर्त्तव्यः। एकारालस्य भुवनस्येत्येवमेव।

प्रायोर्थोवृत्तमित्येते पादस्थानस्यहेतवः॥ ३९ ॥

प्रायः अर्थः वृत्तः एतेपादस्थानस्य हेतवोभवन्ति। त्रिष्टुभः प्रायो गोर्नपर्वविरदेति। दशाक्षरोव्यूहेनैकादशाक्षरः क्रियते। तथा अर्थः। सगृणानो अद्भिर्देववानिति। तथावृत्तम्। अलाय्यस्य परशुर्नवाशतोमिति प्रकृत्या एकादशाक्षरोविकर्षेण द्वादशाक्षरः क्रियते। वृत्तादेव अर्योगिरः सद्यआजग्मुषीरिति पादांतः।

विशेषसंनिपातेतु पूर्वंपूर्वं परंपरं॥ ४० ॥

एतेषामेवविशेषाणां संनिपातेतु पूर्वंनिमित्तं पूर्वंभवति। परंनिमित्तंपरंभवति। पूर्वोहितूत्तराद्बलीयानित्यर्थः। एवंचकर्थंमनवेस्योनानित्यत्र प्रायोर्थयोर्विरोधे प्रायो बलीयस्त्वादस्मात्स्योनानितिपादांतः। येषां पुनरर्थोबलीया स्तेषांमनवे स्योनान्यथइतिपादांतोगम्यते। प्रायबलीयस्त्वादेव ऊर्ध्वोवाजस्य सनितायदंजिभिरिति पादांतःनसनिता। प्रायवृत्तविरोधे प्रायबलीयस्त्वा त्प्रत्नग्रभीष्मन्तमस्य नृणामितिपादांतः एकादशाक्षरएवभवति वृत्तादिकृष्यते। अर्थवृत्तविरोधे-

ऽर्थबलीयस्त्वात् यदग्नेस्यामहंत्वंइतिपादांतः । नहस्तादहमिति । एवंसर्वंबलाबलमभिसमीक्ष्य पादंनिह्रासेत् । २ ।

अनुदात्तंतु पादादौ नोवर्जं विद्यते पदं ॥ ४१ ॥

चतुःषष्ट्यां पादादावनुदात्तंपदं नविद्यते । उकारस्तुविद्यते । यथाउलोककृत्नुमद्रिवोहरिश्रियं । उलोकोयस्मैअद्रिवः । अयमपि पादांतज्ञानहेतुरेव । सर्वहेतुभ्यो बलवत्तरः । तस्मात्सर्वान्बाधित्वा वतोवतासियमनैवतइतिपादांतः । तथाचनायत्व मवसीतिपादांतः ।

पादादावनुदात्तंतु यदन्यत्तदिहोदितं ॥ ४२ ॥

तुपुनः पादादीयान्यनुदात्तानिपदानि तान्याचार्यः सूत्रेपठति । वश्मिस्तौयच्चसीत्यादयः ।

वश्मिस्तौयच्चसीत्येकं ॥ ४३ ॥

इदंचैकमनुदात्तं पदमस्तिवश्मि ऋचौपादादावनुदात्तं पदमस्ति । इयच्चसिगायेत्वा नमसागिरा ।

त्वेचाभिष्टइत्यपि । नेति पूर्वाणिसर्वाणि ॥ ४४ ॥

आभिष्टइतिच त्वेनेति पूर्वाणिसर्वाणि । आभि-

ष्टेम्बह्येत्येतस्मिंस्तृचे ऽनुदात्तानिसर्वाणिसंति । स्तनयंतिशुष्माः । रोचतउपाके । रोचतस्वधावः ।

मधुछंदस्यृतावृधौ ॥ ४५ ॥

मधुछंदसि ऋषौ ऋतावृधौ इत्येकमनुदात्तमस्ति । ऋतावृधावृतस्पृशेति ।

स्तोमशब्देपरे धायि ॥ ४६ ॥

स्तोमशब्देप्रत्यये ऽधायीत्येकमनुदात्तमस्ति । अधायिस्तोमः ।

ऋतशब्दे परे स्रिधत् ॥ ४७ ॥

ऋतशब्देप्रत्यये स्रिधदित्येकमनुदात्तमस्ति । मायज्ञोअस्य । स्रिधदृतायोः ।

हुवे तुराणां यत्पूर्वं ॥ ४८ ॥

हुवेतुराणामिति द्वैपदे यत्पूर्वंपद न्तदनुदात्तं । प्रियाणोनामहुवेतुराणां ।

तप न्मरुत उत्तरं ॥ ४९ ॥

तपन्मरुतेद्वैपदे यदुत्तरं तदनुदात्तमस्ति । आयत्तपन्मरुतोवावशानाः ।

प्रेदंब्रह्मेतिचैतस्मिन्सूक्ते पाठोस्तिपंचमः । सर्वानुदात्तः षट्-

स्वृद्वादित श्चतुर्दशः ॥ ५० ॥

प्रेदंब्रह्म वृत्रतूर्येष्वाविथेत्यस्मिन्सूक्ते सर्वानुदात्तः पादोस्तिपञ्चमः । सुतइन्द्रनेघेति । यस्यैवसूक्तस्यादितश्चतुर्दशः पादः सोपिसर्वानुदात्तोस्ति । ब्रसिष्ठचीपत इति । एवमिमे सप्तसर्वा उदात्ताः सन्ति मधुच्छन्दस्येकच्छताद्दृघाद्दतस्पृशेति । पामिद्दइति च तृचेएकः । रोचतस्वधावः इत्येताभ्यांसहनव । नदशमोभवति ।

पादौ गायत्रवैराजौ अष्टाक्षरदशाक्षरौ ॥ ५१ ॥

अष्टाक्षरदशाक्षरपादौ गायत्रवैराजौ विद्यात् ।

एकादशिद्वादशिनौ विद्या त्रैष्टुभजागतौ ॥ ५२ ॥

एकादशद्वादशाक्षरौ पादौ त्रैष्टुभजागतौ विद्यात् ।४।

वर्षिष्ठानिष्ठयोरेषां लघूपोत्तममक्षरं । गुर्वेवेतरयो र्कृत्स्नु त वृत्तं छंदसांप्राहुः ॥ ५३ ॥

एषांपादानां वर्षिष्ठानिष्ठयो रष्टाक्षरद्वादशाक्षरयोः पादयोः उपोत्तममक्षरं लघुभवति । यथा अग्निमीळेपुरोहितं । प्रदेवमच्छा मधुमंतइंदवइति । इतरो:य

दशाक्षरैकादशाक्षरयो: उपोत्तमंगुरुभवति । स्रुचीइवं विपिपानस्याद्रे: । पिबासोममभिय मुग्रतर्द: । छंदसां च्युतवृत्तमाहुराचार्या: ।

छंदांसिवर्तंते सर्वाण्यन्यै रतोल्पश: । एतद्विकारा एवान्ये सर्वेतु प्राकृता: समा: ॥ ५४ ॥

एतै:पादै: सर्वाणिछंदांसि वर्त्तंते । अत:एभ्योऽन्यैःपादैरल्पशोवर्तंते येत्वन्ये पादास्ते एतेषामेवपादानां विकारा भवंति । अष्टाक्षरात्पूर्वेपादास्ते गायत्रपादस्यविकारा भवंति । नवाक्षरोवैराजस्य विकार: यदिगुरूपोत्तम: । अन्यस्तु गायत्रस्यैव । त्रयोदशाक्षरप्रभृतिषु ये गुरूपोत्तमास्तेत्रैष्टुभस्य येलघूपोत्तमास्तेजागतस्य सर्वेतुप्राकृता: येसमा:पादा: तेसर्वेसमावेदितव्या: तेप्राकृता अष्टाक्षरादयश्चतुर्विधा: । यद्येवंनैतेसमा: बह्वोह्यष्टाक्षरा: अल्पीयांसोदशाक्षरादय: । यद्येवंसमाइत्येषांसंज्ञास्यात् । नसंज्ञाया: प्रयोजनमस्ति । एवंतर्हि अन्योर्थ: कल्प्यते । सर्वेतुप्राकृता:समा: तुशब्द:पक्षव्यावर्त्तक: यदुक्तमेतेषां विकाराअन्येपादाइति तन्न । तथासर्वेपादा: प्राकृताएवनान्योन्यस्यविकारा: । तस्मात्समा: नसंख्याकृतंतेषांसमत्वं । अपरे पुनरन्यथावर्णयंति । सर्वेतुप्राकृता:समा: । सर्वेअष्टाक्षरप्रभृतयश्चतुर्विधा:प्राकृता: समास्तुल्याभवंति । किमुक्तंभवति । नान्योन्यस्य विकाराभवंतीत्युक्तंभवति ।

एकएकपदैतेषां द्वौपादौ द्विपदोच्यते । तेतुतेनैवप्रोच्येते सरूपेयस्यपादतः ॥ ५५ ॥

तेषांचतुर्णां पादानां एकःपादःयस्याःसाएकपदा ऋगित्युच्यते । यथाऽमित्रयांयजमानोनहोता । तेषामेवचतुर्णां द्वौपादौयस्याः साद्विपदाऋगित्युच्यते । साधुर्नगृध्नुरस्ते°त्सुद्गति । तेनैवछंदसाप्रोच्येते तेद्विपदैकपदे । छंदसांमध्ये यस्यछंदसःपादतः सरूपेभवतः । यदिगायत्रस्य सरूपेभवतः । यदित्रिष्टुभःगायत्री द्विपदा त्रिष्टुबेकपदाइति ।

नदाशतय्येकपदाकाचिदस्तीति वैयास्कः । अन्यत्रवैमघाः सैकादशिनी मुखतोविराट् ॥ ५६ ॥

दाशतयेभवादाशतयी काचिदेकपदानास्तीति यास्काचार्योवैमन्यते । अस्माकं याःएकपदास्ताः सर्वासामृचां अध्यासान्मन्यंते । अंतानित्यर्थः । किमविशेषिणानेत्याह । अन्यत्र वैमघा एकपदायाःसातुस्यान्मुखतःवैमंद्रस्य । पादावित्यर्थः । दशिनीविराळेकपदास्त्येव ।

आहुस्त्वेकपदा अन्ये अध्यासानेकपातिनः । अध्यासानपिये-

केचित्त्वाहुरेकपदाइमाः २ आवांसुम्ने सिक्त्यांद्वे उरौदेवाः सिषक्तुनः ॥ ५७ ॥

इमान्युदाहरणानि । आवांसुम्नेवरिमन्सूरिभिःष्यां । असिक्न्यां यजमानोनहोता । उरौदेवा अनिबाधेस्याम । सिषक्तुन ऊर्जव्यस्यपुष्टेः । इति तानपिएकपातिनः अध्यासानन्येषाचार्याएकपदाआहुः । अग्निन्पाठान्तरेतानरेमित्येवमादीनांपुनः पदानां अनेकपादानां अध्यासानामेकपदाशंकैवनभवति । तस्मादुदाहरणान्युक्तानि ।

पादाएकाधिकाः सन्तिछंदसांचतुरक्षरात् । ५ । संत्यतिछंदसांपादाएकोत्कर्षेणजागतात् । षोडशाक्षरपर्यन्ता एकश्चाष्टादशाक्षरः ॥ ५८ ॥

छंदसाम्पादाश्चतुरक्षरात्प्रभृतिषोडशाक्षरपर्यंताः तेएकैकेनाधिकाः संतिएकोष्टादशाक्षरः नूनमथ । अग्नेनमद्य । ऋध्यामातषोहैः । नदंवषोदतीनां । अग्निमीळे पुरोहितं । तंत्वावयं पितोवचोभिः । सुधीहवंविपिपानस्याद्रेः । पिबासोममभिय मुग्रतर्दः । प्रदेवमच्छामधुमंतइंदवः । तमिंद्रंजोहवीमिमघवानमुग्रं ।

अपूरुषघ्नोअप्रतीतशूरसत्वभिः । अभित्यं देवंसवितारमोण्योः कविक्रतुं । त्रिकद्रुकेषुमहिषोयवाशिरंतुविशुष्मः । एते चतुरक्षरादारभ्य षोडशाक्षरपर्यंताः । अर्चामिसत्यसवं रत्नधामभिप्रियं मतिंकविं । एषचाष्टादशाक्षरः । केचित्पाठांतरं वर्णयंति आगतादारभ्याष्टादशाक्षरपर्यंताः पादा अतिछंदसांविद्यंत तेव्याख्यातादिति ।

एकादशैवछंदसि पादायेषोडशाक्षराः । सर्वे त्रिकद्रुकीयासुनाकुलोष्टादशाक्षरः ॥ ५९ ॥

छंदसि संहितायां येषोडशाक्षराः पादाः एकादशैवतेसर्वेत्रिकद्रुकीयासुदृश्यंते यथात्रिकद्रुकेष्विति सूक्तस्य प्रथमार्चिचत्वारः द्वितीयायांत्रयः पादाः चतुर्थ्यामेकः तृतीयायां त्रयः । एवं त्रिकद्रुकीयासु सर्वे भवंति । नकुलस्यार्षँअष्टादशाक्षरः । अर्चामिसत्यसवंरत्नधामभिप्रियंमतिंकविमिति ।

अवमंहोऽविकर्षेण ज्येष्ठोदाशतयीष्वृचाम् ॥ ६० ॥

अवमंह छंदेत्येषा अविकर्षेण सप्ताक्षरासाज्येष्ठामहती दाशतयीषुऋक्षु । बहूक्षरेत्यर्थः ।

विकर्षणात्तु पादैश्च संहिशर्द्ध-

तिस्मृता ॥ ६१ ॥

विकर्षेणतु षट्सप्तत्यक्षराभवति पादैश्चाष्टपदीभवति तस्माज्ज्येष्ठास्मृता । यद्धिमर्द्योनमारुतं तुविष्वणिरिति ।

कनिष्ठा बहुपादानां भारद्वाजी पुरुतमं ॥ ६२ ॥

बहुपादानां ऋचां मध्येकनिष्ठा अल्पाविंशत्यक्षरा भारद्वाजी पुरुतमंपुरूणां स्तोतॄणामिति । ऋषिग्रहणात्पुरुतमं पुरूणामीशानमिति मास्तु ।

अविकर्षेण सौभरी प्रेष्ठम्बादिक्कसीयसी ॥ ६३ ॥

अविकर्षेणसौभरिणा दृष्टाप्रेष्ठमुप्रियाणामित्येषाक्कसीयसी । अल्पाक्षरतराभवत्येकोनविंशत्यक्षरेति ।

विराजोद्विपदाः केचित्सर्वा आहुश्चतुष्पदाः । कृत्वापंचाक्षरान्पादां स्तांस्तथाक्षरपंक्तयः ॥५०॥

पश्वानता युंगुहाचतंतमित्येवमादयः । याविराजोद्विपदास्ताः सर्वाः पंचाक्षरान्पादान्कृत्वा चतुष्पदाश्चाहुः ।

इति श्री पार्षदव्याख्याया मा-

नंदपुरवास्तव्य वज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये सप्तदशपटलम् ॥ ६ ॥

वार्हतोबृहतीपूर्वः ककुप्पूर्वस्तुकाकुभः । एतौसतोबृहत्यंतौ प्रगाथौभवतोद्वृचौ ॥ १ ॥

योबृहतीपूर्वः सवार्हतः । ककुप्पूर्वोयः सकाकुभः । उभावेतौ सतोबृहत्यंतौ द्वृचौ प्रगाथौ भवतः ।

त्वमंगप्र प्रवोयह्व माचिद्बृहद्गायिषे । बार्हताः काकुभानाहुस्तंगूर्द्धयावयम्विति ॥ २ ॥

इमेते प्रगाथाः त्वमंगप्रशंसिषः प्रवोयह्वं पुरूणां । माचिदन्यद्विशंसत । बृहद्गायिषेवचः । काकुभानाहुः । तंगूर्द्धयास्वर्णरं । वयमुत्वामपूर्व्येति ---

अनुष्टुब्द्वैचगायत्र्या वेषम्यानुष्टुभःस्मृतः । विराजावभिसंपन्नः पद्याच्चर्य्येसउत्थितः ॥ ३ ॥

एकानुष्टुप्द्वेचगायत्र्यौ एषप्रगाथ आनुष्टुभः स्मृतः । विराजौद्वेअभिसंपन्नः । पद्याचाचर्या च । पादैरनुचरैश्चेत्यर्थः । दशपदाः सैकाविराट् । अशीतिरक्षराणि अच्चर्यास इतिप्रतीकं । सपूर्व्यौमहानामित्युत्थित इति प्रशंसाकृता । अन्येप्रगाथाः षड्भिः सप्तभिरष्टाभिर्वापादैर्भवति । अयं तु दशभिस्तस्मादुत्थितइति प्रशस्यते ।

आकृतिर्व्यपदेशानां प्रायआदितआदितः ॥ ४ ॥

आदितः प्रायेण प्रगाथः क्रियते । व्यपदिश्यते । बार्हतः काकुभआनुष्टुभइति तेषामादितोयच्छन्दस्तेनैवव्यपदेशः कृतो द्रष्टव्यः । नोभाभ्यां । यथागायत्रबार्हतइति ।

गायत्र्यादिस्तु बार्हते प्रायोगायत्रबार्हतः ॥ ५ ॥

गायत्र्यादिर्बृहत्यंतः एषप्रगाथः प्रायोगायत्रबार्हत उच्यते । यथात्वमिंद्रंदानमीमहे इति ।

गायत्रकाकुभोनाम प्रायोभवति काकुभे ॥ ६ ॥

गायत्र्यादिः ककुबंतः प्रगाथः गायत्रकाकुभोनाम वेदितव्यः यथासुनीथोघासमर्त्यंइति ।

औष्णिहउष्णिहापूर्वः पङ्क्त्या-

न्तः पाङ्क्तकाकुभः ॥ ७ ॥

उष्णिहापूर्वः सतो बृहत्यन्तः प्रगाथऔष्णिह इत्युच्यते यथा । यमादित्यासो अद्रुह इति । पंक्त्यंतःककुप्पूर्वः पांक्तकाकुभोनाम वेदितव्यः । यथा अदान्मे पौरुकुत्स्यः । १ ।

तमिन्द्रंच्चसुनीथस्य यमादित्यास एव च । अदान्मेपौरुकुत्स्यस्य ताश्चैवनिदर्शनं ॥ ८ ॥

पुरस्तादेवनिदर्शितान्युक्तानि ।

महासतो बृहत्यंतो योमहाबृहतीमुखः ॥ ९ ॥

समहाबार्हतोनाम । महासतोबृहत्यंतोयः प्रगाथ समहाबार्हतइत्युच्यते । यथातंवःशर्धं रथेशुभमिति ।

बार्हतोबृहतीमुखः ॥ १० ।

बृहतीमुखःजगत्यंतोयः प्रगाथःसबार्हतरथइत्युक्तमित्येव ।

अथो अतिजगत्यंतः ।

अपिचातिजगत्यन्तो बृहतीमुखोयोबार्हतएवसः । यथानेमिंनमंति चक्षसेति ।

यवमध्योत्तरोपि च ॥ ११ ॥

यवमध्योत्तरो बृहतीमुखो योवाहंतएवसोपि । यथा । वामौ वामस्य धूतयइति ।

बृहद्भिस्तंवोनेमिं चवामीवामस्य
ता ऋचः ॥ १२ ॥

पुरस्तादेवोदाहृताः ।

नहिते विपरीतान्तः ॥ १३ ॥

नहिते क्षत्रराधसइत्ययंप्रगाथो विपरीतांतः बृहतीमुखः विपरीतांतोनामवेदितव्यः ।

मोषुत्वाद्विपदाधिकः ॥ १३ ॥

मोषुत्वावाघतश्चनेति प्राकृतएवप्रगाथः द्विपदाधिको वेदितव्यः । रायस्कामो वज्रहस्तमित्येतया सहितोद्रष्टव्यः ।

अनुष्टुब्जगतीचैव विश्वंषामि-
रज्यंतं च ॥ १४ ॥

विश्वेषामिरज्यंतं वसूनामित्ययंप्रगाथः अनुष्टुप्पूर्वः जगत्यंतो वेदितव्यः ।

द्विपदाबृहतीचैव सनोवाजेष्वव-
तिस्मृतः ॥ १५ ॥

सनोवाजेष्ववितापुरूवसुरित्ययं प्रगाथः द्विपदापूर्वः बृहत्युत्तरः स्मृतः ।

काकुप्पूर्वस्तुकोविद स्मृतः काकुभबार्हतः ॥ १६ ॥

ककुप्पूर्वोबृहत्यंतः काकुभबार्हतो नामायंप्रगाथः स्मृतः । कोवेदजानमेषामिति । २ ।

आनुष्टुभौष्णिहंविद्यात्तेमआहुर्यआययुः ॥ १७ ॥

तेमआहुर्यआययुरित्ययं प्रगाथः । तमानुष्टुभौष्णिहं विद्यात् । अनुष्टुप्पूर्वा अपराउष्णिहाविति ।

तेनस्त्वाध्वं वृहत्यादिबार्हतानुष्टुभःस्मृतः ॥ १८ ॥

तेनस्त्वाध्वं तेवतेत्ययं प्रगाथो बृहत्यादिरनुष्टुबंतो बार्हतानुष्टुभःस्मृतः ।

अग्निंवः पूर्व्यमित्येषाऽनुष्टुप्पंक्तिरेवच ॥ १९ ॥

अग्निंवः पूर्व्यंगिरेतिप्रगाथोऽनुष्टुप्पूर्वः पंक्त्यन्तः आनुष्टुभःपांक्तइतिस्मृतः ।

यदध्रिगावो अध्रिगूककुप्च त्रिष्टुबेवच ॥ २० ॥

यदध्रिगावो अध्रिगूइत्येषप्रगाथः ककुप्पूर्वः त्रिष्टुबंतः काकुभस्त्रैष्टुभः स्मृतः ।

यदद्यवामनुष्टुप्चैवोपदिश्यते॥२१॥

यदद्यर्वा नामेत्ययंप्रगाथः अनुष्टुप्पूर्वः त्रिष्टुबुत्तरः आनुष्टुभः त्रैष्टुभःस्मृतः ।

यत्स्थोदीर्घेतिचत्वेषोबृहती त्रिष्टुबेवच ॥ २२ ॥

यत्स्थोदीर्घप्रसद्मनीत्येषप्रगाथः बृहतीपूर्वः त्रिष्टुबुत्तरबार्हतत्रैष्टुभइत्युच्यते ।

आयन्मावेनास्त्रिष्टुप्च जगतीचोपदिश्यते ॥ २३ ॥

आयन्मावेना अरुहन्नृतस्येत्ययं प्रगाथः त्रिष्टुप्पूर्वः जगत्युत्तरः त्रैष्टुभजागत इत्युपदिश्यते ।

ताबृधं तावनुष्टुप्च महासती(१)मुखेति च ॥ २३ ॥

महासतोमुखेति विराट्पूर्वा त्रिष्टुबुच्यते । ताबृधंतावनुष्टुभिनित्ययंप्रगाथो ऽनुष्टुप्पूर्वः त्रिष्टुबुत्तरः आनुष्टुभः त्रैष्टुभइत्युपदिश्यते ।

जागत स्त्वददा अभीँप्रगाथ स्त्रिष्टुबुत्तरः ॥ २४ ॥

अदद्दाअभीँमहते वचस्यवइतिप्रगाथः त्रिष्टुबुत्तरः

---

(१) मुखेविराड् इति कपुस्तकेपाठः ।

जागतइत्युपदिश्यते ।

उत्तरस्त्रैष्टुभ स्तस्मा ज्जगत्युत्तरउच्यते ॥ २५ ॥

तस्मादुत्तरःप्रगाथः इदंनमोवृषभाय स्वराजइति जगत्युत्तरः त्रैष्टुभइत्युच्यते । ३ ।

त्वमेतां जनचद्वौद्वौ सघाराजेतिच स्मृतौ ॥ २६ ॥

त्वमेतांजनराज्ञोद्विर्दशेति द्वौप्रगाथौ पूर्ववद्द्रष्टव्यौ । यथापूर्वोजागतः त्रिष्टुबुत्तरइत्युच्यते । तस्मादुत्तरःप्रगाथः यउदृचीन्द्रदेवगोपा इति त्रैष्टुभजागतइत्युच्यते । सघाराजासत्पतिः शूशुवज्जनइतिच द्वौप्रगाथौस्मृतौ पूर्वोजागतः त्रिष्टुबंतः । तुभ्येदेतेबहुलाअद्रिदुग्धा इति त्रैष्टुभो जगत्युत्तरः ।

त्वमस्यपारे रजसो जागतौ त्रिष्टुबुत्तरौ ॥ २७ ॥

त्वमस्य पारे रजसोव्योमनइति द्वौप्रगाथौ त्रिष्टुबुत्तरौ जागतौज्ञेयाविति ।

सव्यंजनः सानुस्वारः शुद्धोवापिस्वरोक्षरं ॥ २८ ॥

व्यंजनेनयुक्तः अनुस्वारेणसहितः अथवा ऽनुस्वारव्यंजनाभ्यांरहितःस्वरः अक्षरसंज्ञकोभवति ।

व्यञ्जनान्युत्तरस्यैवस्वरस्यांत्यंतु पूर्वभाक् ॥ २९ ॥

व्यंजनानि उत्तरस्यस्वरस्यैवांगं भवंति । तदस्य । तन्वः । यंतंतु व्यंजनं पूर्वमक्षरं भजेत् । तत् । वाक् ।

विसर्जनीयानुस्वारौ भजेते पूर्वमक्षरं ॥ ३० ॥

विसर्जनीयः अनुस्वारश्च पूर्वमक्षरंभजते । यःसोम । त्वंसोम ।

संयोगादिश्चैवंच ॥ ३१ ॥

संयोगादिर्वा पूर्वमक्षरं भजते । तस्य । यस्य ।

सहक्राम्यः परक्रमे ॥ ३२ ॥

क्रमेणसह क्राम्योवर्णः पूर्वमक्षरं भजते वा परक्रमे सति । सत्विम् । अर्कः । ऊर्ज्जं ।

तथा । पूर्वं पादेन पश्चाद्वाभ्यां । दृतेरिवते वृकमस्तु सख्यंइति ।

मध्येवसानंतु चतुष्पदानां ॥३३॥

चतुष्पदानां मध्येऽवसानं भवति गायंतित्वा गायत्रिणइति ।

त्रिभिः समस्तैरवरैःपरैर्वा ॥३४॥

त्रिभिः समस्तैः पादैः पूर्वमवसानं भवति । पादेनउत्तरं यथा एत शंसमिंद्रास्मयुष्टाम् । पादैर्वात्रिभिः परमवसानं भवति । पादेनपूर्वं अधीन्वत्र सप्ततिंच सप्तचेति-

पंक्त्यांद्विशोवा तत उत्तरेण
त्रिभिः परैर्वाविपरीतमेतत् ॥३५॥

पंक्त्यां पंचपदास्वित्यर्थः । द्विशः द्वाभ्यांद्वाभ्यां अवस्येत् । पादे नोत्तरमवसानं । अयंच क्रमिषवत्सूर्यस्येति । त्रिभिःपादैः परमवसानंवा । द्वाभ्यां पूर्वं । नकिष्टं कर्मणानशदिति । एतद्विपरीतं वा । त्रिभिः पूर्वंद्वाभ्यामुत्तरं । न किर्देवामिनीमसीति ।

द्विशस्त्रिशोवा परतश्चतुर्भिःस्यात्
षट्पदानामवसानमेतत् ॥३६॥

द्वाभ्यांद्वाभ्यां त्रिभिस्त्रिभिर्वा अवस्येत् विश्वान्देवान्हवामहे । एषातुकौषीतकीनां षट्पदाम्नाते अस्माकं यः पंचमः पादः सतेषां न विद्यते । अस्मिन्पक्षे उदाहरणं । त्रिशोवा । त्रिभिः २ अवस्येद्वा । संचपः परिषस्वजे । अथवा परतश्चतुर्भिरवस्ये द्वाभ्यांपूर्वं निष्कंवाघाकृणवते । एवंत्रिविध मवसानंषट्पदानां स्यात् ।

त्रिभिस्तु पूर्वं ततउत्तरंस्याद्वि-
शस्त्रिशोवा यदिवासमस्तं । द्वा-
भ्यां पुनः सप्त पदावसानं ॥३७॥

सप्तपदानां तु पूर्वमवसानं त्रिभिः पादैः स्यात् । तस्मादुत्तरं द्विशः । यथा सुषुमायातमद्रिभिरिति । विशोवा यदि पूर्वमवसानं तदा उत्तरं समस्तं । चतुर्भिरित्यर्थः । अस्यानुवृत्तिः पूर्वसूत्राद्वा यथा नहिवांविव्रयामहइति । द्वाभ्यां पुनः पूर्वमवसानं उत्तरंसमस्तैः पंचभिः स्यात् । प्रोष्वस्मैपुरोरथमिति ।

द्वाभ्यांच मध्येष्टपदासु विद्यात्॥३८॥

अष्टपदासु ऋक्षुमध्येद्वाभ्यामवसानं स्यात् । परिशेषादाद्यन्तयो स्त्रिभिस्त्रिभिरवसानं भवति । सहिशर्द्धोनमारुतंतु विष्वणिरिति । अग्निमीले हूतेरिवगायंत्यं तमधीन्विति । अयं चक्रं नकिष्टंच नकिर्हैंवामिनीमसि । विश्वान्देवान्हवामहे मत्स्यपोनिष्कं सुषुम । नहित्वां प्रोषुसहिशर्द्धस्य तास्वृचोऽत्रनिदर्शनम् । यथाक्रमं पुरस्तादेव निदर्शितानि ।

द्वाभ्यांपादेनद्वाभ्यांतु तवत्यर्यंचपदाष्टिः । अव्यूहेनातिशक्वरी तृतीयःषोडशाक्षरः ॥ ३९ ॥

द्वाभ्यामवस्येत् । ततःपादेन । पुनर्द्वाभ्यां । तवत्यन्नर्यंन्नृतोयवृंद्रे त्यत्रावसानं । सेयं पंचपदा अष्टिर्विज्ञेया । अव्यूहेनातिशक्वरी । अस्यास्तृतीयः षोडशाक्षरः ।

चतुर्भि स्ततएकेनाग्ने तमद्य-

तिच ॥ ४० ॥

चतुर्भिःपूर्वमवसानं ततएकेन । अग्नेतमद्याश्वंनस्तोमैरिति ।

चतुर्भिस्तुपरं द्वाभ्यां तवस्वादिष्ठातच्छंयोः ॥ ४१ ॥

चतुर्भिः पूर्वमवसानं परंद्वाभ्यां । तवस्वादिष्ठाग्नेसंदृष्टिः । तच्छंयोरावृणीमहे ।

भरद्वाजाय तच्चक्षुरथोवृषा दृतेरिव । एतासु नत्ववस्यंत्येके द्वादशकादिषु ॥ ४२ ॥

एतासु ऋक्षु एके अवसानंनकुर्वंति । भरद्वाजायावधुक्षत द्विताधेनुं च । तच्चक्षुर्देवहितं शुक्रमुच्चरत्पश्येम । अथोन्वस्यसप्ततिंच सप्तचमधोदिदिष्ट । वृषास्विन्न अभिपित्वे अराराणुगांमृदृतेरिवतेऽवृकमस्तु सख्यमच्छिद्रस्य । प्रश्नस्तृच इत्युक्तौ ओँकारपटलेश्लोकौ । अवच । तत्रैवव्याख्यातौ ।

सर्वाणिभूतानि मनोगतिश्च स्पर्शाश्च गंधाश्च रसाश्चसर्वेशब्दास्स्वरूपाणिच सर्वमेत त्त्रिष्टुब्जगत्यौ समुपैतिभक्त्या ॥ ४३ ॥

सर्वाणिभूतानि । मनःगतिःस्पर्शाःगंधाःसर्वेरसाः । ब्दाःरूपाणीत्येतत्सर्वं त्रिष्टुप्जगत्यौ भक्त्यासमुपगच्छंतिय

गुर्वक्षराणांगुरुवृत्तिसर्वं गुर्वक्षरंत्रैष्टुभमेवविद्यात् ॥ ४४ ॥

यत्किंचित्स्थावरं जंगमं गुरुवृत्ति । तत्सर्वंगुर्वक्षरमेव किंपुनर्गुर्वक्षरं । त्रैष्टुभमिति ।

लघ्वक्षराणां लघुवृत्तिसर्वं लघ्वक्षरं जागतमेवविद्यात् ॥४५॥

यत्स्थावरं जंगमंलघुवृत्ति । तत्सर्वंलघ्वक्षरमेवविद्यात् । किंपुनर्लघ्वक्षरं । जागतमिति ।

यश्छंदसां वेदविशेषमेतं भूतानिचत्रैष्टुभजागतानि । सर्वाणिरूपाणिच भक्तितोयः स्वर्गंजयत्येभि रथामृतत्वं ॥ ४६ ॥

योब्राह्मणः छंदसामेतं विशेषं वेद भूतानिचत्रैष्टुभजागतानिचयोवेद । सर्वाणिरूपाणि च । किमिति । योष्टादशाध्यायानां वयाणां चाभ्यासंकरोतिभूतानि च त्रैष्टुभजागतानिसर्वाणि रूपाणि च भक्तितः सस्वर्गंजयत्येभिरथामृतत्वं । एवमेवाचार्याणां नमस्कारंदद्यात् शास्त्रांतेचा चार्याणां नमस्कारउपपद्यते । तस्माच्छास्त्रत्वं मुखेशास्त्रत्वे चाप्तवत्संज्ञानि

वर्त्तयति । एवमशास्त्रभाव प्रदर्शनार्थं संबंधङ्करोति । संबंधप्रयोजनं पूर्वमुक्तमेव । नित्योऽयंवेदः । कः पुनरनित्यत्वेप्रसंगः । सर्वाणि श्रौतानि इमानिच स्मार्त्तान्यपूर्वैः सहातुल्यत्वात्स्यादनित्यत्वं । तस्मान्नित्यत्वं । नैषदोषः । एतस्य समाम्नायस्य वितान इतिवीर्यं नियम आरम्भः सएतेष्वपि प्रसज्यते । वैतानिकसंज्ञानामेष्विति नियमे ममाग्नेवर्चइति यथेत्यनंवर्चो वैश्वदेवः प्रयुज्यते । ममाग्नेवर्चइति प्रत्यृचंसमिद्धइव सर्वत्रेष्यते । अग्न्याधेयोत्तरं कालंच नैवनिवर्त्तयितव्याः कथं प्राप्तिः सास्वते तैः पूर्वेहाद्याध्यायाः शौनकस्य । अमीचत्वार आश्वलायनस्य एवमप्राप्तसंज्ञाकिमिति निवर्तयति सकलं पुनर्नानाशास्त्रमादाय रामाचार्यप्रदर्शनाच्च स्वामिकुमारपुत्रे मुद्गले मनुधीमता क्रियमाणाय दं दत्तं । भ्रात्रे शिष्यायधीमते त्रैष्टुभजागतानि योवेद भक्तितः सस्वर्गलोकं जयति । एभिः छंदोभिः अथ अमृतत्वंच गच्छति इत्याह भगवान् शौनकः । श्लोकाः । गायत्र्यादीनिछंदांसि सोमेनवाहृतः पुरा ॥ १ स्वर्ग्यं यशस्य मायुष्यं पुण्यं वृद्धिकरं शुभं । कीर्त्तिमृग्यं यशस्यञ्च छंदसांज्ञानमुच्यते । २ ।

इति श्री पार्षदव्याख्याया मानंदपुरवास्तव्य वज्रटपुत्रोव्वटकृतौ प्रातिशाख्यभाष्ये अष्टादशं पटलं समाप्तम् ।

समाप्तोयं ग्रंथः ।

जटा माला शिखा रेखा ध्वजो दंडो रथो घनः । अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः ॥१॥ ब्रूयात्क्रमविपर्यासंक्रममीदृग्विनिर्दिशेत्।जटाख्यांविकृतिंधीमान्विज्ञायक्रमलक्षणम ॥२॥ क्रमविपर्यासक्रममित्यस्यैव प्रपंचं विवक्षुः पूर्वोक्तमर्थमनूद्य विशेषमाह ॥ अनुलोम विलोमाभ्यां त्रिवारं हि पठेत्क्रमम् । विलोमेपदवत्संधिरनुलोमेयथाक्रमम् ॥३॥ अनुलोमे आद्यन्तक्रमयोः पाठेयथा क्रमंप्रातिशाख्योक्तलक्षणविशिष्ट क्रमका लीन संध्यनतिक्रमेण संधिर्ज्ञातव्या । विलोमे अनुपदवत्पदेन तुल्यम । ब्रूयात्क्रमविपर्यासावर्द्धर्चस्यादितो न्ततः । अंतं चादिंनयेदेवं क्रममालेतिकीर्तिता । ४ । पदोत्तरां जटामेव शिखामार्याः प्रचक्षते । क्रमाद्वित्रिचतुः पंच पदक्रममुदाहरेत् ।५। पृथक्पृथग्विपर्यस्य रेखामाहुः पुनः क्रमात् । ब्रूयाद्दादेः क्रमं सम्यगं तादुत्तारयेदिति॥६॥वर्गौवा ऋचिवा यत्पठनं सध्वजः स्मृतः ।क्रममुक्त्वाविपर्यस्य पुनश्चक्रममुत्तरं ७ अर्धर्चादेवमुक्तोऽयं क्रमदंडाभिधीयते । पादशोऽर्धर्चशोवापिसहोक्त्यादंडवद्रथः ।८। अंतात् क्रमंपठेत्पूर्वं आदिपर्यन्तमानयेत्। आदिक्रमंनयेदन्तं घनमाहुमनीषिणः।९। लोक प्रसिद्धद्वितीयघनलक्षणमाह । शिखामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत् । अयं घन इति प्रोक्त इत्यष्टौविकृतीः पठेत् । १० । इति जटादिविकृतीनां लक्षणकारिकाः ।

BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS:
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
Nos. 48, 59, 64, &. 79. 79.

महर्षिशौनकप्रणीतम् ऋक्प्रातिशाख्यम् ।

उव्वटकृतभाष्ययुतम् ॥

श्रीपण्डितयुगलकिशोरपाठकान्तेवासिना श्रीहिन्दुकालेज मध्यवर्त्ति श्रीरणवीरपाठशालायां वेदशास्त्राध्यापकेन श्रीमत्पण्डितप्रभुदत्त शर्म्मणा संशोध्य प्रकाशितम् ॥

ŚAUNAKA'S PRÂTIŚÂKHYA OF THE RIGVEDA,

WITH THE COMMENTARY OF UVVATA.

EDITED AND ANNOTATED BY THE LATE PANDIT
YUGALAKIŚORA VYÂSA,
And His Esteemed Pupil Pandit
PRABHUDATTA ŚARMÂ,
PROFESSOR OF VEDA, CENTRAL HINDU COLLEGE, BENARES.

BENARES.
Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya vilas Press,
BEENARS.

1903,

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

॥ श्रीः ॥

॥ भूमिका ॥

किञ्चिदूनं वर्षत्रितयं जातं श्रौतस्मार्ततत्त्वविदग्रेसरै र्वैदिकधुरन्धरै रस्मद्गुरुवरैः श्रीयुगलकिशोर पाठक इति सुगृहीतनामधेयैः पदव्याकृति-स्वरशिक्षादिविषय व्युत्पित्सूनां वैदिकजनानां सुबहूपकृतये महतायासेन त्रिचतुराण्यादर्शपुस्तकानि संपाद्य तेभ्योऽति शुद्धं पुस्तकमेकं लेखयित्वा ग्रन्थस्यास्य ऋग्वेदप्रातिशाख्यस्य मुद्रापणे तत्परै रभूयत । दुर्लभातिप्राचीनग्रन्थरत्नानां जगति प्रचारार्थं बद्धपरिकरः श्रीयुत हरिदासनामा गुप्तः श्रीयुतव्रजभूषणदासाज्ञया स्वकीय (बनारस सीरीज़नामक) संग्रहे ग्रन्थमिमं स्वीचक्रे मुद्रयित्वा प्रकाशयितुम्। परन्तु दुर्दैववशादस्माकं प्रथमाङ्कपर्य्यन्तमेव कतिपयपत्राणि मुद्राप्य रुग्णशरीरतया श्रीगुरुचरणा विहाय विनश्वरं देहमिमं श्रीशिवसायुज्यभावं प्राप्नुवन् ।

प्रारब्ध-मुद्रणस्य परमोपकारिणोऽमुष्य ग्रन्थस्य गुरुभक्तिलेशात्ततः प्रभृति शोधनादिकार्ये यथावकाशमहमुद्युक्तोऽभवम् । अथैतत्सौलभ्यकर्तृत्वेनास्मद्गुरुचरणानां यशस्सौरभोद्गारं विस्तारयन् ग्रन्थोऽयमीश्वरानुग्रहेण शनकैरविन्दच्च समाप्तिम् । ग्रन्थस्यास्य सूत्रकारः त्रिकालदर्शी महर्षिः शौनकः प्रसिद्ध एवे

तिहास पुराणादिषु प्रेक्षावतामिति न तत्र वक्तव्यमस्ति ।

भाष्यकारश्च वेदार्थमीमांसा साम्राज्यासीनो भगवानुव्वटाचार्य्यः कस्मिन् समये कतमं जनपदमलञ्चकारेति विशेषतो मया न निर्द्धारितस्तथापि विद्यारण्य—श्रीमाधवाचार्यं समकालिको महीधराचार्य्यात्प्राचीनः शुक्लयजुः संहिताभाष्य—यजुर्वेदप्रातिशाख्यादि निबन्धकृदुव्वटाचार्य्योऽस्तीति यजुः संहिताभाष्यारम्भ एव ।

प्रणम्य लक्ष्मी नृहरिं गणेशं ।

भाष्यं विलोक्योव्वट माधवीयमिति महीधरोक्त्या स्फुटीभवति । उपकृतोऽस्म्यस्य मध्ये मध्ये निरीक्षणादिसाहाय्यद्वारा हिन्दूकालेजमध्यवर्त्ति श्रीरणवीरपाठशालायां व्याकरणशास्त्राध्यापकैरस्मद्गुरुवर श्रीमनन्तरामशर्म्मभिः । पुस्तके ऽस्मिन् सौसकाक्षर योजकदोषेण ममदृष्टिदोषाद्वा क्वचिदशुद्धय उपलभ्येरन् ताः शोधयित्वा गुणैकपक्षपातिनो महाशया विपश्चितः श्रमं मे सफलीकुर्वन्त्विति सप्रश्रयमभ्यर्थये सज्जनान् । प्रीयतां चासुना व्यापारेण सर्वान्तर्यामी विश्वेश्वरः श्रीशङ्कर इति निवेदयते ।

श्रीकाश्याम्
सं० १९६० आग्रहायण
शुदि १० रवौ

आदिगौडोपाधिक
श्रीप्रभुदत्तशर्म्मा मिश्रः ।

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	४	०	०
उपसर्गवृत्तिः	०	१	०

विज्ञापनम् ।

—:०:—

बनारससंस्कृतसीरीजनाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।।।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यं	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम्	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्)	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डे २	२	०
टुप्टीका खण्डानि ३	३	०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	८
पाणिनीयमिताक्षरा। सर्वतन्त्रस्वतन्त्रश्रीमदन्नंभट्टप्रणीता ख० २	२	८
न्यायलीलावती (यन्त्रस्था)	०	०

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

73 WIS. B OCT '51

89092549674

b89092549674a

Date Due

MY 29 '66			

Demco 293-5

B89092549674A